Sampath kumar Medavarapu

॥ श्रीः ॥

जैमिनिसूत्रस्य सहपद्यामृतस्य भूमिकादिक्—

भगवतो जैमिनिमुनेः पूर्वमीमांसासूत्राणीवामूनि जातकोपदेशसूत्राणि सुप्रसिद्धानि तावत् । यानि प्रायेण वृद्धकारिकाश्रयेणैव प्रौढश्रीबालकृष्णानन्दसरस्वतीस्वाम्यादयो व्याकुर्वते स्म । स्वाम्यादिग्रन्थतो या या वृद्धकारिका उपलभ्यन्ते तासु भूयसो भिन्नकर्तृका उत्सूत्रा अप्यासते । ता एताः कारिकाः स्वामिनां नीलकण्ठज्योतिर्विदां च द्वित्रटीकापुस्तकेभ्य उद्धृत्य यथास्थानं व्याख्यांशेन संगमय्य च परीक्षकाणां विनोदायान्ते योजिताः । अद्यावधि वृद्धकारिकाणामाकरग्रन्थोऽस्माकं दृष्टिपथं नावातीतरत्; अवतीर्णोऽपि मन्यामहे सूत्राणि नोपकुर्यादिति । यथा खलु जातकालंकारे 'यत्पूर्वं परमं शुकास्यगलितं सज्जातकं फक्किकारूपं गूढतमं तदेव विशदं कुर्वे गणेशोऽस्म्यहम्', इति प्रतिज्ञायापि बहुत्र शुकसूत्राणि मतान्तरेण संकीर्णसामानीतानि; तथैव जैमिनिसूत्राणि व्याख्याबलेनेति । अथवा यावत् कस्यचित् वृद्धस्य ग्रन्थप्रणयनप्रतिज्ञावाक्यं नासाद्यते; तावदेवमपि वक्तुं न युक्तम् ।

भवतु; संप्रति संप्रदायविच्छेदेन द्वित्राणां वृद्धानां वाक्यमिश्रणेन व्याख्यातृणां मतिकर्दमेन च बहुत्र सूत्राणां तात्पर्यमन्यथाऽजनिष्टेति नातितिरोहितम् । किंबहुना; क्वचित्सूत्राण्यपि प्रक्षिप्तानि । यथा प्रेमनिधिटीकायां प्रथमाध्यायस्य द्वितीयपादे—'तत्र मन्दसपर्योस्ताम्बूलदायी । चापे चन्द्रे नाविकः । शुक्रदृष्टौ विशेषेण', इति त्रिसूत्री ।

एवं सत्यपि कष्टे गतानुगतिकन्यायेन मयाप्यात्मवचसां शुद्ध्यै भगवज्जैमिनिसूत्राशयो यथाप्रज्ञं व्यलेखि। तत्रैवं प्रबन्धनिर्माणशैली—पूर्वं प्रायो यथापेक्षं सूत्राणां तात्पर्यं श्लोकतो निबद्धम्, तदधस्तात् सूत्राणामर्थः, तत उदाहरणम्; इत्थं दैवज्ञकीर्तिदुराशया त्रिधा यतितम् । मन्ये बालानामुपकारः स्यात् ।

भवन्ति चात्र हृदयोद्गारवाहीनि पद्यानि—

> गङ्गोलीकुलदीपके जयपुरी-शिक्षाविभागाधिपे
> सद्विद्याविनयावदातचरिते संजीवने जाग्रति ।
> श्रीमन्माधवसिंह-सत्कृत-महागीर्वाणविद्यालया-
> ध्यक्षो जैमिनिसूत्रवृत्तिघटनं दुर्गाप्रसादो व्यधात् ॥

अथ समाप्तप्रायायां जैमिनिपद्यामृतस्य टीकायां मूलकन्दल्यां स्वधर्मधुरंधराणां दैवज्ञवाचस्पतीनां ज्योतिःपारदृश्वनां चातुर्मास्ययाजिनां वेतालोपाभिधानां विनय-

Sampath kumar Medavarapu

कशास्त्रिणामात्मनः सतीर्थ्यानां कृतिरुपदेशार्थोद्योतो दृष्टः। यदन्ते खल्वेवमुपश्लोकितम्—

न सन्ति गुरवोऽधुना स दिवि चन्द्रदेवोऽप्यगा-
त्परे न खलु तादृशः सखिसुधाकरोऽप्यस्तमैत्।
विलोकयतु कः पुनर्हृदयमेतदुद्घाटितं
विवेचनविधौ भवेज्जगति कोऽपि वोत्पत्स्यते॥

हन्त कालमहिम्ना द्वितीयं चरणमेवं पठनीयम्—

'न कोविदसुधाकरोऽहह विनायकोऽप्यस्तमैत्।'

अत्रेदमपि वक्तव्यम्—

अरे दुष्टव्याख्याविषमविषसंक्रान्तवपुषां
रहस्यं सूत्राणां प्रलयमगमज्जैमिनिमुनेः।
अथैतच्चोद्धर्तुं कथमपि मया भूरि यतितं
प्रमाणं तत्रार्याः क इह निजकृत्यं न गणयेत्॥

अथवोत्तरार्धमेवं पठनीयम्—

वयं वा वृद्धा वा मुनिवचनतत्त्वार्थकलने
विदग्धाः संदिग्धाः क इह कृतकृत्यः खलु भवेत्॥

इति शिवम्।

श्री ६ बापूदेवशास्त्रिचरणाः। २ ज्योतिषमार्तण्डचन्द्रदेव-ज्योतिषशास्त्रोद्धारका महामहोपाध्यायधुरंधराः सुधाकरद्विवेदिनः।

Sampath kumar Medavarapu

चरदशाक्रमम्	१७
वर्षस्योपचयापचये सोदाहरणमानयनम्	१७
वर्तमानरीत्या चरान्तरदशासाधनम्	१७
वास्तविकचरान्तरदशारम्भक्रमभेदाः	१८
चरान्तरदशोपयोगि किंचिद्	१९
चरान्तरदशोदाहरणम्	१९
आरूढादिनिरूपणम्	१९
आरूढे मतभेदः	२०
होराभावघटीलग्नानामानयनम्; उपपत्तिः उदाहरणम् ...	२१
गुलिकादिसाधनम्; उदाहरणम्	२३–२४–
पद्यामृतशिष्टसूत्रत्रयीव्याख्या	२४
वर्णदानयनम्	२४
वर्णदफलम्	२४
वर्णदप्रक्रियासारः सोदाहरणः	२५
वर्णदप्रपञ्चनम्	२५
वृद्धवाक्येन होरादिनिरूपणम्	२५
प्रथमपादोपसंहारः ।	२६
अथ द्वितीयप्रवाहः	
आत्मकारकांशात्फलनिरूपणप्रतिज्ञा (एकेन सूत्रेण)	२७
कारकांशकुण्डली	२७
कारकाश्रितमेषादिद्वादशराशिनवांशफलानि (द्वादशसूत्र्या)... ...	२८
कारकांशे सूर्यादिग्रहावस्थानेन फलानि (नवसूत्र्या)	३०

---

१ अत्रैतदुक्तं भवति—संप्रति कतिपये ज्यौतिषपुराणादौ पुरुषायुषस्य शतसहस्रवर्षाधिकसंख्यादर्शनात्तत्र संदिहाना मीमांसादर्शनीयेन सहस्रसंवत्सरशब्दस्य सहस्रदिनपरताधिकरणन्यायेन व्यवस्थामुत्पादयन्तो धर्मग्रन्थानाकुलयन्ति । तैरेवमाकलनीयम्—'आदित्यो वा सर्व ऋतवः स यदोदेत्यथ वसन्तः, यदा संगवोऽथ ग्रीष्मः, यदा मध्यंदिनोऽथ वर्षाः, यदापराह्णोऽथ शरद्, यदास्तमेत्यथ हेमन्तशिशिरौ ।' इति ब्राह्मणवाक्यादिना भवतु सत्रे तथाभिधेयः संवत्सरशब्दः; परं तावता प्राचामाशया न लोपनीयाः । मूलरामायणादौ हि—

'दशवर्षसहस्राणि दशवर्षशतानि च ।
रामो राज्यमुपासित्वा ब्रह्मलोकं प्रयास्यति ॥', इति ।
'षष्टिवर्षसहस्राणि जातस्य मम कौशिक ।
दुःखेनोत्पादितश्चायं न रामं नेतुमर्हसि ॥', इति ।

Sampath kumar Medavarapu

कारकांशे योगदृष्टिभ्यां फलानि (षोडशसूत्र्या) ३१
कारकांशाद् दशमभावे योगदृष्टिभ्यां फलानि (त्रिसूत्र्या) ३२
कारकांशाच्चतुर्थभावे योगदृष्टिभ्यां फलानि (षट्सूत्र्या) ३२
कारकांशान्नवमभावे योगदृष्टिभ्यां फलानि (नवसूत्र्या) ३३
कारकांशात्सप्तमभावे योगतः फलानि (सप्तसूत्र्या) ३४
कारकांशात्तृतीयभावे योगतः फले (द्वाभ्यां सूत्राभ्याम्) ३५
कारकांशात्तृतीयषष्ठभावयोर्नवमभावे च योगतः फलम् (द्वाभ्यां सूत्राभ्याम्) ३५
कारकांशाद् द्वादशभावे योगतो लोकान्तरादिप्राप्तिविचारः (चतुःसूत्र्या) ३५
कारकांशाद् द्वादशभावे योगतो नानादेवोपासना (दशसूत्र्या) ... ३५

'अरोगाः सर्वसिद्धार्थाश्चतुर्वर्षशतायुषः ।
कृतत्रेतादिषु ह्येषामायुर्ह्रसति पादशः ॥', इति च ।

स्मर्यते । तत्र निरूपितदिशा श्रीमद्दशरथस्य १६६ वर्षाणि ८ मासा आयुः । भगवतस्तु ३० वर्षाणि ६ मासाः २० दिनानि । कृतयुगीयमायुस्तु वर्षादि १।१।१० पञ्चदिनादिकेन ।

यदेतदायुषो दीर्घत्वं सांप्रतिकैरसंभाव्यमानं धर्मग्रन्थेषु परीक्ष्यते तन्नैवेति चेन्न—

'एकांशकस्था बुधशुक्रमन्दा धर्मे स्थिता लग्नमुपागता वा ।
षष्ठाष्टमे वा हिमगुश्च यस्य सहस्रवर्षद्वयमस्य जन्तोः ॥
जीवांशकस्थाः सकला ग्रहेन्द्राः केन्द्राश्रिता धर्मधनाश्रिता वा ।
जातो नरः प्रव्रजितः स बालो युगान्तमायुर्बहुशास्त्रकर्ता ॥
मन्दांशकस्था रविभौमजीवाः कर्माश्रिता धर्मयुता बलाढ्याः ।
राशेः समाप्तौ हिमगौ विलग्ने युगान्तमायुः श्रियमादधाति ॥
धर्मेश्वरे धर्मगते च यस्य भौमांशवस्थे हिमगौ च दृष्टे ।
मुनीश्वरोऽयं मुनियोगजातः शास्त्रार्थकर्ता युगमायुराप्ति ॥'
'गुरुशशिसहिते कुलीरलग्ने शशितनये भृगुजे च केन्द्रयाते' इति ।
भवरिपुसहजोपगैश्च शेषैरमितमिहायुरनुक्रमाद्विना स्याद् ॥ इति'

अत एवासमञ्जसनिरासाय शतशब्दस्य यथाश्रुतार्थपरिष्कारोऽकारि—

'श्रुतौ शतायुः पुरुषः प्रदिष्टो
बहुत्वयोगी शतशब्दवाच्यः ।
रामादिकानामधिकायुराप्तौ
युक्तं प्रतीमः फलितेऽमितायुः ॥
स वार्षिको वासरिको भचक्र-
भोगो भवेद् भास्करसंश्रयेण ।
तत्रापरं मासनगौरवेण
स स्रीचकारेति विरोधनाशः ॥' इति ।

अमात्यकारकात् षष्ठभावे देवोपासनाविचारातिदेशः (एकेन सूत्रेण)... ३६
कारकांशात्पञ्चमनवमभावयोर्योगतो मन्त्रसिद्धिप्रभावः (त्रिसूत्र्या) ... ३६
कारकांशे योगदृष्टिभ्यां फलम् (द्वाभ्यां सूत्राभ्याम्) ३७
कारकांशाच्चतुर्थपञ्चमभावयोर्योगदृष्टिभ्यां रोगाः (अष्टसूत्र्या)... . ३७
कारकांशाच्चतुर्थभावे योगतो धनुरादिवृत्तयः (षट्सूत्र्या) ३८
कारकांशे तत्पञ्चमभावे वा ग्रहस्थित्या विद्यायोगा (षोडशसूत्र्या) ... ३८
कारकांशाद् द्वितीयभावे दृष्टिवशात्फलम् (एकेन सूत्रेण) ४०
केमद्रुमयोग (द्वाभ्यां सूत्राभ्याम्) ४०
फलस्यावधि (एकेन सूत्रेण) ४०
द्वितीयपादोपसंहार ४१

अथ तृतीयप्रवाह·

पदाद् (आरूढात्) फलनिरूपणप्रतिज्ञा (एकेन सूत्रेण) ४१
आरूढकुण्डली ४१
श्रीमत्ता, लाभश्च (त्रिभि) ४२
श्रीमत्ता, तत्प्रतिबन्ध॰, भागवत्ता (चतुर्भि) ४२
राजयोगानामुपायचक्रेण्य (चतुर्भि) ४३
आत्मकारकतो राजयोगनिरूपणम् (चतुर्भि) ४३
दारिद्र्यम् (एकेन) ४५
यानवत्ता वैतानिकानां राजकीयाना सेनानीना राजचिह्नवतां चोत्पादका योगा (पञ्चभि) ४५
नानाहेतुकाना व्ययानां निरूपणम् (सप्तभिः) ४६
उदररोग-सद्योबाधक-स्त्रीपुंसानुरागकलहाना सपादका योगा (चतुर्भि) ४७
धीमता सुखिनां दरिद्राणा व्ययशीलानां प्रबलाना चोत्पत्तय (पञ्चभि) ४८
अनेकधा कारागारीया दुर्घटना (द्वाभ्याम्) ४८
चक्षूरत्नस्य महाधनस्य विनाशयोग (एकेन) ४९
तृतीयपादोपसंहारः ४९

अथ चतुर्थप्रवाह, अत्र कालविपयको विशेषः ... ५०

उपपद (उपारूढ) लक्षणम् ५०
उपपदकुण्डली ५०
प्रव्रज्या, दारनाश ५२
दारयोग ५२

Sampath kumar Medavarapu

उत्तरायुषि दारनाशः ५२
कुलीन-दारयोगः ५२
अकुलीन-दारयोगः ५२
सुन्दर-दारयोगः ५२
दारत्यागयोगः ५२
दाराणां रक्तप्रदरादियोगः ५३
पूर्वफलनामातिदेशः ५४
अनपत्ययोगः ५४
बहुपुत्रयोगः ५४
एकपुत्रयोगः ५४
दत्तक(पुत्र)योगः ५५
पूर्वफलातिदेशः ५६
भ्रातृनाशयोगः ५६
बहुभ्रातृयोगः ५६
बहुभगिनीयोगः... ... ... ५६
दंष्ट्रावद्योगः ५७
स्तब्धवाग्योगः ५७
कुरूपयोगः ५७
गौरादिवर्णज्ञानम् अत्र विशेषः। ५७
देवताभक्तिः ५८
परजातयोगः, अत्र विशेषः... ... ... ५८
कुलमुख्ययोगः ५८
प्रकरणस्य गौरवदोषपरिहार. ५९
अध्यायोपसंहारः ५९
अथ पञ्चमप्रवाहः... ... ... ६०
आयुर्दायगणितप्रक्रिया ६०

---

२ वस्तुतस्त्विदमायुर्दायगणितं वृद्धस्वामिव्याख्यामूलकम्। अत्र 'पूर्णमादौ'—, इत्यनेन 'होराल्पादिभांशे तु'—, इत्यनेन 'एकोऽष्टमेशः स्वोच्चस्थः पर्यायार्थं'—, इत्यनेन च प्रकारेण वृद्धोक्तेन पृथक् पृथक् आयुरानेतुं शक्यम्। खण्डप्रकरणे स्वाम्यादिव्याख्यापि विद्यते। कश्यपादेन गृह्यमाणमायुःखण्डमपि संप्रति सूत्रेषु न प्राप्यते। यत्तु तत्रोच्चारिते प्रथमसूत्रे आयुः १ पितृदिनेशा २ भ्याम् ३ इति पदत्रयम्। मध्यमपदलोपिसमासेन पितृदिनेन ३ युक्त ३६ २ तथा द्वात्रिंशत्संख्यया। एकमायुर्भवतीत्यर्थः। दीर्घं मध्य हीनमिति तदायु-र्भेदपूर्तया षण्णवतिश्चतुःषष्टिर्द्वात्रिंशदिति सिध्यतीति विनायकशास्त्रिभिर्व्याख्यातं तत्र विचार-

अल्पायायुषि मतभेदसंग्रहः ६१
'लग्नेशादष्टमेशाद्'—, इत्यादिनैकवाक्यताप्रयासः ६३
आयुरुदाहरणम् ६६
द्वार-बाह्यराशिज्ञानम् ६७
निधनयोगः ६७
निधनापवादः, अत्र विशेषः ६७
प्रकारान्तरेण दीर्घमध्याल्पायुर्योगाः ६८
स्थिरदशा ७०
ब्रह्मग्रहलक्षणम् ७०

सद्भिरपि मार्मिकाणां प्रत्यक्षम् । स्पष्टमायुर्दायगणितं तु सूत्रकारगुरुणा भगवता बादरायणेनोपदिष्टम्—

'राश्यंशकलागुणिता द्वादशनवभिर्ग्रहस्य भगणेभ्यः ।
द्वादशहृतावशेषेऽब्दमासदिननाडिकाः क्रमशः ॥
होरादयोऽप्येव वलयुक्तान्यानि राशितुल्यानि ।
वर्षाणि संप्रयच्छत्यनुपाताच्चांशकादि फलम् ॥', इति ।

इदमेवानयनं वराहमिहिराचार्येण—

'वर्गोत्तमस्वराशिद्रेष्काणनवांशके सकृद् द्विगुणम् ।
वक्रोच्चयोस्त्रिगुणितं द्वित्रिगुणत्वे सकृत्त्रिगुणम् ।
शत्रुक्षेत्रे त्र्यंशं नीचेऽर्धं सूर्यलुप्तकिरणाश्च ।
क्षपयन्ति स्वाद्दायाच्चारतं यातौ रविजशुक्रौ ॥
सर्वार्धत्रिचतुर्थेन्द्रियर्दुभागान्व्ययाद्वरन्त्यशुभाः ।
सन्तोऽर्धमतो वाम बलवानेकर्क्षगेष्वेकः ॥'

इति बादरायणाभिमतार्थसंग्राहकार्याभिः परिष्कृत्य लघुजातके लिखितमिति सर्वं भट्टोत्पललेखतो व्यक्तम् ।

प्रकृते सूत्रग्रन्थस्तु योगायुर्दायवर्णनाभिप्रायेणायोजयितुं सुशकः । तथाहि—'शशिनन्दपावकाः—', इति स्थिरदशाब्दाः संकलिताः षण्णवतिर्भवन्ति (७।८।९)×४=९६ दीर्घं मध्यं हीनमिति सौत्रपदैरायुषस्त्रैविध्याच्चक्रमदर्शनाच्च द्वात्रिंशत्प्रमितयस्त्रयो भागा अपि ९६÷३=३२ । ३२×१=३२ । ३२×२=६४ । ३२×३=९६ । वृद्ध्यादिप्रसङ्गे कक्ष्यावृद्धिः, एकराशिवृद्धिः, नवांशवृद्धिरित्येवमादयः, सौत्राः प्रयोगाः । तत्र कक्ष्याशब्दाद् एकादश गृहीता एकदेशिमताभिप्रायेण स्वामिना । त एव मुख्यत्वेनाङ्गीकर्तव्याः । उत्तरत्र यथाश्रुतोऽर्थः । एवं 'पितुर्लाभरोगेशप्राणिनि'—, इत्यादावपि चिन्त्यमिति मदुक्तं कियद् इत्यत्र परीक्षकाः प्रमाणमिति विरम्यते ।

Sampath kumar Medavarapu

ब्रह्मणो निर्णयः ७०
ब्रह्मदशा ७१
स्थिरदशोदाहरणम् ७१
ब्रह्मदशोदाहरणम् ७२
योगार्धदशा, तदुदाहरणम् ७२
स्थिरदशालम्बनेन निधनयोगाः ७३
निधनराशिविशेषज्ञानाय रुद्रग्रहनिरूपणम् ७४
रुद्रग्रहफलानि ७४
महेश्वरग्रहलक्षणम् ७५
ब्रह्ममहेश्वरयोः फलम् ७६
मारकग्रहाः ७६
पादोपसंहारः ७७

अथ षष्ठप्रवाहः ७८
मातापित्रोर्निधनम् ७८
कलत्रनिधनम् ७८
नानाविधानि मरणनिमित्तानि ७९
मातापित्रोः संस्कारकर्तृयोगः ८०
पादोपसंहारः ८०

अथ सप्तमप्रवाहः ८१
सामान्येनान्तर्दशा ८१
शूलदशा ८१
प्रकारान्तरेण शूलदशा ८२
मण्डूकदशा, तदुदाहरणम् ८२-८३
बलविभागः ८३
पादोपसंहारः ८४

अथाष्टमः प्रवाहः ८४
कारककेन्द्रदशा, तदुदाहरणम् ८४, ८५
नक्षत्रदशा, अत्र विंशोत्तरी सोदाहरणा ८६, ८७
दृग्दशा, तदुदाहरणम् ८८, ८९
त्रिकोणदशा, तदुदाहरणम्, फलानि ८९, ९०
नक्षत्रदशा, तदुदाहरणम्, फलानि ९१
अन्तर्दशोपदशे, फलानि ९२
शास्त्रोपसंहारः ९२

Sampath kumar Medavarapu

मुनीन्द्रप्रणमनम्	९३
ग्रन्थार्पणम्	९३
अध्यायोपसंहारः	९३
टीकाया वृत्तगुम्फनम्।	९४
अथ यावल्लब्धवृद्धकारिकाणां संग्रहः।	९५

Sampath kumar Medavarapu

॥ श्रीगणेशाय नमः ॥

जैमिनिपद्यामृतं

मूलकन्दलीवृत्तिसहितम् ।

परस्परप्रेमरसप्रसारा सा शारदा सा कमलालया च ।
युष्माकमुद्यिद्रसमृद्धिवृध्यै प्रयत्नकार्योदयमादधातु ॥ १ ॥
याऽनेकधा द्वादशधापि भक्ता प्रज्ञानुमेया खलु कर्मपङ्क्तिः ।
सा चारचर्यापरिणामसिद्धिसिद्धान्तिताऽऽरोहतु शेमुषीं वः ॥ २ ॥
आसाद्य वैदुष्यमुदस्य कूटमाश्रित्य याथार्थ्यमुदीक्ष्य मेयान् ।
पूर्वापरालोकनदृष्टतत्त्वो वदेत्फलं तत्सफलत्वमृच्छेत् ॥ ३ ॥
आघ्राय गन्धान् परवृत्तजातान् संधाय लोकान् बहुधा प्रपञ्चैः ।
प्रवर्तते यः फलिताभिमानी स साधुवाचापि न पूजनीयः ॥ ४ ॥
विमृश्यते जैमिनिसूत्रसिद्धपद्यामृतं सम्प्रति मूलबद्धम् ।
उत्सार्य शैवालमिवात्र फल्गु वारीव सारं रसयन्तु सन्तः ॥ ५ ॥

अथ पूर्वं तावद् द्रुतविलम्बितत्रयेण प्रतिपाद्यं प्रतिजानीते—

जयति लोकविलोकनदीपिका सवितृमण्डलदीप्तिवितानिका ।
तदनु जातकतत्त्वनिदर्शकं जयति जैमिनिसूत्रकदम्बकम् ॥ १ ॥
सकलसूत्रसुमानि यथायथं मतिगुणेषु निवेश्य विकास्यते ।
सुमनसां हृदयग्रहणक्षमा नवनवावनवास्तुरसौ कृतिः ॥ २ ॥
इह चिरंतनसूक्तिषु यावती प्रकृतकृत्यकरी कृतिरीक्ष्यते ।
तदनुपक्वमदुक्तचमत्कृतौ सुलभतां लभतां फलितक्रमः ॥ ३ ॥

जयतीति—लोकानां जनानां यद्विलोकनं निरीक्षणं तदर्थं दीपिका दीपज्योतिः; सवितृमण्डलस्य सूर्यबिम्बस्य या दीप्तयः प्रकाशास्तद्वितानिका पुञ्जो जयति सर्वोत्कर्षेण वर्तते ॥

तदनु तज्जयवादानन्तरं; जातकं होराशास्त्रम्, तत्तत्त्वस्य रहस्यस्य निदर्शकं प्रकाशकं जैमिनिसूत्रकदम्बकं जैमिनिसूत्रजातं जयति ॥ १ ॥

सकलेति—सकलानि अविकलानि, सूत्राण्येव कुसुमानि सुमानि, यथायथं यथास्थानं, मतिर्बुद्धिरेव गुणास्तन्तवस्तेषु निवेश्य संयोज्य, सुमनसां विबुधानां हृदयग्रहणक्षमा मनोरञ्जनसमर्था; नवनवा नूतनप्रकारा; अवनस्य प्रीणनस्य, आनन्दस्येति यावद् वास्तुः स्थानविशेषः । 'धातुः' इति वा पाठः । असौ जैमिनिपद्यामृतरूपा कृती रचना विकास्यते प्रकाश्यते निष्पाद्यत इति यावत् ॥ २ ॥

Sampath kumar Medavarapu

इहेति—इह जैमिनिसूत्रटीकाटिप्पणीषु, प्रमाणत्वेनोद्धृता या चिरंतनानां सूक्तयो वाक्यानि, तत्र यावती यत्परिमाणा प्रकृतकृत्यकरी प्रस्तुतार्थसंपादिका कृतिरीक्ष्यते उपलभ्यते, तदनुषक्तं यन्मदुक्तं वाक्यजातं तस्य चमत्कृतौ चमत्कारे फलितक्रमः फलकथनपरिपाटी सुलभतां सौलभ्यं लभतां प्राप्नोतु । यावतीति कथनाद् वृद्धादिनिरूपितविरुद्धसूत्रार्थपरित्यागः सूच्यते ॥ ३ ॥

अत्रेदं बोध्यम्—'उपदेशं व्याख्यास्यामः १।१।१' इत्यादि 'सिद्धमन्यद् २।४।३७' इत्यन्तं जैमिनीयं जातकशास्त्रम् । तत्र 'क ९ ट ९ प ५ य ८ वर्गभवैरिह पिण्डान्त्यैरक्षरैरङ्का । नि ञ्यचि शून्यं ज्ञेयं तथा स्वरे केवले कथितम् ॥ इति परिभाषया राशिभावप्रतिपादनम् । तत्रापि नरपतिजयचर्यादिप्रसिद्धरीत्या अङ्कानां बोधने वर्णानामनर्थकतया प्रायेणाशुद्धिप्रसङ्गः स्यादिति राशिभावबोधनार्थमुचिताः शब्दा एव सूत्रेषु निबद्धाः । औचित्यं च तत्तच्छब्दद्योत्याङ्कानां द्वादशतष्टत्वे सति शेषत्वम् । यथा 'दारभाग्य—१।१।५' इति सूत्रे दारशब्देनाष्टाविंशतिसंख्या बोध्यते, अस्या द्वादशभिस्तष्टिताया चत्वारः शेषः, तेन चतुर्थो भावो बुध्यते । एवं सर्वत्रोचितशब्दनिबन्धना संख्या बोध्या । यदि चात्र चतुःसंख्याबोधको घादिवर्णः प्रयुज्येत, तदा स कदाचन लेखकादिदोषेण पवर्गीयबादिवर्णोऽपि पठ्येत । तथा सति त्र्यादिसंख्यावबोधे विपरीतं प्रसज्येत । एतेनान्यापेक्षया मुनीन्द्रोद्भाविताङ्कबोधनशैली सुतरां स्पृहणीयेति दरमुकुलितनयनैर्विभाव्यम् ॥

अथ सूत्रार्थसंग्राहका श्लोका व्याख्येयाः, तत्र प्रतिश्लोकं यावतां सूत्राणां तात्पर्यमुपनिबद्ध्यते तावन्ति तच्छ्लोकविषमपदव्याख्यापुरस्सरं यथासंबन्धं सवृत्तिकानि करिष्यन्ते । तत्र तावच्छास्त्रारम्भसूत्रम्—

उपदेशं व्याख्यास्यामः ॥१।१।१॥

उपदिश्यन्ते प्रतिपाद्यन्ते शुभाशुभमिश्रकर्माण्यनेनेत्युपदेशो जातकशास्त्रविशेषः; तं व्याख्यास्यामो निरूपयिष्यामः ॥

अथान्यजातकविलक्षणां दृष्टिं भुजङ्गप्रयातेनाह—

चराः स्वादुभुजङ्गाशुगेशान (८।५।११) राशी-
न्स्थिरास्तर्कवैश्वानराङ्क (६।३।९) प्रमाणान् ।
द्विदेहा नगाम्भोधिदिग् (७।४।१०) भानि पूर्णं
प्रपश्यन्ति तन्निष्ठखेटाश्च तद्वत् ॥ ४ ॥

चरा इति—क्रान्तिवृत्तापरनामधेयस्य भचक्रस्य द्वादशो भागो राशिरिति प्राचीनामाम्नायः । स तावत्स्वसदृशं भागान्तरं पश्यतीदमेव वैलक्षण्यम् । यतः स भागोऽपरजातकादिषु भोग्यत्वेनैव निर्दिष्ट इति । शेषं स्पष्टम् ॥ ४ ॥

अभिपश्यन्त्यृक्षाणि ॥१।१।२॥ पार्श्वभे च ॥१।१।३॥

तन्निष्ठाश्च तद्वत् ॥१।१।४॥

Sampath kumar Medavarapu

ऋक्षाणि राशयोऽभिपश्यन्ति स्वसंमुखमवलोकयन्ति; स्वाभिमुखस्थितं राशिं पश्यन्तीत्यर्थः । तथा पार्श्वभे स्वदक्षिणवामपार्श्वयोः स्थिते भे राशी पश्यन्ति । तथा चैको राशी राशित्रितयं पश्यतीत्यर्थः संपन्नः ॥ अत्रैक्ययोगकरणेनापीष्टसिद्धौ योगविभागो वृद्धकारिकागतविनापदव्यवच्छेदप्राप्त्यर्थं इति ऋजवः । वस्तुतस्तु नात्र वैयाकरणनीतिनिर्वाहः। तथा च वृद्धकारिका—चरं धनं विना स्यात्तु स्थिरमन्त्यं विना चरम्। युग्मं स्वेन विना युग्मं पश्यतीत्यागमः ॥ अत्रेदं माधवप्रसादस्तु लाघवेनाह—चरं पूर्णघनात्स्वाच्च स्थिरमन्त्याच्च पश्यति । युग्मं स्वाद् वेदशैलाशास्वद्गताः खेचरास्तथा ॥ तथैव तन्निष्ठा द्रष्टृभूतराशिगता ग्रहास्तद्रष्टृशिवरस्वसंमुखदक्षिणवामभागगतान् दृश्यभूतान्राशीं स्तन्निष्ठग्रहांश्च पश्यन्तीत्यतिदेशः । अत्रेदं रहस्यम्—क्षितिजानुकारं भवलयं विधेयम् । तत्पूर्वापरयाम्योत्तररेखाभ्यामङ्कितं कार्यम् । तत्र पूर्वादिदिगनुरुद्धं चतुर्भुजं विधेयम् । ततः पूर्वादिदिग्बिन्दुभ्य उभयतः षष्टिभागानां द्विगुणषष्टिभागानां च पूर्णज्या कार्या । एवं कृते राशिसंज्ञिता द्वादशभागा उत्पद्यन्ते । तत्र युक्त्या यद्यपि सव्यगणना न्याय्या तथापि व्यवहारेण मीनान्तमनुसृत्यापसव्यक्रमेण द्वादश राशयो विलेख्याः । अथ मीनान्तात्पञ्चचत्वारिंशद्भागान्तरे पूर्वपदादिकल्पनया या नवत्यंशपूर्णज्या कृता स्यात्तदुत्तरं सार्धशतभागानां पूर्णज्या विधातव्या । एवमपसव्यक्रमेण सौम्यादिदिक्षु कृतरेखाणामग्रेषु सार्धशतभागानां पूर्णज्याविधानेन कुण्डली संपद्यते । तत्र कोऽपि राशिः स्वसंमुख–दक्षिण वाम–भागगतरेखान्तवर्तिनं राशिमवलोकयेत् । एवमत्रावलोकनरेखा दृक्सूत्रत्वेन परिणमन्ति । ता द्विस्वभावघटितकोणाद् मार्गक्षेत्राच्चरस्थिरघटितकोणादायतद्वयाच्च नातिरिच्यन्ते ।

अथोदाहरणप्रक्रिया—

स्वस्ति श्रीवैक्रमाब्दः १९२९ सातवाहनीयः शकः १७९४ मार्गशीर्षशुक्लचतुर्दशी भृगुघट्यादि ४५।३२ कृत्तिकानक्षत्रम् ७।४१ सिद्धियोगः १०।३५ गरकरणम् १५। २७ दिनमानम् २५।५१ श्रीमन्मार्तण्डमण्डलार्धोदयादिष्टम् ३०।५९ एतत्समये पारीकपुरोहितोपाख्यस्य जनार्दनवंश्यस्य श्रीमच्चिरजीविनो माधवप्रसादशर्मणो जन्माभूत् । तत्र जयपुरराजधान्यां विषुवती ६।६ विषुवत्कर्णः १२।२७ मध्यरेखातो देशान्तरनाडिकादि प्रसङ्ग ०।२ मेषादीना व्यवह्रियमाणाः सायनोदयाः ।

राशयः	मेषः	वृषः	मिथुनः	कर्कः	सिंहः	कन्या	तुला	वृश्चिकः	धनु.	मकरः	कुंभः	मीन
घट्यः	३	४	५	५	५	५	५	५	५	५	४	३
पलानि	३७	१०	३	४३	४८	३९	३९	४८	४३	३	१०	३७

Sampath kumar Medavarapu

सौरसारणीतः स्पष्टा ग्रहाः सगतयः ।

सू.	चं.	मं.	बु.	बृ.	शु.	श.	रा.	के.
७	१	५	७	४	६	८	१	७
२९	१५	१७	२७	१०	८	२६	१०	१०
५१	०	२५	१४	२४	२	२४	१५	१५
२४	१४	११	४८	२१	४२	१८	३२	३२
६१	७७३	३१	५५	१	७२	६	३	३
१९	९	२	३०	१	४०	५४	११	११

अथ जन्मकुण्डली ।



अथात्र मीनराशिः स्वसंमुखस्थां कन्यां तद्गतं भौमं च पश्यति । एवं स एव मीनः स्वदक्षिणपार्श्वस्थं मिथुनं, तथा स्ववामपार्श्वस्थं धनूराशिं तद्गतं शनिं च पश्यति । एवमेव कन्याराशिस्थितो भौमश्च स्वसंमुखस्थं मीनं पश्यति । तावेव पुनः स्वदक्षिणपार्श्वस्थं धनुर्राशिस्थं शनिं च पश्यतः । तथा स्ववामपार्श्वस्थं मिथुनराशिं पश्यतः । एवमेव

Sampath kumar Medavarapu

मेषादिष्वपि परस्परं दृष्टयो बोद्धव्याः । एवं भावकुण्डल्यामप्युभयथा दृष्टयः । वस्तु तस्तु भावकुण्डली मन्दप्रयोजना ॥

अथार्गलापदपरिभाषितार्थमुपजातित्रयेणाह—

राशेर्विचार्याद्‌थवा नभोगा-
श्चभश्चरा वारि (४) धना (२) य (११) संस्थाः ।
स्युरर्गला भस्य खगस्य तस्य;
न चेद्दश (१०) द्वादश (१२) विक्रम (३) स्थाः ॥ ५॥
इहार्गलासाधकखेचरेभ्य-
स्तद्बाधका न्यूनकृशा न चेष्टाः ।
तृतीयसंस्थैर्द्विधिकैर्दुसद्भिः
पापैरपेतार्गलमर्गलं स्यात् ॥ ६ ॥
उत्पादयन्त्यर्गलमात्मजस्थाः;
धर्मे (८) स्थितास्तस्य विघट्टकाः स्युः ।
तमोनभोगस्य तु वैपरीत्या-
त्समामनन्त्यर्गलमेतमार्याः ॥ ७ ॥

राशेरित्यादि—विचार्याद् विचारविषयीभूताद् राशेरथवा ग्रहाद् चतुर्थद्वितीयैका-दशस्थानस्थिता ग्रहाः, तस्यैव विचार्यस्य राशेरथवा ग्रहस्यार्गलाः स्युः । त्रिभिर्ग्रहैः पूर्णा, द्वाभ्यां मध्यमा, एकेन कनिष्ठेति केशवः । अत्र यथासंभवं वक्ष्यमाणबलचिन्ता कार्या । अस्या अर्गलाया यथाक्रमं दशद्वादशतृतीयस्थानस्था ग्रहाः बाधकाः स्युः । उक्तस्थानेषु ग्रहसत्त्वेऽर्गला न स्युरित्यर्थः । अत्रार्गलकर्तारो यावन्तो ग्रहास्तेभ्योऽर्ग-लाप्रतिबन्धका ग्रहाः संख्यया न्यूना अल्पाः, बलेन कृशाः क्षीणा नाद्रियन्ते । द्वौ चे-दर्गलाकर्तारौ, एकश्चेत्तत्प्रतिबन्धकः, प्रबलश्चेदर्गलाकर्ता दुर्बलश्चेत्तत्प्रतिबन्धकस्तदा प्र-तिबध्यप्रतिबन्धकभावो न भवतीति तात्पर्यम् । एताः शुभाशुभग्रहकर्तृकाः सप्रतिबन्धा अर्गलाः । अर्गलाशब्दस्त्रिलिङ्गी ॥

तृतीयसंस्थैर्द्व्यधिकैरित्यादिभिः पापैर्ग्रहैरर्गला स्यात् । एषा केवलपापकर्तृका अप्रति-बन्धा । न पूर्वार्गलेव स्थानविशेषस्थितैर्ग्रहैः प्रतिषिध्यत इत्यर्थः । 'अपेतार्गलम्' इत्यत्रा-र्गलशब्दस्य यथाश्रुतोऽवरोधार्थो गृह्यते; परत्र तु परिभाषितार्थ इति विशेषः । अय-मर्गलप्रतिबन्धो विपरीतार्गलशब्देनापि परिभाष्यते वृद्धैः ॥

उत्पादयन्त्यर्गलमात्मजस्था इत्यत्र बहुवचनमविवक्षितम् । तेन ग्रहेण ग्रहाभ्या-मप्यर्गला बोध्या । बाधकविषये तु 'न न्यूना विबलाश्च' इति सूत्रमुपतिष्ठत एव । एषापि शुभाशुभग्रहकर्तृका सप्रतिबन्धा ॥

Sampath kumar Medavarapu

तम प्रधानो नभोगो ग्रह तमोनभोग । 'प्रदिशेता तमोग्रहौ' इत्यादौ तथा-प्रयोगात् । केतुरित्यर्थ । राहुरपीति केचित् । तस्य नवममर्गलास्थान पञ्चम तत्प्रतिबन्धकस्थानम् । तदेतद्वैपरीत्य पूर्वत्रापि योजनीयम् ॥ ५–७ ॥

दारभाग्यशूलस्थार्गला निध्यातुः ॥१।१।५॥ रिष्फनीचकामस्था विरोधिन. ॥१।१।७॥ न न्यूना विबलाश्च ॥१।१।८॥

निध्यातुरवलोकयितुर्द्रष्टुरिति यावत् । राशेर्ग्रहस्य वा 'आलोकन तु निध्यानम्' इत्यभिधानात् । दार (=२८–१२ शे=४) भाग्य (=१४–१२ शे=२) शूल (=३५–१२ शे=११) स्था दारादिशब्दसंकेतितासु सख्यासु द्वादशतष्टासु यदवशिष्यते तद्बोध्यस्थानस्थिता अर्गला स्यात् । तन्निष्ठेषु ग्रहेषु वर्तमानेषु । अत्र 'अभिपश्यन्ति–' इत्यादिसूत्रान्तया निध्यातृपदेन राशेर्ग्रहस्य च बोधो निर्बाध । अत एव कृष्णानन्दसरस्वतीनीलकण्ठकेशवादिभी राशेर्ग्रहस्य चाविशेषेणार्गला प्रतिपादिता । यद्यपि 'पत्नी (१) लाभ (७) योर्दिष्टया निराभासार्गलया ॥ १।१।३२॥' इति सूत्रेण भावार्गला उच्यते, तथापि प्रातिस्विककल्पेण ग्रहार्गलाप्रतिषेधाभावात् पर्जन्यवदुभक्षणप्रवृत्तिरिति न्यायाचातिदेशमर्यादया यथासम्भव तत्फलानुसधाने क प्रत्यवाय इति विवेचनीयम् ॥

अथ दारादिशब्दबोध्यार्गलाकर्तृणा क्रमेण रिष्फ (=३२/२=१०) नीच (=६२/९=१२) काम (=२१/२=३) स्था ग्रहा विरोधिनोऽर्गलानिवर्तका स्यु । अत्रेद रहस्यम्—सर्वा खल्वर्गला प्रतिबन्धकाभावे शुभा, प्रतिबन्धकसत्वे तु पापा स्यात् न तु शुभग्रहकृता शुभा पापग्रहकृता पापेति भ्रमितव्यमिति । सूत्रवृद्धकारिकयो प्रामाण्यबलाबलविवेके सूत्रस्योपजीव्यत्वाट्टीकादिसाधनेन नियन्त्रितत्वाद् वृद्धकारिकाणामुपजीवकत्वादानुपूर्व्या लाभाभावान्मतान्तरसङ्कीर्णत्वाच्च बहुत्र सूत्राणामाशयवर्णनावसरे न प्रमाणत्वेनोदाहरिष्यन्ते कारिका इति वेदितव्यम् ॥

दारादिबोध्यार्गलाकर्तृग्रहाणां विरोधित्वेन प्रतिपादिता रिष्फादिपदबोध्यस्थानस्था ग्रहा न्यूना बाध्यापेक्षया न्यूनसख्याका, विबला वक्ष्यमाणसौत्रबलहीनाश्च विरोधिनो न स्यु । नहि प्रबलो दुर्बलेन बाध्यत इति तात्पर्यम् ॥

कामस्था तु भूयसा पापानाम् ॥१।१।९॥ प्राग्वत्त्रिकोणे ॥१।१।९॥ विपरीतं केतो. ॥१।१।१०॥

कामस्था तृतीयस्थानस्था अर्गला तु पापाना पापग्रहाणां भूयसा बहुत्वेन स्यात् । क्षीणेन्दुर्कमहीसुतार्कतनयास्तद्युतो बुधो राहुकेतू चेति पापा । वक्ष्यमाण केतो शुभत्व प्रतिपादन तु चरदशाविषयकमेव । बहुत्व तु श्यादिग्रहापेक्षि । 'भूयांस्तु बहुतरे पु नरर्थे' इति मेदिनीकार । त्रिकोणे पञ्चम—नवमस्थानयोरर्गला, तत्प्रतिबन्धकश्च प्राग्वत् पूर्वसूत्रोक्तवत् स्याताम् । पञ्चमस्थाने शुभाशुभमिश्राणामन्यतमावस्थानेऽर्गला स्याद्, यदि नवमे न्यूनतनिबलत्वदोषानाक्रान्तग्रहावस्थान न स्यादिति तात्पर्यम् । यतो केतुग्रहस्यैतदर्गल प्रतिबन्धकस्थान विपरीत विलोम स्यात् । नवममर्गलास्थान पञ्चम

Sampath kumar Medavarapu

तत्प्रतिबन्धकस्थानमित्यर्थः। एवं दारभाग्यसूत्रेऽपि । अत्र द्रष्टुरग्रतः पृष्ठतो वा यावतिथमर्गलास्थानं तद्वैपरीत्येन तावतिथमेव तदर्गलाप्रतिबन्धकस्थानं भवतीत्यादि निरीक्षणीयम् ॥

अत्रेदमपि पर्यालोचयितव्यम्—अर्गलेति सूत्रणात्कुत्रास्या उपयोग इति विचारे "पत्नी (१) लाभ (२) योर्दिष्ट्या निराभासार्गलया १।३।२२ ॥ शुभार्गले धनसमृद्धिः १।३।२३ ॥" इति सूत्रे दृष्टिपथमवतरतः । इह शुभशब्ददर्शनात् शुभाक्षिप्तेन ग्रहेण अर्गला विशिष्यते, आहोस्वित् प्रतिबन्धकाभाववत्तया शुभेनैव सा विशिष्यत इति भवति भावुकानां संशयावसरः । तत्र च 'भय (२) पुण्य (११) विना (४) भावाद् द्रष्टुराहुः शुभार्गलम् । स्फुट (१२) गो (३) हेय (१०) भावात्तु विपरीतार्गलं विदुः ॥' 'यस्य पापः शुभो वापि ग्रहस्तिष्ठेच्छुभार्गले । तेन द्रष्टेक्षितं लग्नं प्राबल्यायोपकल्प्यते । यदि पश्येद्ग्रहस्तं न विपरीतार्गलस्थितः॥' इति वृद्धश्लोकाभ्यां प्रतिबन्धकस्य सत्त्वासत्त्वाभ्यां यथाक्रममर्गलस्य पापापापत्वे स्पष्टं ज्ञायेते । परं 'सार्गले चापि तत्रापि बह्वर्गलसमागमे । शुभग्रहार्गले तत्र तत्राप्युच्चग्रहार्गले ॥' इति वृद्धश्लोकेन शुभग्रहकर्तृकोऽर्गलः शुभार्गल इत्यपि व्यक्तम् । निराभासार्गलयेति सूत्रे आभास (सृ) शब्दः प्रतिबन्धार्थकः सर्वैरादियत एव तेनार्गलाप्रस्तावेऽवश्यं तत्प्रतिबन्धकाः । अर्गलो हि कारकादिवत्फलप्रयोजकः तत्प्रतिबन्धो हि फलविघटक इति कनककदकायितमनुनेति तत्त्वम् । साभासार्गलो विपरीतार्गलो दुष्टार्गल इत्यादय एकाभिप्रायाः । वैपरीत्यानिराभासार्गलादयः । तथा च निराभासार्गलः शुभार्गल इत्येकाभिप्रायकौ पर्यवसन्नौ । परमियानिह भेदः—पूर्वसूत्रेऽर्गलस्य सर्वथा प्रतिबन्धः, परसूत्रे बह्वर्गलसमवाये एकादिकस्येति विशेषः । अथ दिष्ट्या धनसमृद्धिः, इत्यधिकन्यूनफलनिरूपणं मानम् । अत्रापि 'दिष्ट्याम्ब ते कुक्षिगतः परः पुमान्' इति 'योग्यमृद्धिः सिद्धिलक्ष्म्यौ वृद्धेरप्याह्वया इमे' इति 'ऋद्धिः स्यादोपधीभेदे समृद्धावपि योषिति' इति च शक्तिग्राहकाणि मानम् । अपि च । सूत्रयोरेकभावोन्मुखतायामेवं व्याख्यानं समञ्जसम् । अथवा शुभग्रहकर्तृकार्गलाङ्गीकारेऽपि निर्वाहः । परमिह सौत्रमर्यादया अर्गलेन दृष्टिमाक्षिप्य व्याख्यानं तु सूत्राकुलीकरणमेव । वृद्धवाक्यस्वारस्यादिति चेत्, तदा सूत्रान्तरप्रणयनमेव परिणमतीति वृद्धवाक्येभ्य एव निश्चेयम् ॥

द्रष्टृतः

	अर्गलास्थानानि	तत्प्रतिबन्धकस्थानानि ।	
(१)	४	१०	मिश्रार्गलाः ।
(२)	२	१२	
(३)	११	३	
(४)	३	०	=शुद्धार्गला ।
(५)	५	९	=मिश्रार्गला ।

१, ६, ७, ८=निर्गलानि स्थानानि ।

Sampath kumar Medavarapu

अत्र केचिद् दारसूत्रे शान्त ($\frac{६५}{१२}$=५) पदं रिष्फसूत्रे धातु ($\frac{६९}{१२}$=९) पदं प्रक्षिप्यैकयोगकरणं पूर्वपक्षयित्वा 'विपरीतं केतोः' इति सूत्रस्य त्रिकोण एव प्रवृत्तिं निश्चिन्वन्ति । अन्ये पुनः 'प्राग्वत्त्रिकोणे' इति सूत्रस्य पृथक्करणसामर्थ्यादप्रतिबन्ध्येयमर्गलेति वर्णयन्ति । विपरीतमिति सार्वत्रिकमित्यङ्गीकुर्वन्ति । तदेतद् द्वितीयमपि पूर्वे न सहन्ते युक्तितदाभासैः । इतरे पुनर्मध्येपवादन्यायाश्रयणेन 'न न्यूना विबलाश्च' इति सूत्रप्रवृत्तिं वारयन्तः प्राग्वत्त्रिकोण इत्यस्याप्रतिबन्धकत्वमिच्छन्ति । तदेतत्सर्वं समयान्तरेण ग्रन्थाकुलीकरणम् । यदिहास्माकं वक्तव्यं तत्प्रागुक्तं किमत्र शुष्ककलहेनेति स्वस्थैरालोकनीयम् ॥

अथार्गलाचक्रम् ।



जन्मकुण्डल्यां किल विचार्यां तुलराशेः मकराच्चतुर्थे शुक्रः, द्वितीये सूर्यबुधकेतवः, एकादशे गुरुरस्ति । अथ च तत एव तुलराशेः मकराद्यक्रमेण दशमे ग्रहाभावः, द्वादशे भौमो बाधकत्वेऽस्य सूर्यबुधकेतुभ्यो न्यूनसंख्य, तृतीये शनिर्बाध्यभूतगुरोः देवता दुर्बल इत्यर्गलायाः बाधकाभावात् सकलग्रहार्गलपर्यवसिता जाता । एवं प्रथमद्वितीयतृतीयचतुर्थपञ्चमसप्तमनवमैकादशद्वादशभावेष्वर्गला बोध्याः । सप्तमदशमभावौ निरर्गलाविति विचारणीयम् ।

Sampath kumar Medavarapu

अथ ग्रहार्गलाचक्रम् ।

सू.	चं.	मं.	बु.	बृ.	शु.	श.	रा.	के.
श. मं.	बृ. मं.	श.	श. मं.	मं. सू. बु. के. श.	चं. रा. गु. बु. के.	०	बृ. मं.	बृ.

अथ फलविशेषप्रतिपादकाननित्यकारकान्विवक्षुरादौ तदुपजीव्यभूतमात्मकारकं तदुत्कर्षतां चानुष्टुभाह—

अंशप्रभृतिभिर्ज्यायान्मध्ये गगनचारिणाम् ।
आत्मकारकसंज्ञः स्यात्स ईष्टे बन्धमोक्षयोः ॥ ९ ॥

अंशप्रभृतिभिरिति—ज्यायान् ज्येष्ठः अंशादिविकलान्तावयवेनाधिक इति यावत् । अत्र विशेषस्तत्तत्सूत्रार्थान्तःपाती द्रष्टव्यः ॥ ८ ॥

आत्माधिकः कलादिभिर्नभोगः सतानामष्टानां वा ॥ १।
१।११ ॥ स ईष्टे बन्धमोक्षयोः ॥ १।१।१२ ॥

रव्यादीनां शन्यन्तानां सप्तानां, राह्वन्तानामष्टानां वा मध्ये यो नभोगः खेटः कलादिभिः, कलाया आदयोंऽशास्तैरधिकः स आत्मा । आत्मकारक इत्यर्थः । अथवा 'व्याख्यानतो विशेषप्रतिपत्तिर्नहि संदेहादलक्षणम्' इति न्यायेन कलाशब्द एवांशवचनः । अन्यग्रह इव राहुर्मेषादिक्रमगणनयाऽधिकांशः कारको न भवति । मीनादिविपरीतगणनया तु भवत्येव । अयमर्थः—विपरीतगणनाया व्यवहाराभावाद् गणितागतो राहुः क्रमगणनार्थं सौरशास्त्रादौ चक्रशुद्धः क्रियते । ततोऽयं विशेषः । स आत्मकारको बन्धमोक्षयो., बन्धो दु.खविशेषः, मोक्षः सुखविशेषः, तत्र ईष्टे समर्थो भवति । सुखदुःखदानाय समर्थः स्यादित्यर्थः । तथा चोक्तं केशवेन—'नीचारिक्रूरसंबन्धाद् बन्धकृत्स्वदशाश्रयम् । सुहृत्स्वाम्योच्चसंबन्धाद् बन्धानां मोक्षकारकः ॥' इति ।

अत्रेदमालोचनीयम्—शन्यन्ताः सप्त, राह्वन्ता अष्ट खेटाः कारकत्वमाजो भवन्ति । राहुकेत्वोरेकत्वेनैव गणना । कारकत्वसंपादने ताजिकीयसुथशीलप्रभृताविवांशादिविकलान्तावयवानामेव विवक्षणाद्, इतरत्र भगणस्यैवेह राशेरनङ्गीकरणात्, तयोरंशादिशरीरत्वात् । तत्र सूर्यादितत्पुनान्ताः सप्तैव खेटाः पराहमिहिरादिकेरावान्तपौरुषकृतिषु व्यवह्रियन्ते । यत्तु क्वचित्तमोग्रहस्य संग्रहः स तावत्साहितिक इति संभावयामः । तत एव 'मय-यवन मणित्य शक्तिपूर्वैः'—इत्यादिपूर्वानुसृतनिबन्धप्रणयनशैली प्रदर्शयद्भिराचार्यचरणैः स्वजातके यद्राहुकेत्वोर्नामानि परिगा-

Sampath Kumar Medavarapu

व्यापि व्यवहाराभावोऽवगेधि, तेन तदुपजीव्यानां मयादीनां जातकेष्वपि तयोस्तथा-
विधता परिणमतीत्यादि भृशं विचारणीयम् । इत्थं क्वचन सप्त, क्वचन नव ग्रहानाश्रि-
त्य व्यवहृता । तत्र सप्तखेटवादे केशवादिमते सूत्रेष्वष्टानां कारकाणामुपलम्भात्
'मात्रा सह पुत्रमेके समामनन्ति ॥ १।१।२०॥' इति रीत्या मातरि पुत्रान्तर्भावेन
योजना । मतान्तरे तु पितृकारकाभावेन यथासंख्य योजना । नवखेटवादे तु केशवा-
दिमते यथासंख्यमेव योजना । मतान्तरे तु 'तस्य दाराश्च ॥ १।१।१९॥' इति चका-
रानुष्टेन कारकान्तरेण निर्वाह इति विवेकः । द्विनटीकानां भिन्नमातृकेषु पद्यपुस्तकेषु
पितृकारकादर्शनेनेत्थं वक्रमार्गानुसरणम्, अन्यथा सुखेनैव योजनेति निष्कण्टक
पन्थाः । मुनीन्द्रस्तु नवखेटवादमनुगृह्णाति । यतस्तत्र राहुकेतू व्यवहरति । एतेन
पितृकारकापेक्षी सूत्रग्रन्थः'—अष्टानां वा' इति विकल्पकोटिषु तदानीं जातकस्कन्धे
नवखेटवादस्य नूतनता प्रचारप्राचुर्याभावं वा प्रकाशयतीति संक्षेपः ।

अथावशिष्टानित्यकारकाननुष्टुब्भ्यामाह—

ततोऽमात्यभ्रातृमातृपुत्रज्ञातिस्त्रियो मताः ।
क्रमेणोनांशका मातर्यात्मजो योज्यते परैः ॥ ८ ॥
किं वाऽमात्यभ्रातृमातृपितृपुत्रस्वदारकाः ।
क्रमान्न्यूनांशका मातृपुत्रैक्यं कैश्चिदिष्यते ॥ १० ॥

ततः इति—आत्मकारकः पूर्वोक्तः, अमात्यः, भ्राता, माता, पिता, पुत्रः, स्वो
ज्ञातिः, दारा स्त्री, इत्यष्टौ कारका यथाक्रममुत्तरोत्तरं न्यूनांशा भवन्ति । तत्र मातृ-
पुत्रैक्यमपरैरिष्यते । अथ कारकाणामुद्देशः केशवानुसारी । तथा च तद्वाक्यम्—
'आत्मकारकतो न्यूनोऽमात्यसंज्ञो लवादिकैः । ततो भ्रातुस्ततो मातुस्ततस्तस्य का-
रकः ॥ ततः सूनोस्ततो ज्ञातेस्तस्मात्पत्न्याश्च कारकः । स्यान्मातृसुतयोरेके कारकैक्यं
वदन्ति हि' ॥ ९—१० ॥

तस्यानुसरणादमात्यः ॥ १।१।१३ ॥ तस्य भ्राता ॥ १।१।१४ ॥ तस्य माता ॥ १।
१।१५ ॥ तस्य पिता ॥ १।१।१६ ॥ तस्य पुत्रः ॥ १।१।१७ ॥ तस्य ज्ञातिः ॥ १।१।
१८ ॥ तस्य दाराश्च ॥ १।१।१९ ॥ मात्रा सह पुत्रमेके समामनन्ति ॥ १।१।२० ॥

तस्य आत्मकारकस्य अनुसरणात् पश्चाद्गमनात् आत्मकारकापेक्षया न्यूनभागत-
यावस्थानाद् अमात्योऽमात्यकारकः स्यात् । एवमेव सूत्रपाठक्रमेण भ्रात्रादिदारान्ता
षट् कारका यथोत्तरं न्यूनभागा भवन्तीति समुदितार्थः । अत्र द्वयोरंशादिना साम्ये
एकस्य बलवत्तया कारकत्वं परस्य नान्यकारकत्वमपि । एवं चैकस्य द्वयोर्बहूनामकार-
कत्वे सप्तानामष्टानामित्युभयैकद्वित्र्यादयः कारका लुप्यन्त एवेति कतिपये । बलवत्त्वे-
नैवैकस्य कारकत्वाङ्गीकारेऽवशिष्टस्यानुसरणवद् गुणभावे सिद्धेऽन्यकारकतायां को दोष
इत्यपरे । अनुसरणं हि प्रधानभावत्यागः । अत्र दारकारकप्रतिपादकसूत्रगतचकारोऽनुक्त-
समुच्चयार्थक आस्ताम् । परं पाणिनितन्त्र इव सर्वत्र सूत्राक्षरवर्णनासम्भवेन षड्दर्श-

Sampath kumar Medavarapu

न्यामिवेहापि यथासंभवं योजना न्याय्या। अत एव मतिमान्द्याद्वा पूर्वपक्षमुद्भाव्य सूत्रन्यासार्थमस्माभिरुदासीति विभावनीयं विवेकिभिः। मातृपुत्रकारकयोरैक्यमेके वाञ्छन्ति। तेषां मते पुत्रकारकाभावान्मातृकारकात्तद्विचारः स्यादित्यर्थः॥

अथ पादोनार्याद्वितयेन नित्यकारकॉश्चरमचरणेनार्गलाद्युपयुक्तनैसर्गिकबलं चाह—

भगिनीजननीश्यालानुजाः कुजान्मातृसंनिभादिबुधात्।
पितृजनको वागीशात् पत्नी पितरौ पतिः श्वशुरौ॥ ११॥
मातामहाश्च शुक्रात् पुत्रा मन्दाद्विचारमर्हन्ति।
इति नित्यकारकौघो मन्दो ज्यायान्ग्रहेषु मतः॥ १२॥

भगिनीति—भगिनीमातुर्मातृसहोदर्या मातुलस्य च कन्या, जननी माता, श्यालः पत्नीभ्राता, अनुजः कनिष्ठो भ्राता। एते खलु कुजाद् विचारमर्हन्ति। एतेषां शुभाशुभविचारो भौमेन कर्तव्य इत्यर्थः। मातृसंनिभा मातृसदृशाः। आदिना मातुलादयो यथासंभवं विज्ञेयाः। पितृजनकः पितामहः माता च पिता च पितरौ; मातापितरावित्यर्थः। श्वश्रूश्च श्वशुरश्च श्वशुरौ; श्वश्रूश्वशुरावित्यर्थः। उभयत्रैकशेषः। ग्रहेषु मन्दः शनिः ज्यायान् अतिवृद्धः; दुर्बल इति यावत्। 'वर्षीयान् दशमी ज्यायान्' इत्यभिधानात्। एवं सूर्यादिषु यथोत्तरं दुर्बला भवन्तीत्युक्ते भवति। यथा पूर्वमीमांसायां श्रुतिलिङ्गादिसमवाये पारदौर्बल्यम्। लोकेऽपि बलाबलविचारणायां वर्षीयान् दुर्बलो मन्यते। अत्र बहुभिः 'श-कु-बु-गु-शु-च-राद्या वृद्धितो वीर्यवन्तः' इति मिहिरोक्तो बलक्रमः प्रादर्शि। शेषं स्पष्टम्॥

अत्र यत्र तत्र व्याख्यातृभिर्होरास्कन्धीया बहवो विशेषा लिखिताः; ते प्रायो बृहज्जातक—पाराशरीयहोराभ्यां नातिरिच्यन्ते। तत्र बृहज्जातकस्यादितोऽध्यायद्वयी परिभाषारूपैव। वृद्ध्यादिसंज्ञाज्ञानमन्तरा व्याकरण इव, यामन्तरेण होरास्कन्धे व्युत्पित्सुः पदमपि निधातुं न क्षमते; किमुतोत्सर्गापवादप्रभृतिमीमांसाजालजटिलासु शास्त्रीयासु प्रमेयसरणिषु सञ्चरितुम्। एवं विशेषाभिधित्सया प्रवर्तमानेऽमुष्मिञ्छास्त्रे प्रवेशकृते यावज्जातकज्ञानमावश्यकं तावदन्यतो ग्राह्यं, न तत्साकल्येन लिखितुमायातीति विरम्यते। पाराशरं होराशास्त्रं तु सांप्रतमत्यन्तं दुर्व्यवस्थितं दृष्टिपथमवतरति। पौर्वापर्यपर्यालोचनया प्रबन्धान्तरसंवादगवेषणया च तत्रत्यो भूयाँल्लेशोऽनार्षशङ्कां समाधिकोटिं गमयति। यद्यपि संहितास्कन्धनिक्षिप्तश्रौतस्मार्तमुहूर्तभार इवायं होरिको विषयो नैकान्ततो मूलवचनापेक्षी; प्रत्युतार्षः पौरुषो वा दृष्टप्रत्ययतयैव प्रेक्षावतामपेक्षागोचरः; तथापि ग्रन्थेषु नूत्नेषु च वाक्यजालेषु फलसंवादतारतम्यभावबुभुत्सया भवति भावुकानां मूलतत्त्वावगाहिनी मनीषा। अस्मत्सोदन सातांर्थजातमवगत्य प्रतन्यमानेषु धर्मशास्त्रनिबन्धेष्विव अत्रापि दुराग्रहमहानिष्टानां दुष्कल्पनाजल्पजालेन पराक्रान्ता। धर्मव्यवस्थेव दुरवस्थामापन्ना फलितावस्था। सूक्ष्मतरतमयन्त्रवेधैर्विदुषामनुभवैः प्रतिपाद्यमानो गणितस्कन्ध इवायं फलितक्रमोऽपि महानु-

Sampath kumar Medavarapu

भवैकसाध्य इत्यतिरोहितं निर्णायकानाम्। एवं च प्राचामर्वाचा च सूक्तिदर्पणेषु सङ्क्रान्तानि दुरुक्तिमलान्यपोह्यापोह्य, पारमार्थिक वस्तु समवलोक्य समवलोक्य, समवधानपुरस्सर फलमादेष्टव्यम्। न पुनर्मनसापीदानींतनाना दैवज्ञहतकानामभिसधानसरणी शरणीकरणीया फलितनिधिकामुकै॰ ॥ ११।१२ ॥

भगिन्यारतः श्याल॰ कनीयाञ्जननी च ॥ १।१।२१ ॥
मातुलादयो बन्धवो मातृसजातीया इत्युत्तरतः ॥ १।१।२२ ॥
पितामहपतिपुत्राविति गुरुमुखादेव जानीयात् ॥ १।१।२३ ॥
पत्नी पितरौ श्वशुरौ मातामहा इत्यन्तेवासिनः ॥ १।१।२४ ॥
मन्दो ज्यायान् ग्रहेषु ॥ १।१।२५ ॥

आरतो भौमाद् भगिन्यादयो विचार्या। उत्तरतो भौमाग्रे वर्तमानाद् बुधाद् मातुलप्रभृतयो विचार्याः। गुरुमुखाद् बृहस्पत्यादे—पितामह, पति, पुत्र इति यथाक्रम जानीयाद् विचारयेत्। अयमर्थ —गुरुत॰ पितामहम्, शुक्रत पतिं स्वामिनम्, शनित॰, पुत्रं विचारयेदिति। पत्नीप्रभृतय, अन्ते प्राक्पठितस्य गुरोरग्रे वसति, वारक्रमेण तिष्ठतीति अन्तेवासी शुक्रस्तस्माद्विचारणीया। ग्रहेषु वारक्रमेण सप्तासु रव्यादिशन्यन्तेषु मन्द शनिर्ज्यायान् दुर्बल इति प्रतिपादितं प्राक्। वारक्रमयुक्तिस्तु 'मन्दादधः क्रमेण स्युश्चतुर्था दिवसाधिपा' इति सौरोक्तैव। राहुकेत्वोर्ग्रहत्वेन व्यवहारेऽभीष्टेऽपि बलविधायकशास्त्रापर्याप्ततयानुक्तेस्त। तत एव पड्वर्गचिन्तायामचिन्त्यतानयोरित्यपि व्यक्तम्। तत्र रव्यादिवद्बिम्बाभावोऽनयोरधिकाराभावप्रयोजक इत्यपि हेतुमुपन्यस्यन्ति केचित्। आस्ता राहुकेत्वोस्तादृशबिम्बाभावत्वेनाधिकाराभाव॰। सप्तात ग्रहत्वेन निर्णीतस्येन्द्रादे कस्यात्राधिकारचिन्ता। बिम्बवत्वे सति पूर्वगतिप्रकृतिकस्य ग्रहत्वस्योभयत्र साम्यात्। सत्यम्। संहिताक्रोडपातिनि श्रौतस्मार्तक्रियाकलापे पौरुषशासनस्यानादरादित्यभ्युपेयम्। स्मर्यते हि—

'अतीन्द्रियार्थविज्ञाने प्रमाणं श्रुतिरेव हि।
श्रुतिर्यत्र प्रमाणं स्याद्युक्तिः का तत्र नारद ॥'

इत्यादि ॥

अथ सप्तानां कारकाणां चक्रम्।

आत्मा सूर्य	अमात्य बुध	भ्राता शनि	माता मङ्गल	पुत्र चन्द्र	ज्ञाति॰ गुरु	दारा शुक्र

अथाष्टानां कारकाणां वा चक्रम्।

आत्मा सूर्य	अमात्य बुध	भ्राता शनि	माता मङ्गल	पिता चन्द्र	पुत्र॰ गुरु	ज्ञाति राहु	दारा शुक्र

Sampath kumar Medavarapu

अथ वक्ष्यमाणचरदशागणनां द्रुतविलम्बितेनाह—

भवति भत्रितयेन भमण्डले
पदचतुष्टयमोजपदे क्रमात् ।
समपदे तु विलोमत इष्यते
चरदशानयने गणनाविधिः ॥ १३ ॥

भवतीति—भमण्डलं राशिवलयम् । तदेतत्समं द्वादशधाविभक्तं किल । तत्र मेषादिमारभ्य भत्रितयेन राशित्रयेण पदं भवति । तच्चतुःसंख्याकम् । एतदुक्तं भवति—मेषवृषमिथुनैः प्रथममोजपदम्, कर्कसिंहकन्याभिर्द्वितीयं समपदम्, तुलावृश्चिकधनुर्भिस्तृतीयमोजपदम्, मकरकुम्भमीनैश्चतुर्थं समपदम्, एवं चौजपदे क्रमाद् अनुलोमात्, समपदे विलोमाद् गणना क्रियते खलु चरदशानयने । तदेतत्सर्वमुदाहरणावसरे स्पष्टं भविष्यति ॥ १३ ॥

अथ वृद्धवाक्यबलेन राशिस्वाम्ये विशेषं द्रुतविलम्बितेनाह—

अवनिसूनुकबन्धनभश्चरौ
निगदिताविह वृश्चिकनायकौ ।
शनि-शिरोद्युचरौ कलशेश्वरा-
वितरनाथकथा तु यथा तथा ॥ १४ ॥

अवनीति—अवनिसूनुर्भौमः । कबन्धनभश्चरः केतुः । देवासुरसमवायेऽमृतपरिवेषणसमये भगवॉश्चक्रपाणिश्चक्रेण कस्यचिदसुरस्य शिरश्चिच्छेद । तत्र शिरोभागो राहुः, कबन्धभागः केतुरिति पौराणिकाः । तथा च कबन्धश्चासौ नभश्चरश्चेति कबन्धनभश्चरः । एषोऽसुर एव । संहितायां तु—'शतमेकाधिकमेके सहस्रमपरे वदन्ति केतूनाम् । बहुरूपमेकमेव प्राह मुनिर्नारदः केतुम् ॥' इति विशेषः । ताविह वृश्चिकस्वामिनौ स्मृतौ । शनिः, शिरोद्युचरो राहुः । पूर्ववत्समासः । एतौ कुम्भस्वामिनौ । तथा च वृद्धः—'कुजसौरी केतुराहू राजानावलिकुम्भयोः' इति । राहोर्महत्ता संहितायामेवमाम्नाता—'अमृतास्वादविशेषाच्छिन्नमपि शिरः किलासुरस्येदम् । प्राणैरपरित्यक्तं ग्रहतां यातं वदन्त्येके ॥' ग्रहोत्पत्तौ भगवान् गर्गस्तु—'राहुः स्वर्भानुपुत्रः स्यात्पुत्रः केतुर्विभावसोः । मनसा ब्रह्मणा स्यातावुभौ सोमदिवाकरौ ॥' इत्याह स्म । इतरेषां नाथानां कथा तु यथा बृहज्जातकादिग्रन्थे तथैवात्रापि बोध्या । प्रश्नभैरवे तु—'अङ्गीकृतं सौम्यगृहं सुहृद्वारकन्याह्वयं तच्च विधुन्तुदेन । तत्सप्तमं वा शिखिना गृहीतं गृहं तु तन्मीनगृहाभिधानम् ॥' इति मैत्रीप्रतिपादनपूर्वकं राहोः कन्या, केतोर्मीनः क्षेत्रमाख्यायते । तत्र मित्रविषये सर्वार्थचिन्तामणौ—'राहोस्तु मित्राणि कवीज्यमन्दाः, केतोस्तथैवात्र वदन्ति तज्ज्ञाः ॥' इत्यनेन तयोः समानमित्रता निरूपिता । ततोऽयं मतभेदः—वृद्धवाक्ये वृश्चिकक्षेत्रे कुजकेत्वोः, कुम्भभवने शनिराह्वोः स्वाम्यम् । प्रश्नभैरवे तु राहोः कन्यायां केतोर्मीने स्वाम्यम् । तत्पूर्वत्र चक्राद्धिव्यवहितं, परन

Sampath kumar Medavarapu

पद्राशिव्यवहितम्, उभयत्रापि व्यासज्यवृत्तिक भवति। भैरवे स्वाम्यघटकतया सुहृत्त्वं हेतुरुपात्त, चिन्तामणौ तु न कोऽपि। भैरवे राहुकेत्वो: सुहृदौ बुधगुरू, चिन्तामणौ तु बुधमुपेक्ष्य शुक्रोऽपीति। अपि च **प्रश्नभैरवे**—'स्वातिसिंहिकाया-स्तनयस्य तुङ्गं नृयुगमसङ्ग बुधदैवत च। पुच्छस्य केतोर्गदित च तुङ्ग तत्कार्मुकाख्यं गुरुदैवत च॥' इति तयोस्तुङ्गे उक्ते। ते चरदशासाधने सम्प्रति कैश्चिदपि नाद्रियेते। वृहज्जातकोक्तान्येव तुङ्गान्युपादाय दशा प्रवर्त्यते। तुङ्गसापेक्षं वृद्धवाक्य यथा—'उच्चखेटस्य सद्भावे वर्षमेक विनिक्षिपेत्। तथैव नीचखेटस्य वर्षमेक विशोधयेत्॥' इत्थ च वर्तमानरीतिप्रतिकूलवाक्यान्तरलाभे ह्युपादेयतायां सशयावतरणमिति मूलान्वेषणे ज्यायसी विप्रविपत्तिकोटि:। अत एव मतिकर्दमगेहुरे मतान्तरतिमिराच्छन्ने वर्त्मनि परम्परया वृद्धपृष्ठानुसरणमेव शरण मन्यामहे। तथा चोक्तमाचार्यचरणै—"ज्यौतिषमागमशास्त्र विप्रतिपत्तौ न योग्यमस्माकम्। स्वयमेव विकल्पयितुं, किंतु बहूना मत वक्ष्ये" ॥ १४ ॥

अथ चरदशावर्षसख्या सविशेषा द्रुतविलम्बितेनाह—

भवति लग्नमुखादिह राशित-
स्तदधिपावधिकाऽब्दमितिर्दशा।
स्वगृहगेऽधिपतौ तु विलोचना-
मृतमयूखसमा हि समा मता ॥ १५ ॥

भवतीति—इह जातकविषये लग्नमुखाद् राशितो लग्नद्वितीयादित. सकाशात् तदधिपावधिका तन्नाथावसानिका अब्दमितिर्वर्षसख्या दशा चरदशा भवति। चलनाख्या। तथा च वृद्धवाक्यम्—"तस्मात्तदीशपर्यन्त सख्यामब्द दशा विदु। वर्षद्वादशक तत्र, न चेदेक विनिर्दिशेत्॥" अयमाशय.—कस्माच्चिद्राशे सकाशात्तत्स्वाम्यधिष्ठितराशिपर्यन्तमेकादिगतराशिगणनया क्रमोत्क्रमाभ्या यावती सख्या लभ्यते, तत्प्रमाणानि दशावर्षाणि। एवं द्वादशे स्वामिनि एकादशवर्षाणि। तत्र स्वराशौ स्वामिनि तु द्वादश दशावर्षाणि। 'न चेदेक विनिर्दिशेत्' इति पूर्वानुवाद:। चेद् राशिस्वामी तत्र राशौ न स्यात्तर्हि एकादिक पूर्ववद् दशावर्षमिति तदर्थ:। विशेषस्तूदाहरणावसरे ॥ १५ ॥

प्राची वृत्तिर्विषममेषु ॥ १।१।२६ ॥ परावृत्त्योत्तरेषु ॥ १।१।२७ ॥ न क्वचित् ॥ १।१।२८ ॥ नाथान्ताः समाः प्रायेण ॥ १।१।२९ ॥

चरदशावर्षानयने विषममेषु मेषमिथुनसिंहतुलाधनु कुम्भेषु, प्राची वृत्ति प्रागावर्तनमनुलोमगणना स्यादित्युत्सर्ग। उत्तरेषु विषमराश्यपेक्षया पुरो वर्तमानेषु समभेषु वृषकर्ककन्यावृश्चिकमकरमीनेषु, परावृत्ति. परावर्तन, तया परावृत्त्या प्राची वृत्तिवैपरीत्येन, गणना विलोमगणना स्यादित्युत्सर्ग। विषमराशिषु क्वचिदनुलोमगणना न स्यात्। समराशिषु क्वचिद् विलोमगणना न स्यादित्यपवाद। क्वेति सदेहस्युदासार्थं

Sampath kumar Medavarapu

'पदक्रमात् प्राक्प्रत्यक्त्वं चरदशायाम्' इति सूत्राद्वेदितेन क्रमाद् वृषे वृश्चिके च व्युत्क्रमाद् कुम्भसिंहयोः इति वृद्धवचनेनायमर्थः । सिध्यति—



तथा च वृद्धाः—समाः तत्तद्राशीनामब्दाः नाथान्ताः । नाथः अन्तो यासामिति सर्वादिवत्तद्गुणसंविज्ञानो बहुव्रीहिः । तत्तद्राशेः सकाशादतीतक्रमेण तत्तद्राशिनाथाश्रितराशिपर्यन्ता अब्दा ग्राह्याः । एवं च नाथे द्वितीये एकोऽब्दः, तृतीये द्वावब्दौ, इति क्रमेण द्वादशे एकादश अब्दाः । प्रायेणेति पदेन नाथे स्वराशौ स्थिते द्वादशाब्दाः, वृश्चिककुम्भयोर्द्विनाथत्वम्, उच्चनीचलाभ्यामेकैकाब्दवृद्धिह्रासौ चेति सूच्यते । तथा च वृद्धवाक्यान्यग्रेोक्तानि । वस्तुतस्तु द्विनाथत्वं वृद्धिह्रासश्चेति सूत्रतो न लभ्यते ।

अथ द्रुतविलम्बितेन विशेषमाह—

अधिपतिर्यदि उच्चगनीचगो
हसति वर्धत एकसमा तदा ।
इति च वृद्धनिरूपितकारिका-
कलनतः कलयन्ति विचक्षणाः ॥ १६ ॥

अधीति स्पष्टम् ॥ १६ ॥

अथ द्विस्वामिकराश्योर्निर्णयं श्लोकषट्केन संगृह्णाति—

द्विनाथक्षेत्रयोरत्र क्रियते बलनिर्णयः ।
एकः स्वक्षेत्रगोऽन्यस्तु परत्र यदि तिष्ठति ॥ १७ ॥
तदान्यत्रस्थितं नाथं परिगृह्य दशां नयेत् ।
नाथौ स्वक्षेत्रगावेव दद्यातां द्वादशाब्दकान् ॥ १८ ॥
स्वाम्यं स्वीक्रियते यस्मात्तयोर्व्यासज्यवृत्तिकम् ।
द्वावप्यन्यर्क्षगौ तौ चेत्तत्र ग्रहो बलवान्भवेत् ॥ १९ ॥

Sampath kumar Medavarapu

ग्रहयोगस्य सत्वेऽपि बलवान्बहुयोगवान् ।
पञ्चमस्थागते साम्ये विद्याद्राशिवशाद्बलम् ॥ २० ॥
चरस्थिरद्विस्वभावा राशयो बलिनः क्रमात् ।
राशिवीर्यसमत्वे तु बहुवर्षप्रदो बली ॥ २१ ॥
एकः स्वोच्चगतोऽन्यस्तु परत्र यदि वर्तते ।
तदा तूच्चगतो ग्राह्यो न चान्यो बलवानपि ॥ २२ ॥

द्विनाथक्षेत्रयोरित्यादि—यस्मात्तयोर्व्यासज्यवृत्तिक साम्य स्वीक्रियते वृद्धै, न तु प्रत्येक पर्याप्तम् । वस्तुतस्तु नाय बलक्रम सूत्रमर्यादया व्यवस्थापयितु योग्य इति सूक्ष्मदृशा निरीक्षणीयम् ॥ १७–२२ ॥

अथ वृद्धमतमुपसहरंश्चरदशारम्भस्थान तल्लेखनक्रम तदन्तर्दशाप्रमाण केतो शुभत्व च सुन्दरीभ्यामाह—

इति वृद्धकृतं बलक्रमं
परिभाव्य प्रथयेज्जगद्दशाम् ।
गणना विदधीत लग्नतो
नवमर्क्षस्य पदक्रमादिह ॥ २३ ॥
प्रतिराशि दशामितेरितां
शक एककभभोगकल्पना ।
गणना तु यथानिरूपण
क्रमणा केतुरमुत्र शोभन- ॥ २४ ॥

इतीत्यादि—जगद्दशा चरदशा प्रथयेत् व्युत्पादयेत् । इह चरदशाया लग्नतो जन्मलग्नात् नवमर्क्षस्य नवमराशेः पदक्रमात् 'ओजपदे क्रमात् समपदे तु विलोमत –' इति प्रागुक्तप्रकारेण गणना विदधीत कुर्वीत । प्रतिराशि लग्नादिप्रत्येकराशिमध्ये दशा- शरन्मितेर्द्वादशभागा एकैकराशिभोग- स्यात् । प्रतिराशि तद्दशाद्वादशाश प्रत्येक- राशिभोग इति सर्वेषा समानो भोग केवल भोक्तरि व्यत्यास इति तत्त्वम् । अत्र चर- दशाया केतु शुभ ॥ २३–२४ ॥

पञ्चमे पदक्रमात्प्राक् प्रत्यक्त्वं चरदशायाम् ।२।३।३० ॥ अत्र शुभः केतुः ।२।३।३१ ॥ यावच्छिवेकमावृत्तिर्भानाम् ।१।१।३५ ॥

चरदशाया पवमे (=⁵⁄₁⁄₂=९) लग्नान्नवमे पदक्रमाद् विषमसमपदक्रमात् प्राक् प्रत्यक्त्वमनुलोमविलोमगणना स्यात् ॥ अत्र चरदशाया केतु शुभ ॥ भानां राशीना यावच्छिवेक (=१४४) यावच्चतुश्चत्वारिंशदधिकशतसख्या तावदावृत्तिर्भवति । याव- दवधारण इत्यव्ययीभाव ।एतदुक्त भवति—लग्नादिकस्य राशेर्यावती चरादिदशा साधिता तस्या द्वादशाशप्रमाणेनैकैकराशिभोगा सभूय द्वादशराशीनामन्तर्भोगाश्चतु- श्चत्वारिंशदधिकशतभागा स्यु- ॥ अथ चरदशोदाहरण—'भवति छमुखादिह

राशितस्तदधिपावधिकाऽब्दमितिर्दशा' इति सूत्रेण चरदशावर्षाणि साध्यन्ते तद्यथा—लग्नं मिथुनराशिस्तदधिपो बुधो वृश्चिकेऽस्ति, तेन गतराशिगणनया मिथुनस्य पञ्च वर्षाणि । कर्कस्वामी चन्द्रो वृषेऽस्ति, तेन कर्कस्य द्वे वर्षे । सिंहस्वामी सूर्यो वृश्चिकेऽस्ति, तेन सिंहस्य नव वर्षाणि । एवमग्रेऽपि । वृश्चिककुम्भयोस्तु 'अवनिसुनुक-बन्धनभश्वरौ' इत्यादिना द्विनाथत्वं भवति, तेन 'द्विनाथक्षेत्रयोरत्र'—इति प्रघट्टकेन । तयोर्दश वर्षाणि । तद्यथा वृश्चिकस्य स्वामिनौ कुजकेतू भवतः । तत्र केतुर्वृश्चिके एवास्ति कुजस्तु वृश्चिकादेकादशेऽस्ति तदा 'एकः स्वक्षेत्रगोऽन्यस्तु' इत्यनेन वृश्चिकस्य भौमावधिगणनया दशवर्षाणि सिध्यन्ति । कुम्भस्य स्वामिनौ शनिराहू । तत्र कुम्भ-स्वामी राहुर्वृषे शनिर्धनुषि तिष्ठति, तदा 'द्वावप्यन्यर्क्षगौ तौ चेत्सग्रहो बलवान् भवेत्' इति राहोः सग्रहत्वाद् राहुपर्यन्तगणनया कुम्भस्य नव वर्षाणि ज्ञेयानि । एवमव-शिष्टानामपि राशीनां दशावर्षाणि । तत्र दशालेखनक्रमः—'गणना विदधीत लग्नतो नवमर्क्षस्य पदक्रमादिह' इत्यनेन बोध्यः । तथाहि—जन्मलग्नकुण्डल्यां लग्नान्नवमे कुम्भो वर्तते स च समपदीयस्तेन विलोमगणना ज्ञेया । सा चैवम्—प्रथमं लग्नस्य मिथुनस्य, ततो द्वादशस्थस्य वृषस्य, तत एकादशस्थस्य मेषस्य । एवमग्रेऽपि वैपरी-त्येन लिपिः ।

अथ चरदशा ।

मि.	वृषः	मे.	मी.	कुं.	म.	ध.	वृश्चि.	तु.	कन्या	सिं.	कर्कः	योगः
५	८	५	७	९	९	८	१०	३	१०	९	२	७७
१९२९	१९३४	१९४२	१९४७	१९५४	१९६३	१९६४	१९७२	१९८२	१९८५	१९९५	२००४	२००६
७ २९ ५१ २४	७ २९ ५१ २४								.		७ २९ ५१ २४	७ २९ ५१ २४

अत्र चरदशायामन्तराणि साध्यानि । तत्र 'प्रतिराशिदशामिते' इत्यनेन सर्वराशी-नामन्तर्भोगकालस्तुल्य एव सिध्यति । केवलं गणनानुरोधेन राशीनां भोगमात्रप्रयुक्तं वैलक्षण्यम् । लेखनक्रमस्त्वन्तर्दशाविषयीभूततत्तद्दाशितो नवमर्क्षस्य विषमसमपद-क्रमेण क्रमोत्क्रमगणनानुरुद्ध एवेति वर्तमाना रीतिः ।

अथ चरान्तर्दशारम्भक्रमभेदानुपजातिभ्यामाह—

Sampath kumar Medavarapu

लग्नास्तयोर्यद् बलवद्भमस्माज्जगद्दशापाकमुशन्ति सन्तः।
लग्ने चरर्क्षे विषमेऽनुलोमात्समे विलोमात्स्थिरभे तु षष्ठात् ॥ २५॥
तथा द्विदेहे विषमे क्रमेण लग्नात्सुताद्भाग्यत एव पाकः।
समे विलोमेन तनोः सकाशाद्भाग्यात्मजान्तो गणनाक्रमोऽयम्॥२६॥

लग्नास्तयोरित्यादि—लग्नसप्तमयोर्मध्ये बलवतश्चरान्तर्दशा प्रारम्भणीया। अत्र लग्नेनाद्यदशाश्रयीभूतो राशिर्गृह्यते। तादृशे लग्ने चरे सति विषमभेऽनुलोमात् समभे विलोमाद् गणना। लग्ने स्थिरे सति विषमसमराशिभेदात् क्रमोत्क्रमाभ्यां षष्ठषष्ठराशितो गणना। तथा लग्ने द्विस्वभावे सति विषमभे लग्नपञ्चमनवमेभ्यः समभे तु लग्ननवमपञ्चमेभ्यो गणना। अयमाशय —चरे मेषतुला वा बलवती ततः क्रमेणान्तर्दशा; कर्को मकरो वा बलवांस्तत उत्क्रमेणान्तर्दशा.। स्थिरे वृषतुलामीनसिंहमकरमिथुनवृश्चिकमेषकन्याकुम्भकर्कधनूषीति षष्ठषष्ठराशीनां क्रमः। अत्र सिंहः कुम्भो वा बलवांस्ततः क्रमेणान्तर्दशा.। वृषो वृश्चिको वा तत उत्क्रमेणेति द्विस्वभावे मिथुनश्चेद्बलवान्, मिथुनकन्याधनुर्मीनानां तुलामकरमेषकर्काणां कुम्भवृषसिंहवृश्चिकानां चान्तर्दशाः। कन्या चेद् बलवती, कन्यामिथुनमीनधनुषां वृषकुम्भवृश्चिकसिंहानां मकरतुलाकर्कमेषाणां चान्तर्दशा.। धनुश्चेद्बलवद्, धनुर्मीनमिथुनकन्यानां मेषकर्कतुलामकराणां सिंहवृश्चिककुम्भवृषाणां चान्तर्दशा.। मीनश्चेद्बलवान्, मीनधनु.कन्यामिथुनानां वृश्चिकसिंहवृषकुम्भानां कर्कमेषमकरतुलानां च यथासूत्रं परिगणितानामन्तर्दशा विलेख्याः। एवं वक्ष्यमाणयो. स्थिरत्रिकोणदशयोरप्यन्तर्दशा गणनीयाः॥ अत्र वृद्धाः—

चरेऽनुज्झितमार्गः स्यात्षष्ठषष्ठादिकाः स्थिरे।
उभये कण्टकाज्ज्ञेया लग्नपञ्चमभाग्यतः॥
चरस्थिरद्विस्वभावेष्वोजेषु प्राक्क्रमो मतः।
तेष्वेव त्रिषु युग्मेषु ग्राह्यं व्युत्क्रमतो खिलम्॥
एवमालिखितो राशिः पाकराशिरुदीर्यते।
स एव भोगराशिश्च पर्याये प्रथमे स्मृतः॥
लग्नाद् यावतिथः पाकः पर्याये यत्र दृश्यते।
तस्मात्तावतिथो भोगः पर्याये तत्र गृह्यताम्॥
तदिदं चरपर्यायस्थिरपर्याययोर्द्वयोः।
त्रिकोणाख्यदशायां च पाकभोगप्रकल्पनम्॥
पाके भोगे च पापाढ्ये देहपीडा मनोव्यथा, इति।

पितृलाभप्राणितोऽयम्॥ २।८।७॥ प्रथमे प्राक्प्रत्यक्त्वम्॥ २।८।८॥
द्वितीये रवितः॥ २।८।९॥ पृथक्क्रमेण तृतीये चतुष्टयादि॥ २।८।१०॥

पिता (=$\frac{६}{१}\frac{१}{२}$=१) लग्नम्, लाभः (=$\frac{४}{४}\frac{३}{२}$=७) सप्तमः, एतयोर्मध्ये यः प्राणी बलवान् राशिस्तस्मादयं चरनवांशश्चरान्तर्दशा 'प्रथमे'—इत्यादिसूत्रत्रयेण निरूपितो

Sampath kumar Medavarapu

बोध्यः । प्रथमे चरराशौ लग्ने तत एव सप्तमे वा सति बलवल्लग्नसप्तमान्यतरस्माद् विषमसमराशिभेदेन प्राक् प्रत्यक्त्वं क्रमोत्क्रमगणने । द्वितीये स्थिरराशौ लग्ने सप्तमे वा सति बलवल्लग्नसप्तमान्यतरस्माद्विषमसमराशिभेदेन क्रमोत्क्रमाभ्यां रविः (=६३=६) षष्ठः ततोऽर्थात् षष्ठषष्ठराशिक्रमेण दशा प्रवर्त्या ॥ तृतीये द्विस्वभावराशौ लग्ने सप्तमे वा सति बलवल्लग्नसप्तमान्यतरस्माच्चतुष्टयादि केन्द्रादि पृथक्क्रमेण भिन्नभिन्नरीत्या पूर्वं लग्नसप्तमान्यतरकेन्द्रात् ततः पञ्चमपणफरात् ततो नवमापोक्लिमाद् विषमसमराशिभेदेन क्रमोत्क्रमाभ्यां दशा प्रवर्त्या ॥ सैषा चतुःसूत्री केन्द्रदशापरतया व्याख्यायते बहुभिः ॥

अथ चरान्तरदशोपयोगि किंचिदुपजातिभ्यामाह—

जगद्दशाया नवमांशपाके प्राणो द्वितीयः परिभावनीयः ।
स्याद् द्वारबाह्ये मलिनोपपन्ने बन्धादिकं तस्य दशान्तपाके ॥२७॥
चेद् द्वारबाह्याश्रयतां प्रयातो जीवस्य सांनिध्यगतः स्वराशौ ।
पापस्तदानीं नहि बन्धनादि भवेद्द्वयोगोदितमत्र चिन्त्यम् ॥ २८ ॥

जगदित्यादि—'दशाश्रयो द्वारमिति बाह्यस्तावतिथस्ततः' इत्याद्यमे पञ्चमप्रवाहे ॥ १—२ ॥

द्वितीयं भावबलं चरनवांशे ॥ २।४।१ ॥ तयोः पापे बन्धयोगादि ॥२।४।४॥ स्वर्क्षेऽस्य तस्मिन्नोपजीवस्य ॥ २।४।५ ॥ भग्नद्वयोगोक्तं सर्वमस्मिन् ॥ २।४।६ ॥

चरस्य चरदशाया नवांशेऽन्तर्दशायां द्वितीयं भावबलं फलार्थमुपादेयम् । 'बलं द्वितीयं पतिजीवचान्द्रिदयोगः' इति सप्तमप्रवाहे ॥ तयोर्द्वारबाह्यराश्योः पापग्रहे सति तद्दशामध्ये बन्धनताडनादि स्यात् ॥ तस्मिन् द्वारे बाह्ये वा राशौ पापाश्रिते अस्य उपजीवस्य गुरुसमीपवर्तिनः पापस्य स्वर्क्षे स्थितौ सत्यां बन्धनादि न स्यात् ॥ अस्मिन् द्वारे बाह्ये वा राशिग्रहयोगोदितं सर्वं फलमनुसधेयम् ॥ सैषा चतुःसूत्री चरराशिनवांशदशापरतया व्याख्यायते बहुभिः ॥

अथ चरान्तर्दशोदाहरणम्—

धन्न लग्नसप्तमयोर्मध्ये सप्तमो धनूराशिर्बलवांस्तत उत्क्रमकारेण धनुषि धनुर्मीनमिथुनकन्यामेषकर्कतुलामकरसिंहवृश्चिककुम्भवृषाणामन्तरभोगः । भोगस्तु मा० ८ एतावानेव सर्वेषाम् । ततो बलानुरोधेन मकरसिंहकन्यातुलावृश्चिकेषु उत्क्रमकारेणैव द्वादशद्वादशराशीनामन्तर्भोगा लेख्याः । अग्रे तु एत एव पुनरावर्तन्ते । एवमुपदशा अपि गणनीयाः ॥

अथ फलविशेषप्रतिपादकं राशीनां पदमार्यवाह—

अभिमतराशेर्यावति राशौ राशीश्वरोऽवतिष्ठेत ।
तस्मादग्रे तावानारूढाख्यो भवेद्राशिः ॥ २९ ॥

Sampath kumar Medavarapu

अभिमतेति—अभिमतो लग्नादिर्विचारविषयीभूतो यो राशिस्तस्माद् गतगणनया यावति यत्परिमाणे एकद्व्यादिसङ्ख्ये राशौ राशेर्विचारविषयीभूतस्येश्वर स्वामी भवति-ष्ठेत वर्तेत, तस्मादधिष्ठानभूताद्राशेरग्रे गतगणनयैव तावान् तत्परिमाण एकद्व्यादि-सङ्ख्य एव राशिरारूढाख्यो भवेत्। पदापरपर्यायारूढसञ्ज्ञया व्यपदिष्ट स्यात् ॥ २९॥

अथ विशेषमार्ययाह—

स्वामिनि चारिणि (४) वारि (४) द्यूने(७) पदमम्बर (१०) विशेषोऽयम्। सोऽत्रस्तथापि वृत्तावुदाहृतित्वेन संकलित॰ ॥ ३० ॥

स्वामिनीति—स्वामिनि विचार्यराशिनाधे वारिणि विचार्यराशितश्चतुर्थे वर्तमाने सति वारि चतुर्थगतो राशि पद स्यात्। एव द्यूने सप्तमे स्वामिनि तिष्ठति अम्बर दशमस्थो राशि पद भवेत्। विशेषोऽय सौत्र सूत्रागतो वर्तते। तथापि वृत्तौ नीलकण्ठादिवृत्तिग्र थे उदाहृतित्वेन पदलक्षणप्रतिपादकसूत्रस्योदाहरणतया सकलित पारगणित । तथाच नीलकण्ठ ॥—अथारूढोदाहरणरूप सूत्रद्वयमाह—'उभात्स्वस्थे चतुर्थस्थे लग्नस्वामिनि दारा सप्तमस्थो राशिर्लग्नारूढो भवति। लग्नात्सुतस्थे सप्तमस्थे लग्नस्वामिनि जन्मलग्नमारूढ भवतीत्यर्थ । यावदीशेति सूत्रेणैव सिद्धे एतत्सूत्रद्वय मुदाहरणद्वारा स्पष्टार्थं पठितमिति'। बालकृष्णानन्दस्वामी तु—'अथ भावेषु कारक विशेष कचन दर्शयति—स्वस्थे दारा द्वितीये स्त्रीविचारणीयेत्यर्थ । तेन द्वितीयभाव स्त्रीकारकमिति यावत् । सुतस्थे जन्म। एकादशे ज्येष्ठभ्रातुर्जन्म विवाद। तेन ज्येष्ठभ्रातृकारकमेकादशमिति यावत् । विशेषाद्गृहकारकविशेष दर्शयति—स्वस्थे स द्वितीय तत्रस्थे ग्रहे दाराश्चिन्तनीया । तथा च तत्रस्थो ग्रह स्त्रीकारक । तत स्त्रीविचार कर्तव्य इत्यथ । कारकात्सप्तमे दारा इति वाथ । सुत पञ्चम तत्रस्थे ग्रहे पुनर्जन्म जानीयात्। पञ्चमग्रह पुत्रकारक इत्यथ । सुते सप्तमे तिष्ठतीति सुतस्थ । तस्मिन्सप्तमस्थग्रहे पुत्रजन्म स्त्रीजन्म भर्तृजन्म वा यथायोग जानीयादिति वार्थ । अनेन सूत्रद्वयेन भावकारका भावस्थग्रहात्मकारकाश्च सर्वे यथायोगमुपलक्षिता इति वेदितव्यम्, इत्याह स्म। 'सुखस्थे सुख द्यूनमे कमभ च' इति श्रीमानयोध्यानाथ सिद्धान्तयति । यस्माद्भावात्तत्स्वामी चतुर्थगस्तदा तत्स्वामितुल्यमेव पद स्यात्। यदि सप्तमगस्तदा स्वामिनि राशिनययोजनेन पद स्यादिति तदभिप्राय ॥ ३० ॥

यावदीशाश्रयं पदमृक्षाणाम् ॥१।१।३०॥ स्वस्थे दारा॰ ॥१।१।३१॥ सुतस्थे जन्म ॥१।१।३२॥

ऋक्षाणा राशीना यावदीशाश्रय पद स्यात्। विचार्यो यो राशिस्तस्माद् गतक्रमेण यावत्सङ्ख्ये राशौ विचार्यराशिस्वामी स्यात्ततोऽग्रे गतक्रमेणैव तावत्सङ्ख्यो राशिस्तस्य विचार्यराशे पद भवेदित्यथ । ननु विचारविषयीभूतराशे सकाशात्तत्स्वामी गणनया-

Sampath kumar Medavarapu

यावत्संख्ये राशावुपलभ्यते तस्मादग्रे तावत्संख्य एव राशिस्तस्य विचारविषयीभूत-राशेः पदमित्यर्थः । कस्माज्ज्ञायते । समासादिति व्याख्यातारः । समासस्त्वेवम्—यद् राशितदीशमध्यगतं भमण्डलीयद्वादशभागपरिगणितं परिमाणमस्येति यावान् । 'यत्तदेभ्यः परिमाणे वतुप्' । यावांश्चासावीशश्च यावदीश इति कर्मधारयः । ततः यावदीश आश्रयोऽवस्था यस्य पदस्य तद् यावदीशाश्रयम्, इति तद्गुणसंविज्ञानो बहुव्रीहिः । तथा च वृद्धः—'लग्नाद्यावतिथे तिष्ठेद्राशौ लग्नेश्वरः क्रमात् । ततस्तावतिथं राशिं लग्नारूढं प्रचक्षते ॥' इति । वतोरित्थुक् । अत्र स्वामी-ऋक्षाणां पदमित्युक्त्या ग्रहाणामपि तत्तद्राशिद्वारकं पदं सूच्यते । ग्रहाद् यावद्दूरे ग्रहस्वामिको राशिस्तत्स्वामिकराशेस्तावद्दूरराशिर्ग्रहपदमिति वेदितव्यम् । तत्र रविचन्द्रयोरेकैकराशिरेव पदम् । भौमादीना भौमादिस्वामिकं राशिद्वयं मेषवृश्चिकात्मकमिति पदद्वयं वेदितव्यम् । अत्रापि विषमसमाधिकाराद् गणना प्राची प्रतीची चेति क्रमेणान्वेति । परंतु पदानयने सर्वत्रापि क्रमोत्क्रमकृतवैषम्याभावान्नातीवाग्रहः कार्य इति ॥ स्वस्थे, स्वस्मिन् (=४) तिष्ठतीति । लग्नाच्चतुर्थे लग्ननाथे सति दाराः (=$\frac{२८}{१२}$=) चतुर्थगतो राशिर्लग्नस्य पदं स्यात् ॥ सुतस्थे, सुते (=$\frac{६७}{१२}$=७) तिष्ठतीति । लग्नात्सप्तमस्थे लग्ननाथे सति जन्म ($\frac{५८}{१२}$=१०) दशमगतो राशिर्लग्नस्य पदं स्यात् । अस्य नीलकण्ठवृत्तौ दारशब्देन सप्तमराशिर्जन्मशब्देन जन्मराशिरिति व्याख्यानम् 'सर्वत्र सवर्णभावा राशयश्च ॥ १।१।३३ ॥ इति सूत्रविरुद्धत्वादुपेक्ष्यम् ।

अथ लग्नारूढानयनम्—अभिमतराशौ इत्यादिना गतगणनया मिथुनलग्नस्वामी बुधो वृश्चिकगतः षष्ठमो भवस्ततस्तथा गणनया पञ्चमो मेषो लग्नस्य पदम् एवं परेषाम् ॥

अथ वक्ष्यमाणग्रन्थोपयुक्तानि होराभावघटीतनूंषि संस्कारविशेषं चोपजातित्रयेणाह—

जन्मेष्टकालो नयनामृतांशुभि-(१२)
स्तर्कै (६) र्नभोवह्निभि(३०) राहतः क्रमात् ।
फलैर्लवाद्यैश्च युतोऽयमा भवे-
द्धोरातनुर्भावतनुर्घटीतनुः ॥ ३१ ॥
तद्धोरिकं भाविकमार्धिकं फलं
क्षिपेत्स्वरांशौ विषमा तनूर्यदि ।
समा भवेच्चेत्फलमत्र योजये-
दित्यूचिरे केचन दीर्घदर्शिनः ॥ ३२ ॥
तनूः समा वा विषमा प्रजायतां
तस्यां विदध्यात्फलयोजनं सदा ।
इति प्रकारान्तरमादिशन्परे
फलप्रणालीं रचनाविचक्षणाः ॥ ३३ ॥

Sampath kumar Medavarapu

जन्मेष्टादि—होरालग्नादिसाधनेऽनुपात । यदि सार्धेन घटीद्वयेन त्रिंशदंशास्तदेष्ट घटीभिः किम्

$$\frac{५}{२} \quad ३० \quad \text{इष्टघ} = \frac{२\times३० \text{ इ घ}}{५} = \text{१२ इ घ} = \text{फलमंशादि ।}$$

$$\text{अथवा,}\ \frac{\text{३० इ प}}{१५०} = \frac{\text{इ प}}{५} = \text{फ ।}$$

यदि घटीपञ्चकेन त्रिंशदंशास्तदेष्टघटीभिः किम्,

$$५ \quad ३० \quad \text{इ घ} = \frac{\text{३० इ घ}}{५} = \text{६ इष्ट घ} = \text{फ ।}$$

$$\text{अथवा}\ \frac{\text{३० इ प}}{३००} = \frac{\text{इ प}}{१०} = \text{फ ।}$$

यदि घट्या त्रिंशदंशास्तदेष्टघटीभिः किम्,

$$१ \quad ३० \quad \text{इ घ} = \frac{\text{३० इ घ}}{१} = \text{३० इ प} = \text{फ ।}$$

$$\text{अथवा}\ \frac{\text{३० इ प}}{६०} = \frac{\text{इ प}}{२} = \text{फ ।}$$

एतेन 'जन्मेष्टकालो नयनामृतांशुभिस्तर्कैर्नभोवह्निभिराहत क्रमात्' इत्युपपद्यते । सूर्योदये खलु जन्मभावहोराघटीलग्नानि तुल्यानि भवन्ति, तदनु निजनिजोदयमानेन भिन्ना भवन्ति । यस्माल्लग्नाना सूर्योदयात्प्रवृत्तिस्तस्मात्सूर्याद्गणना न्याय्या । एतेन 'फलैर्नवांशैश्च युतोऽयमा भवेद् होरातनुर्भावतनुर्घटीतनु' इत्यप्युपपद्यते । 'तद्धोरिक' —, इति पद्येन वृद्धाना मत प्रतिपाद्यते । तथा च वृद्धवाक्यानि—'सूर्योदयात्समारभ्य घटीपञ्चप्रमाणत । जन्मेष्टकालपर्यन्त गणनीय प्रयत्नत ॥ ओजराशौ यदा लग्न सूर्यराश्यनुसारत । समलग्न जन्मलग्नाद्यसंख्या प्राप्यते द्विज ॥ भावलग्न विजानीयाद् होरालग्न तदुच्यते । तथा सार्धद्विघटिकामितात्स्वलाद्विलग्नभात् ॥ प्रयाति लग्न तन्नाम होरालग्न द्विजोत्तम । यज्जन्म विषमर्क्षेषु सूर्यादिगणयेत्क्रमात् ॥ समलग्न यदा जन्म गणयेज्जन्मभाद् द्विज ॥' इति 'लग्नादेकघटीमात्र याति लग्न दिने दिने । परे तु घटिकालग्न निर्दिशेत्कालवित्तम ॥ इति च बहुटीकानुसारी कारिकासग्रह । 'तनू समा वा–' इत्यनेन नीलकण्ठाशयो वर्ण्यते ॥

अथ होरालग्नानयनम्—जन्मेष्टकालो घट्यादि ३०।५६ अय द्वादशगुणो जात लवादि ३७१।४८ लवेषु त्रिंशता भक्तेषु जात राश्यादि० ।११।४८ । इद तात्कालिकार्के ७।२९।५१।२४ युक्त जात राश्यादि होरालग्नम् ८।११।३९।२४ ॥

अथ भावलग्नानयनम्—जन्मेष्टकाल ३०।५६ अय षड्गुणितो जात लवादि १८५।५४ । लवेषु त्रिंशता भक्तेषु जात राश्यादि ६।५।५४ । इदमर्के ७।२९।५१।२४ युक्त जात राश्यादिभावलग्नम् २।५।४५।२४ ॥

Sampath kumar Medavarapu

अथ घटीलग्नानयनम्—जन्मेष्टकालः ३०।५९। अयं त्रिंशता गुणितो जातं लवादि ९२९।३०। लवेषु त्रिंशता भक्तेषु जातं राश्यादि ६।२९।३० इदमर्के ७।२९। ५१।२४ युक्तं जातं राश्यादिघटीलग्नम् २।२९।२१।२४ ॥ ३१–३३ ॥

अथ वक्ष्यमाणग्रन्थोपयुक्तं गुलिकादिसाधनमुपजातित्रयेणाह—

दिवानिशोरष्टमभागसंमितः
खण्डः स रव्यादिदिनक्रमाद्दिवा ।
ससाङ्कपञ्चाब्ध्यनलद्विभूमितः
शनैश्चरांशो ७।६।५।४।३।२।१ गुलिकः प्रकीर्त्यते ॥ ३४ ॥

नक्तं तु वारेश्वरपञ्चमादित—
स्त्रिद्वीन्दुशैलाङ्कशराब्धिसंख्यकः ३।२।१।७।६।५।४।
हृता स्वखण्डेन दिनस्य वा निशो
मितिर्गजाप्ता गुलिकेष्टकालकः ॥ ३५ ॥

दिने स सूर्योदयतः प्रजायते
रात्रौ द्युमानेन समन्वितस्तथा ।
ततः स्वदेशानुसृतोदयैस्तनुः
साध्या स मान्दिर्गुलिकोऽपि कथ्यते ॥ ३६ ॥

दिवानिशोरित्यादि—दिनस्याष्टमांशमितः कालखण्डो रव्यादिक्रमेण दिने सप्तमादि-संख्यो गुलिक इत्युच्यते । तत्राष्टमः खण्डो निरीशः । एतदुक्तं भवति—दिवा रवौ दिनमानाष्टमांशमितः सप्तमः खण्डः, सोमे षष्ठः, भौमे पञ्चमः, बुधे चतुर्थः, गुरौ तृतीयः, शुक्रे द्वितीयः, शनौ प्रथमः खण्डो गुलिकः । प्रतिवारमष्टमो निरीशः । रात्रावप्यष्टमांशमितः कालखण्डो रव्यादिवारेशपञ्चमादिक्रमेण तृतीयादिसंख्यो गुलिकः । एतदुक्तं भवति—नक्तं रवौ रात्रिमानाष्टमांशमितस्तृतीयः खण्डः, सोमे द्वितीयः, भौमे प्रथमः, बुधे सप्तमः, गुरौ षष्ठः, शुक्रे पञ्चमः, शनौ चतुर्थः खण्डो गुलिक इति । सैषा गुलिकस्थितिः सुखार्थं पाठपठिता ।

अथ गुलिकेष्टकालः—यद्यष्टभिः खण्डैर्दिनस्य रात्रेर्वा मानं लभ्यते तदा सप्तमादि-खण्डेन तृतीयादिखण्डेन वा किं फलं गुलिकेष्टकालः । स च दिने सूर्योदयादाग-च्छति । रात्रौ तु दिनमानेन युक्तः सूर्योदयाद्भवति । यथेष्टकालतात्कालिकार्काभ्यां स्वदेशोदयैर्लग्नं साध्यते तथैव गुलिकेष्टकालतात्कालिकार्काभ्यां स्वदेशोदयैर्लग्नं साध्यतां तच्च गुलिकेष्टलग्नं स्यात् । अत्र वृद्धवाक्यानि—'रविवारादिशन्यन्तं गुलिकादि निरूप्यते । दिवसमष्टधा भक्त्वा वारेशाद् गणयेत्क्रमात् ॥ अष्टमांशो निरीशः स्याच्छन्यंशो गुलिकः स्मृतः । रात्रिमप्यष्टधा भक्त्वा वारेशात्पञ्चमादितः ॥ गणयेदष्टमः खण्डो निष्पतिः परिकीर्तितः । शन्यंशो गुलिकः प्रोक्त इति ।

Sampath kumar Medavarapu

अथ गुलिकेष्टकालानयनम्—रात्राविष्टकालत्वाद् रात्रिमानम् ३४।९ खखण्डा॰ ङ्केन ५ गुणितम् १७०।४५ अष्टभिर्भक्तम् २१।२०।३८ । इद दिनमानेन २५।५१ युक्त जात सूर्योदयाद् गुलिकेष्टकालो घट्यादिक ४७।११।३८। अतो गुलिकलग्ना॰ नयनम्—गुलिकेष्टकालिकोऽर्क ८।०।७।५८ अयनांशे २२।३०।४० सहित ८।२२। ३८।३८। अस्य भोग्यांशे ७।२१।२२। धनुरुदय ३४३ गुणित २५२३।८।४६ त्रिंशता ३० भक्तो जातो भोग्यकाल ८४।६।१७।३२। अमु गुलिकेष्टकालस्य पलेभ्य २८३१।३८। सशोध्य पुनर्धनुषोऽग्रे मकरादिकन्यान्ताना नवराशीनामुदयपलानि ३०३+२५०+२१७+२१७+२५०+३०३+३४३+३४८+३३९=२५७० एकीकृतानि सशोध्य शेषम् १७७।३१।४२।२८ अस्मात्तुलोदयो न शुध्यतीत्यत इद त्रिंशता गुणित ५३२५।५९।१४ तुलोदयेन ३३९ भक्त लब्धमशादि १५।४२।३८ इदमशुद्ध॰ पूर्वैर्मेषादिषड्राशिभि सहितम् ६।१५।४२।३८ अयनांशे रहित जातो राश्यादि गुलिक ५।२३।११।५८ ॥३४—३६ ॥

अथ पद्यामृतसिद्धासूत्रत्रयी—

सर्वत्र सवर्णा भावा राशयश्च ॥१।१।३३॥ न ग्रहाः ॥१।१।३४॥ होरादयः सिद्धा॰ ॥१।१।३५ ॥

अत्र शास्त्रे सर्वत्र भावा राशयश्च सवर्णा एकादिसङ्ख्यावबोधकशब्दगम्या । अत एव 'स्वस्थे दारा' इत्यादौ स्वदार–शब्दाभ्या द्वितीय–सप्तमभावौ न गृह्येते, किन्तु तत्तच्छब्दलभ्यचतुर्थभाव एव गृह्यते इति सुधीभिराकलनीयम् । दारभाग्येति सूत्रे दारशब्देन चतुर्थो भाव सर्वैर्गृहीतोऽपि । अत्र स्थिरलाभिप्रायेण भचक्रीया तन्वादिद्वादशपदार्थी भावपदवाच्या, भावेषु सचरमाणा मेषादिद्वादशपदार्थी तु भराशियोगतया राशिपदवाच्येति सूक्ष्मदृशा विभावनीयम् । इह वर्णेन वर्णद आक्षि॰ प्यत इति बहव । तथा च वृद्धवाक्यानि—

'ओजलग्नप्रसूताना मेषादेर्गणयेत्क्रमात् ।
युग्मलग्नप्रसूताना मीनादेरपसव्यत॰ ॥
मेषमीनादितो जन्मलग्नान्तं गणयेत्सुधी ।
तथैव होरालग्नान्तं गणयित्वा तत परम् ॥
पुंस्त्वेन स्त्रीतया चे ते सजातीये उभे यदि ।
तर्हि संख्ये योजयीत वैजात्ये तु विशोधयेत् ॥
मेषमीनादित पश्चाद् यो राशि स तु वर्णद ।' इति ।
'पापदृष्टि पापयोगो वर्णदस्य त्रिकोणके ।
यदि स्यात्तर्हि तद्राशिपर्यन्तं तस्य जीवनम् ॥
रुद्रशूले यथैवायुर्मरणादि निरूप्यते ।
तथैव वर्णदस्यापि त्रिकोणे पापसगमे ॥

Sampath kumar Medavarapu

वर्णदात्ससमाद्राशेः कलत्रादि विचिन्तयेत्।
एकादशादग्रजं तु तृतीयात्तु यवीयसम्॥
पञ्चमे तनुजं विद्यान्मातरं तुर्यपञ्चमे।
पितुस्तु नवमान्मातुर्वर्णदात्पञ्चमस्य तु॥
शूलराशिदशायां वै प्रबलायामरिष्टकम्॥' इति च।

अत्रेयं गणितप्रक्रिया—जन्मलग्नं होरालग्नं चेदुभयं विषमं, तदा तयोर्योगः कार्यः, स चेद् विषमस्तर्हि स एव वर्णदराशिः स्यात्। यदि चोभयं समं, तदा द्वादशराशिभ्यो विशोध्य शेषयोर्योगः कार्यः, स चेद् विषमस्तर्हि स एव वर्णदः स्यात्। यदि जन्मलग्नहोरालग्नयोर्मध्ये एकं विषमं, परं समं तदा समं द्वादशराशितो विशोध्य तयोरन्तरं कार्यम्, तच्चेद्विषमं तर्हि स एव वर्णदः स्यात्। यदि चात्र योगोऽन्तरं वा समस्तदा द्वादशराशिनिपातेन वर्णद इति वर्णदकथा। वर्णदकथासारस्तयम्—

'जन्महोरातनूयोगो विषमो वर्णदो भवेत्।
समस्तु चक्रतः शुद्धो वर्णदो वर्ण्यते बुधैः॥

जन्मलग्नम् २।२७।४५।२७ होरालग्नम् ८।११।३६।२४ अनयोर्योगः ११।९।२४।५१ समत्वाद् द्वादशशुद्धो जातो वर्णदः ०।२०।३५।९ अत्र योगो द्वादशाधिकश्चेद् द्वादशभिस्तक्ष्यः।

अथ वर्णददशा—

'होरालग्नभयोर्नेयाऽदुर्बलाद् वर्णदा दशा।
यत्संख्यो वर्णदो लग्नात्तत्संख्याक्रमेण तु।
क्रमव्युत्क्रमभेदेन दशा स्यात्पुरुषस्त्रियोः॥'

'लग्नाद् यत्संख्याको वर्णदराशिस्तत्संख्याक्रमत ओजयुग्मलग्नानुरोधेन प्रथमप्रवृत्तक्रमव्युत्क्रममर्यादया तत्तद्राशीनां दशा स्यात्, इति नीलकण्ठः। अत्र खलु जन्मलग्नस्य मिथुनस्य होरालग्नस्य धनुषश्च मध्ये धनुर्बलवान् तेन होरालग्नमारभ्य वर्णदपर्यन्तं गणनया पञ्चसंख्या लभ्यते सा विषमेति हेतोर्धनुषः सकाशात् क्रमगणनया धनुर्मकरकुम्भमीनमेषप्रभृतीनां दशा विदेदयाः। दशाब्दास्तु चरदशोक्ता एव ग्राह्याः। नीलकण्ठस्तु एतद्वर्णदानयनवद् भावलग्नमेव जन्मलग्नं मत्वा भाववर्णदमानीतवान्, तत्र मूलं मृग्यम्।

Sampath kumar Medavarapu

न ग्रहाः। अत्र भावा इवाथवा राशय इव ग्रहाः खेटाः सवर्णा वर्णगम्या न भवेयुः। वर्णदवादिनां मते ग्रहाणां वर्णदा न भवन्तीति योजनीयम् ॥

होरादयः सिद्धा इति। राशिहोराद्रेष्काणनवांशद्वादशांशत्रिंशांशा इति गर्गादिशास्त्रतः स्पष्टम् ॥

अथ प्रहर्षिण्या प्रथमपादपदार्थानुपसंहरति—

इत्युक्तः खलु रसराम (३६) संख्यपद्यैः
शास्त्रार्थो मुनिवचनानुरुद्ध एव।
तेनाद्य प्रशमितसंशयावतारं
छात्राणां मतिकलिका प्रहर्षिणी स्यात् ॥ ३७ ॥

इति श्रीदुर्गाप्रसादद्विवेदरचिते जैमिनिपद्यामृते शास्त्रावतरणं नाम प्रथमः प्रवाहः
श्री ६ गुरुचरणार्पणमस्तु ॥

इत्युक्त इति—मुनिवचनानुरुद्ध एव। आवश्यके वृद्धवचनग्रहणमपि। अथवा 'मुनिजरठानुरुद्ध एव' इति पठनीयम् ॥ ३७ ॥

इति श्रीजैमिनिपद्यामृतवृत्तौ मूलकन्दल्यां प्रथमः प्रवाहः ॥

अथ द्वितीयप्रवाहो विविच्यते। तत्र पूर्वं मुनीन्द्रस्मरणपूर्वकं फलनिरूपणं रथोद्धतया प्रतिजानीते—

जातकागममहोपदेशकं जैमिनिं मुनिविकर्तनं स्तुवन्।
कारकांशमवलम्ब्य कीर्तये कुण्डलीफलमपास्तसंभ्रमम् ॥ १ ॥

जातकेति—जातकागमो होराशास्त्रं तस्य महोपदेशकं महागुरुम्। महत्त्वं च असाधारणशास्त्रप्रकाशकत्वेन। मुनिर्विकर्तन इव मुनिविकर्तनः। उपमितसमासः। विकर्तनः सूर्यः। तं मुनिविकर्तनं जैमिनिं स्तुवन् कारकांशमात्मकारकग्रहस्य नवमांशमालम्ब्य आश्रित्य। सामान्यवचनोऽप्यंशशब्दो जातकशास्त्रे नवमांशे रूढः। अपास्तो निरस्तः संभ्रमो भ्रान्तिर्यस्मिन्कर्मणि तद्यथा स्यात्तथा कुण्डलीफलं कीर्तये कथयामि। राशीनां सन्निवेशस्य कुण्डलाकारतया कुण्डलीव्यवहारः। तथैव चक्रम्; 'चक्रे वामदृगुच्यते बलवती' इत्यादिप्रयोगात्। एवं मण्डलादिशब्दाः पर्यायतया कस्मान्न व्यवह्रियन्ते। अनभिधानात् ॥ १ ॥

अथ स्वांशो ग्रहाणाम् १।२।१ ॥

अथ संज्ञापादानन्तरमिति ऋजवः । वस्तुतस्तु अथशब्दोऽधिकारार्थः । तथा च ग्रहाणां स्वांश आत्मकारकाधिष्ठितनवांशोऽधिकृतो वेदितव्यः । ततः फलं वाच्यमिति तात्पर्यम् ॥

यथा प्राच्यां लग्नः क्रान्तिवृत्तीयः प्रदेशो लग्नमिति क्रमेण द्वादशराशयस्तथा कुण्डल्यामपि प्राचीमनुरुध्यैव लग्नादय इति मिहिरादिसम्मतः स्पष्टम् । अत एव प्रधानव्यपदेशन्यायेन लग्नादिप्राधान्यादेव लग्नभावांशकादि कुण्डलीसव्यपदेशः सोपपत्तिकः । अत्र बहुनिर्बंशकुण्डल्यां सम्यग्नवांशेषु ग्रहा न गण्यन्ते ॥

अथ कारकांशकुण्डली ।



Sampath kumar Medavarapu

अथवा स्वांशकुण्डली ।



अथ कारकाश्रितमेषवृषमिथुननवांशफलान्याह—

मूषिकास्तदरयो भयप्रदा आत्मकारकलवे क्रियं गते ।
सौख्यदाश्च पशवो वृषाश्रिते स्थौल्यकण्ड्वधिगमे नृयुग्मगे ॥ २ ॥

मूषिका इति—आत्मकारकलवे कारकीभूतग्रहनवांशे क्रियं मेषं गते याते सति, मूषिका, तेषामरयो मार्जारा भयप्रदा भवन्ति । अर्थात्फलस्वामिनो देवदत्तस्य मूषिकमार्जारकृता पीडा जायते । तथा कारकांशे वृषाश्रिते सति, पशवः सौख्यदा भवन्ति । तथा कारकांशे नृयुग्मगे मिथुनाश्रिते सति, स्थौल्य शरीरस्थूलता, कण्डू खर्जू, तयोरधिगम प्राप्तिर्भवति ॥ २ ॥

पञ्चमूषिकमार्जाराः १।२।२ ॥ तत्र चतुष्पादः १।२।३ ॥ मृत्यौ कण्डूः स्थौल्यं च ।१।२।४ ॥

पञ्च (=$\frac{5}{१२}$=१) मेषे कारकांशश्चेन्मूषिकमार्जारा दु खदायिन स्यु । मूषिकैः सहिता मार्जारा इति विग्रह । अन्यथा मूषिकमार्जारमिति स्यात् । वस्तुतस्तु नास्माकमिव ऋषीणामनुशासनपारतन्त्र्यम् । अत एव मीमांसातन्त्रवार्तिके भट्टपादा — ‘कल्पसूत्रस्मृतिग्रन्थमीमांसाग्रन्थकारिण । शिष्टा दृष्टा प्रयुञ्जाना अपशब्दाननेकश ॥’

Sampath kumar Medavarapu

इति । तत्र $(=\frac{2}{1}\frac{6}{2}=2)$ वृषः कारकांशश्चेच्चतुष्पादः; प्रथमाबहुवचनम् । दुःखदायिनः । मृत्यौ $(=\frac{1}{1}\frac{5}{2}=3)$ मिथुने कारकांशे सति, कण्डूः स्थौल्यं च स्याताम् ॥

अथ कारकाश्रितकर्कसिंहकन्यानवांशफलान्याह—

कुष्ठरुग्जलभियौ कुलीरगे श्वापदा हि भयदा मृगेन्द्रगे ।
स्थौल्यकण्डुधिगमस्तनूनपाद्भीतिरेणनयनावलम्बिनि ॥ ३ ॥

कुष्ठेति—कारकांशे कुलीरगे, कुष्ठरुग् कुष्णाख्यः कुष्ठः स एव रुक् कुष्ठरुक्, श्वेतकुष्ठाख्य आमयः । जलभीः, ते स्याताम् । मृगेन्द्रगे सिंहगे, श्वापदाः शुन इव पदं येषां ते । हिंस्रपशव इति हेमचन्द्रः । भयदा भीतिजनकाः । एणनयना कन्या, तदवलम्बिनि तद्गते कारकांशे, स्थौल्यकण्डुधिगमः । व्याख्यातं प्राक् । तनूनपाद् अग्निस्तस्माद् भीतिः स्यात् । अग्निजैः कर्णदुःखमिति वा पाठः ॥ ३ ॥

दूरे जलकुष्ठादिः १।२।५ ॥ शेषाः श्वापदानि १।२।६ ॥ मृत्युवज्जायाग्निकणश्च १।२।७ ॥

दूरे $(=\frac{2}{1}\frac{8}{2}=4)$ कर्के कारकांशे, जलभयं कुष्ठः, आदिशब्देन तत्सजातीयामयश्च । शेषाः $(=\frac{6}{1}\frac{5}{2}=5)$ सिंहः कारकांशश्चेद् श्वापदानि भयदानि । जाया $(=\frac{1}{1}\frac{8}{2}=6)$ कन्या कारकांशश्चेत् मृत्युवन्मिथुनकारकांशवत्फलम्; तथा अग्निकणो वह्निस्फुलिङ्गो दुःखकृत् ॥

अथ कारकाश्रिततुलावृश्चिकनवांशफलान्याह—

पण्यकर्मनिरतस्तुलाधरे स्वांशके भवति वृश्चिके पुनः ।
अम्बुसंभवभुजङ्गमव्यथा मातृदुग्धविलयश्च जायते ॥ ४ ॥

पण्येति—अम्बुनि संभवो येषां तथाभूता ये भुजङ्गमाः सर्पास्तद्व्यथा, मातुर्दुग्धस्य विलयो हानिश्च जायते ॥ ४ ॥

लाभे वाणिज्यम् १।२।८ ॥ अत्र जलसरीसृपाः स्तन्यहानिश्च १।२।९ ॥

लाभे $(=\frac{4}{1}\frac{3}{2}=7)$ तुलाकारकांशे वणिजां पण्याजीवानां कर्म वाणिज्यम् । अत्र $(=\frac{2}{1}\frac{6}{2}=8)$ वृश्चिके कारकांशे जलसरीसृपा जलव्याला भयप्रदाः, तथा स्तन्यस्य मातृदुग्धस्य हानिः ॥

अथ कारकाश्रितधनुर्मकरनवांशफलान्याह—

पात उच्चविषयाच्च वाहनादिष्यते क्रमतया धनुर्धरे ।
ग्रन्थिकण्डुखगपारिचारितः स्वांशके मकरगे तु भीर्भवेत् ॥ ५ ॥

पात इति—धनुर्धरकारकांशे, वाहनाद् गजादेः, उच्चविषयात् प्रासादसोपानादिप्रदेशात्, क्रमतया अवलम्बनासादनपूर्विकया पातः पतनमिष्यते । ग्रन्थिः शरीरे विविधाकारा मांसग्रन्थिः, कण्डुः खर्जुः; दक्षान्तोऽपि । खगा आकाशगामिनः, वारिचारिणो जलचराः तेभ्यः । शेषं स्पष्टम् ॥ ५ ॥

Sampath kumar Medavarapu

समे वाहनादुच्चाच्च क्रमात्पतनम् १।२।१० ॥ चलचरखेचरखेटकण्डू-दुष्टग्रन्थयश्च रिष्फे १।२।११ ॥

समे (=$\frac{९}{१}$=९) धनुषि कारकांशे, चलचरा गोधानकमकरादयो जलजन्तुविशेषा, खेचरा पक्षिण, खेटा यक्षराक्षसविनायकग्रहरूपा, एषामावेशेन मनुष्याणां पीडो-त्पद्यते। तत एव सारावल्यादौ आधिदैविकदुःखे परिगणिता। पद्यामृते तु खगशब्दे-नैतत्परिगृहीतं भवति। कण्डूदुष्टग्रन्थिपदार्थौ व्याख्यातौ। अथवा दुष्टग्रन्थिशब्देन महाज्वरपूर्वक आमयविशेषो गृह्यते, येन ग्रस्त प्रायो म्रियत एव ॥

अथ कारकाश्रितकुम्भमीननवांशफलान्याह—

कुम्भगामिनि तडागदीर्घिकाकूपखाननविधाधुरंधरः।
धर्मकर्मकलनापरायणो मोक्षभाग्भवति मीनगेऽशके ॥ ६ ॥

कुम्भेति—दीर्घिका वापी। शेषं स्पष्टम् ॥ ६ ॥

तडागादयो धर्मे १।२।१२ ॥ उच्चे धर्मनित्यता कैवल्यं च १।२।१३ ॥

धर्मे (=$\frac{९}{१}$=११) कुम्भस्थिते कारकांशे। शेषं पद्यत स्पष्टम्। उच्चे (=$\frac{६}{१}$=१२) मीनस्थिते कारकांशे। एवं पद्यादि द्वादशसूत्र्या कारकाश्रितद्वादशराशीनां नवांश-फलानि प्रतिपादितानि। मूषिकमार्जारा दुःखदा, चतुष्पाद सुखदा इति व्याख्याने वृद्धवाक्यमेव बीजमिति कश्चन। वस्तुतस्तूभयत्रौचित्यमेव नियामकम् ॥

अथ कारकांशकुण्डल्या ग्रहस्थित्यादिना द्वितीयप्रवाहान्त यावत्फलानि वक्तव्यानि, तत्र पूर्वमध्यावशिष्टा स्वागतानि फलान्याह—

स्वांशके कमलबान्धवयुक्ते राजकार्यनिरतं कथयन्ति।
पूर्णचन्द्रभृगुसंमिति विद्या जीविनं विविधभोगपरं च ॥ ७ ॥
स्वांशके कुजयुतेऽनलजीवी कौन्तिको विविधधातुविधिज्ञः।
चान्द्रिभासिनि वणिग्व्यवहारी शिल्पविद् गुणविनिर्मितिकारी॥८॥
आत्मकारकलवे सुरपूज्ये ज्ञानकर्मनिरतः श्रुतिविच्च।
भार्गवे तु पुरुषायुपजीवी कामुको नृपतिशिष्टिनिविष्टः ॥ ९ ॥
स्वांशके सवितृसूनुसनाथे सुप्रसिद्धकृतिजीवनकारी।
स्यात्तमे विषहरायसयन्त्री वा धनुर्धरमलिम्लुच एव ॥ १० ॥
आत्मकारकलवे शिखियुक्ते तस्करश्च करटिव्यवहारी।
सैंहिकेयनलिनीपतिनिष्ठे सर्पदंशनहतं मरणं स्यात् ॥ ११ ॥

स्वांशक इत्यादि—स्वांशके कारकांशे। कमलबान्धव सूर्य। कौन्तिक, कुन्त प्रहरणमस्य। ठक्। गुणविनिर्मितिकारी तन्तुवाय इत्यर्थ ॥ ज्ञानकर्मणी उपनिष-त्कल्पसूत्रप्रतिपाद्ये, तत्र निरत। श्रुतयो मन्त्रब्राह्मणरूपा, ता वेत्तीति। नृपते शिष्टिराज्ञा, तत्र निविष्ट ॥ आयसयन्त्राणि वस्तुसाधनभूतानि नानाविधानि। मलि-म्लुच चौर ॥ शिखा शिखेव तद्गुणयोगात्। यथा किल शिखा दीर्घाविसारिणी

Sampath kumar Medavarapu

चाकचक्यचमत्कारिणीति । सास्येति शिखी केतुः । यद्यपीह गणितेन च आनीयते तस्यैवमाकारो न संभवति, तथाप्यागमबलेन तथा व्यवह्रियते । अत एव ध्वज-शब्दोऽपि तत्पर्यायतया प्रयुज्यते महर्षिभिः । करटी गजः । सिंहिकाया अपत्यं सैंहिकेयो राहुः । नलाः सन्त्यस्यामिति नलिनी पद्मिनी, तत्पतिः सूर्यः ॥ ७—११ ॥

तत्र रवौ राजकार्यपरः ।१।२।१४ ॥ पूर्णेन्दुशुक्रयोर्भोगी विद्याजीवी च ।१।२।१५ ॥ धातुवादी कौन्तायुधो वह्निजीवी च भौमे ।१।२।१६ ॥ वणिजस्तन्तुवायाः शिल्पिनो व्यवहारविदश्च सौम्ये ।१।२।१७ ॥ कर्मज्ञाननिष्ठा वेदविदश्च जीवे ।१।२।१८ ॥ राजकीयाः कामिनः शतेन्द्रियाश्च शुक्रे ।१।२।१९ ॥ प्रसिद्धकर्मा जीवः शनौ ।१।२।२० ॥ धानुष्काश्चौराश्च जाङ्गलिकलोहयन्त्रिणश्च राहौ ।१।२।२१ ॥ गजव्यवहारिणश्चौराश्च केतौ ।१।२।२२ ॥

'तत्र' इति सप्तमी स्वांशाधिकरणकफलबोधिका; न तु संख्योत्थापिका । कुन्त एव कौन्तः, स्वार्थिकोऽण्; स आयुधमस्य । वह्निजीवी वह्निना जीवनकर्ता । वणिज इत्यादि बहुवचनमविवक्षितम् । 'मन्त्रब्राह्मणयोर्वेदनामधेयम्' इत्यापस्तम्बसूत्रेण संहिताब्राह्मणग्रन्थसमुदायो वेदः । शतं शतवर्षाणि इन्द्रियाणि येषां ते शतेन्द्रियाः । 'शतायुर्वै पुरुषः' इति 'पश्येम शरदः शतम्' इत्यादिश्रवणाच्च । पुरुषायुषजीविन इति निर्गलितार्थः । 'अरोगाः सर्वसिद्धार्थाश्चतुर्वर्षशतायुषः । कृतत्रेतादिषु ह्येषामायुर्ह्रसति पादशः' इति मनुवचनादौ तु शतशब्दो बहुलपर इति प्रामाणिकाः । अत एव मीमांसकनयेन यथेष्टं संवत्सरशब्दस्य दिनपरतापि न व्याख्या । तदेतत्प्राचीन-लक्ष्यभङ्गभिया मीमांसकमतसमर्थनपुरस्सरं समाधेनोक्तमस्माभिः पद्यामृततत्त्वे— 'श्रुतौ शतायुः पुरुषः प्रदिष्टो बहुत्वयोगी शतशब्दशक्यः । रामादिकानामधिकायुराप्तौ युक्तं प्रतीमः फलितेऽमितायुः' ॥ इति मन्वादिवचनप्रमाणीकरणपूर्वकम्—'स वार्षिको वासरिको मचक्रभोगो भवेद् भास्करसंश्रयेण । तत्रापरं ब्राह्मणगौरवेण स स्वीचकारेति विरोधभङ्गः ॥ इति मीमांसकमतं व्यवस्थापितमित्यन्यत्र विस्तरः । जाङ्गुलीं विषविद्यामधीयते विदुर्वा जाङ्गलिकाः । शेषं स्पष्टं पद्यामृतेन व्याख्यातं च । तत्र रवौ—, इत्यादिनवसूत्र्या कारकांशे रव्यादिमहावस्थानेन यथाक्रमं फलानि निर्दिष्टानि ॥

स्वांशके रविविधुंतुदयुक्ते सौम्यदृष्टियुजि तूक्फलं न ।
सूर्यराहुयुतकारकभागे सौम्यमात्रयुजि जाङ्गुलिकः स्यात् ॥१२॥
स्वांशकेऽर्कतमसंगिनि दृष्टे केवलेन धरणीतनयेन ।
जायते खलु निकेतनदाही वा निकेतनविभावसुदायी ॥ १३ ॥
स्वांशके सवितृराहुसमेते जायते न दहनं क्वचिद्दृष्टे ।
आदितेयगुरुणा तु सुदृष्टे संनिकृष्टसदनाग्निदाहः ॥ १४ ॥

Sampath kumar Medavarapu

स्वांशक इत्यादि—विधु तुदति व्यथयतीति विधुंतुदो राहु । खच्, मुम् । सौम्य-दृष्ट्या शुभग्रहावलोकनेन युज्यत इति । क्विप् ॥ ताम्यतीति तमो राहु । पचाद्यच् । निकेतन गृहम् । विभावसुरग्नि । सन्निकृष्टसदनावधिदाह स्वगृहदाहप्रसङ्गेन प्रति-वेशिनामपि गृहदाह. स्यात् ॥ १२—१४ ॥

रविराहुभ्यां सर्पनिधनम् ॥१।२।२३॥ शुभदृष्टे तन्निवृत्तिः ॥१।२।२४॥ शुभमात्रसंबन्धाज्जाङ्गुलिकः ॥१।२।२५॥ कुजमात्रदृष्टे गृहदाहकोऽग्निदो वा ॥१।२।२६॥ शुक्रदृष्टे न दाहः ॥१।२।२७॥ गुरुदृष्टे त्वासमीपगृहात् ॥१।२।२८॥

'तत्र' इत्यनुवर्तत एव । प्रकान्ततया रविराहुभ्या युत इत्येवार्थ । तथैव प्रमाण-वाक्येऽपि । 'आसमीप–' इत्यत्राभिविधावाङ् । शेषं पयत स्पष्टम् ॥ अत्र वाम्यानि—'कारकांशे भानुतमौ शुभपड्क्तिसयुतौ । विषवैद्यो भवेन्नून विपद्दर्ता विचक्षण ॥ भौमेक्षिते कारकांशे भानुस्वर्भानुसयुते । अन्यग्रहा न पश्यन्ति स्ववेश्म परदाहक ॥ यदि सौम्येक्षिते स्वांशे ह्यग्निदो नैव जायते । पापर्क्षे तु गुरोर्दृष्टे समीपगृहदाहक ॥' इति ।

स्वांशके सगुलिके विषदाता वा स्वयं विनिहतो गरलेन ।
शीतदीधितिविलोचनसत्त्वे तस्करस्तदपनीतधनो वा ॥ १५ ॥
स्वांशके सगुलिके बुधमात्रालोकिते किल वृहद्वृषणः स्यात् ।
स्वांशके ध्वजयुते खरदृष्टे कर्णकृन्तनममुत्र रुजा वा ॥ १६ ॥
आत्मकारकलवे शिखिनाढ्ये दीक्षितो भवति भार्गवदृष्टे ।
शीतरश्मिखररश्मिसुताभ्यां वीक्षिते तु खलु वीर्यविहीनः ॥१७॥
सध्वजे शशिजभार्गवदृष्टे द्विस्त्रिरक्तिनिरतोऽपजनुर्वा ।
स्वांशके शिखियुते शनिदृष्टे तापसो भवति वा परिचारी ॥ १८ ॥
स्वांशके ध्वजयुते परिदृष्टे केवलेन शनिनाऽनृतदण्डी ।
स्वांशके कमलवन्धुकविभ्यामीक्षिते तु पृथिवीपतिभृत्यः ॥१९॥

स्वांशके सगुलिक इत्यादि—गुलिकशान प्रथमप्रवाहे । गरलेन विषेण । शेष स्पष्टम् ॥ ध्वज केतु । तथा वैतरपर्याये शुकजातके—'शिखी केतुर्ध्वजो धूम्रो मृत्युपुत्रोऽनिलस्तथा ।' खर क्रूर । अमुत्र कर्णे रुजा रोग ॥ सोमपानवति यागे आदेश सन् दीक्षितो भवति । दीक्षतेस्, वा दीक्षा सजातास्येति दीक्षित ॥ द्विस्त्रिरक्ति पुन पुनर्भाषण, तत्र निरत । तात्पर्यन्निक इति भाव । अपजनु अपकृष्टयोनिजन्मा । अधमजो चेति वा पाठ । परिचारी परिचारक ॥ अनृतदण्डी मिथ्यासन्यासी वाह्याडम्वरेण वैराग्यकोटिमापन्नो न वस्तुतो वैराग्यवान् ॥१५-१९॥

सगुलिके विषदो विषहतो वा ॥१।२।२९॥ चन्द्रदृष्टे चौरापहृत-धनश्चौरो वा ॥१।२।३०॥ बुधमात्रदृष्टे बृहद्बीज. ॥१।२।३१॥ तत्र

Sampath kumar Medavarapu

केतौ पापदृष्टे कर्णच्छेदः कर्णरोगो वा ॥ १।२।३२ ॥ शुक्रदृष्टे दीक्षितः ॥ १।२।३३ ॥ बुधशनिदृष्टे निर्वीर्यः ॥ १।२।३४ ॥ बुधशुक्रदृष्टे पौनःपुनिको दासीपुत्रो वा ॥ १।२।३५ ॥ शनिदृष्टे तपस्वी प्रेष्यो वा ॥ १।२।३६ ॥ शनिमात्रदृष्टे संन्यासाभासः ॥ १।२।३७ ॥ तत्र रविशुक्रदृष्टे राजप्रेष्यः ॥ १।२।३८ ॥

'सगुलिके' इत्युपादानाद् 'रविराहुभ्याम्' इति निवृत्तम् । कारकांशे गुलिकेन सहिते विषदो विषप्रयोगकर्ता भवति । वा स्वयं विषेण विषप्रयोगेण हतो भवति ॥ 'सगुलिके' इत्यग्रिमसूत्रद्वयं यावत्सम्बध्यते ॥ तत्र केताविति । तत्र कारकांशे केतौ विद्यमाने शेषं स्पष्टम् । तत्र ग्रहणात् 'सगुलिके' इति निवृत्तम् । 'केतौ इत्यग्रिमेषु' 'शुक्रदृष्टे' इत्यादिपञ्चसु सूत्रेष्वनुवर्तते ॥ पौनःपुनिकः, पुनः पुनर्भाषणकर्ता; न तु पुनर्भूपुत्रः पौनर्भव इति ॥ तत्र रविशुक्रदृष्टे इति । तत्र कारकांश इत्यर्थः । तत्र ग्रहणात्केतौ इति निवृत्तम् ॥ गौरवेऽपि भ्रान्तिभञ्जनार्थमियमनुवृत्तिः पद्यामृते प्रतिपद्यमुपनिबद्धा 'रविराहुभ्या' इत्यादि षोडशसूत्र्या ग्रहयोगादिना फलान्युक्तानि ॥

स्वांशकाद्दशमभे बुधयुक्ते वेक्षिते प्रथितवृत्तिपरः स्यात् ।
स्वीक्षिते त्वतरलो गुरुमात्रालोकिते तपनभाजि तु गोपः ॥ २० ॥
स्वांशकात्सलिलभे गुरुभृग्वोर्दृष्टियोगयुजि सौधविहारी ।
उच्चगद्युचरजेऽपि तथैवाग्वार्किसंगिनि शिलागृहभोगी ॥ २१ ॥
इष्टकागृहमसृग्ध्वजयोगे दारवं सदनमीज्यसमेते ।
तार्णसद्मनलिनीपतियुक्ते कारकांशकचतुर्थगृहे स्यात् ॥ २२ ॥
आत्मकारकलवान्नवमर्क्षे सौम्यवीक्षणसमागमसत्त्वे ।
धर्मसत्यनिरतो गुरुभक्तः पापदृष्टिसहिते तु विलोमम् ॥ २३ ॥
मन्दराहुकृतदर्शनयोगे कारकांशनवमे हि गुरुद्विट् ।
अर्कजीवयुतिवीक्षणसत्त्वे नो भवेद्गुरुजने मतिदार्ढ्यम् ॥ २४ ॥
अर्थमे भृगुमहीसुतवर्गे जायते परकलत्रनिषेवी ।
आवसानमवलोकयुतिभ्यां केतुना भवति तत्प्रतिबन्धः ॥ २५ ॥
क्रूरभाजि कुजभार्गववर्गे जीवयोगदृशि योषिति लोलः ।
सैंहिकेययुतिवीक्षणसत्त्वे कामिनीकरणकोऽर्थविनाशः ॥ २६ ॥

स्वांशकादित्यादि—स्वांशकाद्दशमभे कारकांशकुण्डल्या दशमस्थाने इत्यर्थः । बुधयुक्तेऽथवा बुधेक्षिते । स्वीक्षिते शुभेन ईक्षिते तु अतरलः स्थिरः । गुरुमात्रदृष्टे रविगते तु गोपः । सर्वत्र दशमभे इत्यन्वेति ॥ सलिलभं चतुर्थस्थानम् । उच्चगद्युचरगे उच्चराशिगतग्रहस्थिते तथैव सौधविहारी स्यात् । अगू राहुः, आर्किः शनिः ॥

ताणंसद्म तृणगृहम् ॥ विलोमो धर्मात् सत्याद् गुरुभक्तेश्च च्युतः स्यादित्यर्थः ॥ मति-दार्ढ्यं श्रद्धायोग ॥ 'तत्र' इति ग्रहणात् 'समे' इति निवृत्तम् । तत्र (=२६/१२=२) द्वितीये ॥ भृगुमहीसुतवर्गे शुक्रस्य भौमस्य वा वर्गे षड्वर्गे । यद्यपि वर्गशब्दस्य सामा-न्यवचनतया तत्र तत्र स्मर्यमाणो य. कोऽपि समुदायो गृहीतु शक्यस्तथापि षड्वर्गो ग्राह्य । बहूना सवादात् । पर वृद्धोक्ते षड्वर्गे सप्तमांशो गृहीत , गर्गाद्युक्ते तु त्रिंशांश इति भेद । तथा च गर्ग —'क्षेत्र होराथ द्रेष्काणो नवांशो द्वादशांशक । त्रिंशांशकश्च वर्गोऽस्य सर्वस्य समुदाहृतः ॥' इत्येवमन्येऽपि । आवसानं मरणान्तं यावत् ॥ कामिनी परस्त्रीकरण हेतुर्यस्य स । शेष स्पष्टम् ॥ २०—२६

रिष्फे बुधे बुधदृष्टे वा मन्दवत् ॥ १।२।३९ ॥ शुभदृष्टे स्थेयः ॥१।२।४० ॥ रवौ गुरुमात्रदृष्टे गोपालः ॥ १।२।४१ ॥ दारे चन्द्रशुक्रदृग्योगा-त्प्रासादः ॥ १।२।४२ ॥ उच्चग्रहेऽपि ॥ १।२।४३ ॥ राहुशनिभ्यां शिला-गृहम् ॥ १।२।४४ ॥ कुजकेतुभ्यामैष्टिकम् ॥ १।२।४५ ॥ गुरुणा दारवम् ॥ १।२।४६ ॥ तार्णं रविणा ॥ १।२।४७ ॥ समे शुभयोगाद्धर्मनित्यः सत्य-वादी गुरुभक्तश्च ॥ १।२।४८ ॥ अन्यथा पापैः ॥ १।२।४९ ॥ शनिराहुभ्यां गुरुद्रोहः ॥ १।२।५० ॥ रविगुरुभ्यां गुरावविश्वासः ॥ १।२।५१ ॥ तत्र भृग्वङ्गारकवर्गे पारदारिकः ॥ १।२।५२ ॥ दृग्योगाभ्यामधिकाभ्यामा-मरणम् ॥ १।२।५३ ॥ केतुना प्रतिबन्धः ॥ १।२।५४ ॥ गुरुणा स्त्रैणः ॥ १।२।५५ ॥ राहुणार्थनिवृत्तिः ॥ १।२।५६ ॥

रिष्फे (=२२/१२=१०) कारकांशाद्दशमे । मन्दवत् 'प्रसिद्धकर्माजीवः शनौ' इति व्यवहितसूत्रोक्त फल स्यात् । आचार्यस्यैव प्रणयनशैली । 'यथा–' मृत्युवज्जायामि-कणश्च १।२।७, इत्यत्र 'रिष्फे' इत्यादित्रिसूत्र्या स्वांशकाद् दशमभे फलान्युक्तानि ॥ स्थेय इति । 'स्थेयो विवादपक्षस्य निर्णेतरि पुरोहिते' इति मेदिनीकर. ॥ दारे (=२६/१२=४) कारकांशाच्चतुर्थे ॥ 'दारे' इत्यादिपदसूत्र्या स्वांशकात्सलिलभे फलान्यु-क्तानि ॥ समे (=४६/१२=९) कारकांशान्नवमे ॥ 'समे' इत्यादिनवसूत्र्या आत्मकारक-स्थाभ्नवमर्क्षे फलान्युक्तानि ॥ दृग्योगाभ्यामिति । स्वांशकाद् द्वितीये भृगुकुजान्यतर-षड्वर्गे भृगुकुजयोर्दृष्टियोगाभ्यामामरणात्पारदारिको भवति ॥ अत्र 'भृग्वङ्गारकवर्गे' इत्यनुवर्तनाद् 'अधिकाभ्याम्' इति वक्तुं शक्यम् ॥

स्वांशकात्तभवनेऽब्जगुरुभ्यां संयुते भवति हारि कलत्रम् ।
राहुणा तु विधवा शनिना स्याद्रोगिणी वद्धवयाः सुतपा वा ॥२७॥
जायते क्षितिभुवा विकलाङ्गी भास्वता स्वसदनेप्यवरुद्धा ।
चान्द्रिणा स्वबहुसप्तमराशौ संयुते सकलया कलयाढ्या ॥ २८ ॥

Sampath kumar Medavarapu

उक्तयोगघटने खलु कर्के कामिनीवदनसौरभचौरे ।
भावयन्ति कलिताखिलभावाः प्राग्वधूरतिमनाग्वृतदेशे ॥ २९ ॥
आत्मकारकलवात्सहजर्क्षे पापखेटकलिते खलु शूरः ।
जायते विमलखेचरयोगे साध्वसागमनकम्पितचेताः ॥ ३० ॥
स्वांशतः सहजशात्रवभावे क्रूरसंगिनि भवेत्कृषिकारी ।
वाक्पतौ नवमभे तु विशेषाज्जायते कृषिकलासु विदग्धः ॥ ३१ ॥

स्वांशकास्त्वेत्यादि—जायास्थाने राहुणाधिष्ठिते तु विधवा । पुनर्भूर्भार्या भवतीत्यर्थः ॥ सकलया संपूर्णया कलया चातुर्या; चतुःषष्टिसंख्यापरिच्छिन्नया वा आढ्या ॥ उक्तयोगघटने तत्तत्स्त्रीविशेषप्राप्तियोगघटनायां सत्याम् शेषं स्पष्टम् ॥ साध्वसं भयं तदागमनेन कम्पितं चेतो यस्येति । भीरुरित्यर्थः ॥ कृषिकला अर्थशास्त्रप्रतिपादिता नानाविधाः ॥ २७—३१ ॥

लाभे चन्द्रगुरुभ्यां सुन्दरी ॥१।२।५७॥ राहुणा विधवा ॥१।२।५८॥ शनिना वयोधिका रोगिणी तपस्विनी वा ॥१।२।५९॥ कुजेन विकलाङ्गी ॥१।२।६०॥ रविणा स्वकुले गुप्ता च ॥१।२।६१॥ बुधेन कलावती ॥१।२।६२॥ चापे चन्द्रेणानावृते देशे ॥१।२।६३॥ कर्मणि पापे शूरः ॥१।२।६४॥ शुभे कातरः ॥१।२।६५॥ मृत्युचिन्त्ययोः पापे कर्षकः ॥१।२।६६॥ समे गुरौ विशेषेण ॥१।२।६७॥

लाभे (=४३/१२=७) कारकांशात्सप्तमे 'लाभे' इत्यादिसप्तसूत्र्या 'स्वांशकास्त्वभवने' फलान्युक्तानि ॥ 'रविणा स्वकुले गुप्ता च' इत्यत्र चकारेण विकलाङ्ग्यपि ॥ चापे (=१६/६२=४) कर्के तत्तत्स्त्रीविशेषघटकयोगप्राप्तौ सत्यामनावृते देशे प्राथमिको भोग इति सर्वे । कारकांशात्सप्तमे धनुषि चन्द्रे चेति कृष्णानन्दसरस्वतीनीलकण्ठौ ॥ कर्मणि (=५३/१२=२) कारकांशात्तृतीये ॥ 'शुभे' कातरः, इत्यत्रापि तृतीय इति सेव्यते ॥ एवमग्रिमसूत्रे तृतीयस्थानलाभेऽपि मृत्युपदयोत्यं तत्कथनं मृत्युचिन्तयोः समुदायेनैकयोगतां बोधयति । मृत्युचिन्त्ययोः (१५/१२=२),(६६/१२=६) कारकांशात्तृतीयषष्ठयोः ॥ समे (=५४/१२=९) कारकांशान्नवमे । शेषं पद्यतः सुगमम् ॥

स्वांशतः शुभयुते शुभलोको द्वादशे शिखिविकासिनि मुक्तिः ।
मीनकर्कटगते तु विशेषात्पापभाजि तु भवेत्तदभावः ॥ ३२ ॥
द्वादशेऽर्कशिखिसंगिनि शंभौ शीतरश्मिसहिते तु भवान्याम् ।
भार्गवेण कलिते तु रमायां भक्तिरार्युजि शक्तिधरे स्यात् ॥ ३३ ॥

Sampath kumar Medavarapu

चन्द्रसूनुशनियोगिनि विष्णौ वागधीशयुजि साम्बशिवे धीः ।
राहुभाजि महिपासुरहन्त्र्यां तामसेऽपि विबुधे व्ययधाम्नि ॥ ३४ ॥
सध्वजे गणपतौ च षडास्ये पापमन्दिरमुपेयुषि मन्दे ।
भार्गवेऽपि च भवेन्मतिसक्तिः क्षुद्रदेवतगणे व्ययगेहे ॥ ३५ ॥
मन्त्रिकारकलवादरिभावेऽप्येवमेव विमृशेत्सुरभक्तिम् ।
स्वांशतो नवमपञ्चमगेहे मान्त्रिको भवति पापयुगाढ्ये ॥ ३६ ॥
पापयुग्मकलिते सुतपुण्ये क्रूरदृष्टियुजि निग्रहकर्ता ।
सौम्यखेचरनिरीक्षणसत्वे जायते द्रुतमनुग्रहकर्ता ॥ ३७ ॥

स्वाशत इत्यादि—कारकांशाद् द्वादशे शुभगते शुभग्रहाधिष्ठिते शुभलोकः । कर्मतारतम्येनतत्तल्लोकप्राप्तिरित्यर्थं । शिखिविकासिनि मुक्ति' विदेहमुक्ति स्यात् । सा च तत्त्वज्ञानिनो भोगेन प्रारब्धकर्मक्षये वर्तमानशरीरपातो भाविशरीरानारम्भो वा । कारकांशाद्वादशे मीनकर्काान्यतरगते शिखिविकासिनि तु विशेषान्मुक्तिर्जीवन्मुक्तिः स्यात् । सा च श्रवणादिभिरुत्पन्नसाक्षात्कारस्य विद्वत्सन्यासिनः कर्तृत्वाद्यखिलबन्धप्रतिभासनिवृत्ति । पापभाजि तु तयोः शुभलोकमुक्त्योरनाप्तिरलाभो भवेत् । अत्र केतोर्मुक्तिघटकतया न तत्प्रतिबन्धे कारणता । अचिन्त्या हि योगा. । केशवस्तु—'अन्त्ये कारकभागत शुभखगे स्याद्देवलोके नर.' केतौ द्वादशराशिगे शुभयुते चेत्कारकांशाद्भवेत् । मुक्तिर्मेषगते तु कार्मुकगते वा कारकांशे शुभेनाढ्ये मुक्तिरजे व्यये धनुषि वा केतुस्तु सायुज्यकृत्, ॥' इति व्याख्यातवान् ॥ कारकांशाद् द्वादशेऽर्कशिखिसंगिनि सूर्यकेतुभ्यां सहिते शम्भौ भक्ति स्यात् । शीतरश्मिना केवलेन चन्द्रेण सहिते तु भवान्यां भक्तिः । एवममेऽपि ॥ साम्बशिवे सकले ब्रह्मणि । वागर्थयोरिव सम्पृक्तयोः पार्वतीपरमेश्वरयोरित्यर्थः । तामसे विबुधेऽपि तमोगुणप्रधानदेवतायां धीर्भक्तियोग इति योजना । व्ययधाम्नि कारकांशाद् द्वादश इत्यर्थः ॥ पापमन्दिर पापग्रहराशिमुपेयुषि प्राप्ते । क्षुद्रदेवता भूतवेतालाद्याः ॥ मन्त्रीत्यादि स्पष्टम् । विशेष' सू॰भान्त.पाती ॥ ३२—३७ ॥

उच्चे शुभे शुभलोकः ॥१।२।६८॥ केतौ कैवल्यम् ॥१।२।६९॥ क्रियचापयोर्विशेषेण ॥१।२।७०॥ पापैरन्यथा ॥१।२।७१॥ रविकेतुभ्यां शिवे भक्तिः ॥१।२।७२॥ चन्द्रेण गौर्याम् ॥१।२।७३॥ शुक्रेण लक्ष्म्याम् ॥१।२।७४॥ कुजेन स्कन्दे ॥ १।२।७५॥ बुधशनिभ्यां विष्णौ ॥१।२।७६॥ गुरुणा साम्बशिवे ॥१।२।७७॥ राहुणा तामस्यां दुर्गायां च ॥१।२।७८॥ केतुना गणेशे स्कन्दे च ॥ १।२।७९॥ पापर्क्षे मन्दे क्षुद्रदेवतासु ॥ १।२।८० ॥

Sampath kumar Medavarapu

शुक्रे च ॥१।२।८१॥ अमात्यदासे चेवम् ॥१।२।८२॥ त्रिकोणे पापद्वये मान्त्रिकः ॥१।२।८३॥ पापदृष्टे निग्राहकः ॥१।२।८४॥ शुभदृष्टेऽनुग्राहकः ॥१।२।८५॥

उच्चे (=$\frac{६}{१२}$=१२) कारकांशाद् द्वादशे। उच्च इत्यादिवत्तु सूर्यालोकान्तरादिविचार ॥ शुभलोका भूरादयः। तथा च श्रूयते—'य एतद्ब्रह्मबालं नियमधीते स भूर्लोकं जयति स भुवर्लोकं जयति स सुवर्लोकं जयति स महर्लोकं जयति स जनलोकं जयति स तपोलोकं जयति स सत्यलोकं जयति स सर्वांल्लोकाञ्जयति' इति ॥ 'अश्व इव रोमाणि विधूय पापं चन्द्र इव राहोर्मुखात्प्रमुच्य। धूत्वा शरीरमकृतं कृतात्मा ब्रह्मलोकमभिसंभवामि॥' इति च ॥ कारकांशाद् द्वादशे केतौ कैवल्यम् । केवलस्य भावः ॥ क्रियचापयो॰ (=१२,$\frac{१२}{१२}$=४) मीनकर्कयो॰ कारकांशात् द्वादशगतयो केतुनाधिष्ठितयोर्विशेषेण कैवल्य मुक्ति स्यात् ॥ कारकांशाद्द्वादशे पापैरन्यथा न शुभलोको न वा कैवल्यम् ॥ 'रविकेतुभ्या' इत्यादि दशसूत्र्या परमेश्वरस्य लीलाविग्रहेषूपासनैकहेतुकी भक्तिर्हृद्दिष्टा। एक एव परमेश्वरोऽनेकधा श्रूयते—'इन्द्रं मित्रं वरुणमग्निमाहुरथो दिव्यः स सुपर्णो गरुत्मान्। एकं सद्विप्रा बहुधा वदन्त्यग्निं यमं मातरिश्वानमाहुः ॥' इति। 'एकं सन्तं बहुधा कल्पयन्ति' 'यो देवानां नामधा एक एव'। इति च। अतएव पातञ्जलदर्शने—'यथाभिमतध्यानाद्वा' इति सूत्रितम् ॥ कारकांशाद् द्वादशे पापैः क्षुद्रदेवताभक्तिघटकमन्दशुक्राभ्यामेकयोगे न कृतं, अन्यतरस्य तत्प्रयोजकत्वाद्। अवशिष्टानि सूत्राणि स्पष्टानि यततो व्याख्यातानि च ॥ अमात्येति सूत्रेणैव पदस्यारस्थाद्देवताभक्तिरितिदिश्यते तत्रापि तत्र तत्र सूत्रेषु प्रयुक्तेन दासशब्देन षष्ठो राशिरेव बुध्यतेऽन्यथा 'पितृनुचराद्' इत्यादिवद् 'अमात्यानुचरे च' इत्येव ब्रूयात्। ततोऽयमर्थ—अमात्यकारकाद्दासे (=$\frac{६}{६}$=६) षष्ठभावेऽप्येव पूर्वोक्तग्रहयोगे घटमाने तत्तद्देवताभक्ति स्यादिति तत्त्वम् ॥ 'त्रिकोणे' इति सूत्रत्रय्या मन्त्रसिद्धिप्रभाव सूच्यते। स्मर्यते च पातञ्जले—'जन्मौषधिमन्त्रतपःसमाधिजाः सिद्धयः' इति ॥

आत्मकारकलवे शशिसक्ते शुक्रदृष्टिघटिते रसवादी।
शीतरश्मिसहिते तदपत्यावेक्षिते तु भिषजं कथयन्ति ॥ ३८ ॥
बान्धवे तुहिनदीधितियुक्ते श्वेतकुष्ठकलितः कविदृष्टया।
भूमिनन्दनदृशा पृथुरोगो नीलकुष्ठनिरतो ध्वजदृष्ट्या ॥ ३९ ॥
बन्धुलग्नसदने कुजराह्वोः संस्थितौ रचयति क्षयरोगम्।
निश्चयेन हिमदीधितिदृष्ट्या भूसुतस्तु पिटकादिपरीतम् ॥ ४० ॥
बन्धुभे च सुतभे शिखियुक्ते जायते जलरुजा ग्रहणी वा।
सैंहिकेयगुलिकस्थितिसत्त्वे क्षुद्रकायविषवृत्तिविचित्रः ॥ ४१ ॥

Sampath kumar Medavarapu

आत्मकारकलवात्किल तुर्ये तिग्मरश्मिसुतभाजि धनुष्मान् ।
केतुसंगिनि भवेद्घटिकाकृच्चान्द्रिभाजि तु यती लगुडी वा ॥ ४२ ॥
स्वांशतः सुखगृहे तमयुक्ते लोहयन्त्रकलनासु विदग्धः ।
पद्मिनीरमणसंगिनि खड्गी जायते रुधिरयोगिनि कुन्ती ॥ ४३ ॥

आत्मकारकलव इत्यादि—तदपत्यं बुधः ॥ कुजराह्वोः संस्थितिरवस्थानम् ॥ जलरुजा जलरुक् ॥ घटिका कालसाधनयन्त्रम् । तच्च स्थिरचलभेदेनानेकस्वरूपम् । यती आत्मज्ञाननिष्ठः । लगुडी दण्डादिवाह्यलिङ्गमात्रधारी ॥ लोहयन्त्राणि यन्त्रादिप्रयुक्तानि नानाभङ्गिभाञ्जि । पद्मिनीरमणो रविः ॥ ३८—४३ ॥

शुक्रेन्दौ शुक्रदृष्टे रसवादी ॥१।२।८६॥ बुधदृष्टे भिषक् ॥ १।२।८७॥ चापे चन्द्रे शुक्रदृष्टे पाण्डुश्वित्री ॥१।२।८८॥ कुजदृष्टे महारोगः ॥१।२।८९॥ केतुदृष्टे नीलकुष्ठम् ॥ १।२।९०॥ तत्र मृतौ वा कुजराहुभ्यां क्षयः ॥१।२।९१॥ चन्द्रदृष्टौ निश्चयेन ॥१।२।९२॥ कुजेन पिटकादिः ॥१।२।९३॥ केतुना ग्रहणी जलरोगो वा ॥१।२।९४॥ राहुगुलिकाभ्यां क्षुद्रविषाणि ॥१।२।९५॥ तत्र शनौ धानुष्कः ॥१।२।९६॥ केतुना घटिकायन्त्री ॥१।२।९७॥ बुधेन परमहंसी लगुडी वा ॥१।२।९८॥ राहुणा लोहयन्त्री ॥१।२।९९॥ रविणा खड्गी ॥१।२।१००॥ कुजेन कुन्ती ॥१।२।१०१॥

शुक्रः (=$\frac{५}{१}\frac{५}{२}$=१) प्राथम्यात्कारकांश एव, तत्रेन्दौ वर्तमाने शुक्रेण दृष्टे रसवादी, मन्त्रक्रियाबलेन पारदादिरसनिर्माता ॥ 'बुधदृष्टे भिषक्' इत्यत्र 'शुक्रेन्दौ' इत्यनुवर्तते ॥ चापे (=$\frac{९}{१}\frac{६}{२}$=४) कारकांशाच्चतुर्थे चन्द्रे । शेषं स्पष्टम् ॥ चापे चन्द्रे, इत्यंशोऽग्रिमसूत्रयोरपि सबध्यते । तत्र कारकांशाच्चतुर्थे; मृतौ (=$\frac{६}{१}\frac{५}{२}$=५) पञ्चमे ॥ 'तत्र मृतौ' इति पदद्वयी 'चन्द्रदृष्टौ' इत्यादिसूत्रचतुष्टयी यावदनुवर्तते ॥ 'तत्र शनौ धानुष्कः', इत्यत्र केवलं तत्रेति ग्रहणान्मृताविति निवृत्तम् ॥ तथा 'तत्र' इति पदं 'केतुना' इत्यादिसूत्रपञ्चकेऽनुवर्तते ॥ इह शुक्रेन्दाविति सूत्राभ्यामगदकारयोगावभिधाय तदग्रिमेण सूत्राष्टकेन गदयोगा अभिहिता इति बहवः । तच्चिकित्सका इति कतिपये । तत्र लक्षणा स्वीकार्या । एवं पद्यास्तमप्युभयथा व्याख्यातुं सुशकम् । तत्र शनाविति सूत्रपञ्चकेन धनुराद्युपजीविनो निरूपिता इति ॥

आत्मकारकलवे तनये वा ग्रन्थरुद्भवति चन्द्रगुरुभ्याम् ।
किंचिदून इह चन्द्रकविभ्यां शीतदीधितिभुवा तु ततोऽपि ॥४४॥
स्वांशे सुते वा कविसंश्रयेण वाग्मी कविः काव्यविचक्षणः स्यात् ।
जीवेन सर्वत्र निविष्टबुद्धिर्ग्रन्थप्रणेतापि भवेन्न वाग्मी ॥४५॥
सवेदवेदाङ्गविमर्शकारी विशिष्य वैयाकरणोऽपि तत्र ।
सभाजडो भास्करनन्दनेन मीमांसकः स्याच्छिशिरारुणेण ॥ ४६ ॥

कणादवाणीवरणे प्रवीणो नैयायिकः स्यात्क्षितिनन्दनेन ।
निशाधिनाथेन स सांख्ययोगे साहित्यगानेऽपि निविष्टबुद्धिः ॥४७॥
वैदान्तिको गीतकलासु कल्यः प्रजायते पङ्कजबान्धवेन ।
तत्तद्विधा जालजटालमेये शिखावता स्याद्गणितेऽग्रगण्यः ॥ ४८ ॥
वागीशसंबन्धविशेषसत्त्वे सत्संप्रदायाकलनेषु सिद्धः ।
स्वांशाद् द्वितीयेऽपि विचार्यमेतत्केचित्तृतीयेऽपि विचारयन्ति॥४९॥

आत्मकारकश्च इत्यादि । ततोऽप्यूनो ग्रन्थकृदिति योजना ॥ स्वांशे सुत इत्यादय उपजातयः । वाग्ग्मी वाचोयुक्तिपटुः । काव्यं कविकर्म, तत्र विचक्षणः । सर्वत्र निविष्टबुद्धिः । अपरिचितेऽपि वस्तुनि प्रक्रममाणमतिरिति तात्पर्यम् ॥ वेदा ऋग्यजुःसामाथर्वाणः तद्ब्राह्मणानि ॥ वेदाङ्गानि शिक्षादयः षट् । तथा च मुण्डके श्रूयते— 'तत्रापरा ऋग्वेदो यजुर्वेदः सामवेदोऽथर्ववेदः शिक्षा कल्पो व्याकरणं निरुक्तं ज्योतिषामिति' इति । वैयाकरणः । व्याकरणं शब्दानुशासनम्, तच्च प्रातिशाख्यसूत्रवार्तिकभाष्यात्मकम् । मीमांसकः । मीमांसा, भगवता जैमिनिना प्रणीता द्वादशाध्यायी ॥ नैयायिकः । न्यायो न्यायदर्शनं भगवता गौतमेन प्रणीतं पञ्चाध्यायात्मकम् । 'प्रमाणैरर्थपरीक्षणं न्यायः' इति वात्स्यायनः । कलादवाणीवरणे प्रवीण इति प्रपञ्चार्थम् । कणादवाणी भगवता कणादेन प्रणीतं वैशेषिकदर्शनं दशाध्यायात्मकम् । सांख्यं भगवता कपिलेन प्रणीतं षडध्यायात्मकम् । योगो भगवता पतञ्जलिना प्रणीतं पादचतुष्टयात्मकम् । साहित्यं अलंकारशास्त्रम्, तत्र भावसाधनोऽलंकारशब्दः । गानं गान्धर्वविद्या अष्टादशसु परिसंख्याता । वैदान्तिकः । वेदान्तः भगवता कृष्णद्वैपायनेन प्रणीतश्चतुरध्यायात्मकः । गीतकलाः गीतान्येव कलाः, न तु गीतानि च कलाश्चेति द्वन्द्वः । कल्यः कुशलः । तत्तद्विधा जालजटालमये गणिते ताः ता दुरूहतया गाणितिकलोके प्रसिद्धा या विधाः प्रकाराः तासां जालैः प्रपञ्चैर्जटिलानि सकुलानि मेयानि उपपत्तयो यत्र तादृशे, गणिते पाट्यादिचलान्ते ॥ संप्रदायाः हिरण्यगर्भादिगुरुपरम्परया प्रमिता विषयाः । स्वांशादितिमतभेदेन सारस्वतविचाराणामतिदेशो । शेषं स्पष्टम् ॥४४–४९॥

मातापित्रोश्चन्द्रगुरुभ्यां ग्रन्थकृत् ॥१।२।१०२॥ शुक्रेण किंचिदूनम् ॥१।२।१०३॥ बुधेन ततोऽपि ॥१।२।१०४॥ शुक्रेण कविर्वाग्ग्मी काव्यज्ञश्च ॥१।२।१०५॥ गुरुणा सर्वविद् ग्रान्थिकश्च ॥१।२।१०६॥ न वाग्ग्मी ॥१।२।१०७॥ विशिष्यवैयाकरणो वेदवेदान्तविच्च ॥१।२।१०८॥ सभाजडः शनिना ॥१।२।१०९॥ बुधेन मीमांसकः ॥१।२।११०॥ कुजेन नैयायिकः ॥१।२।१११॥ चन्द्रेण सांख्ययोगज्ञः साहित्यज्ञो गायकश्च ॥१।२।११२॥ रविणा वेदान्तज्ञो गीतज्ञश्च ॥१।२।११३॥ केतुना गणितज्ञः ॥१।२।११४॥ गुरुसंबन्धेन संप्रदायसिद्धिः ॥१।२।११५॥ भाग्ये चैवम् ॥१।२।११६॥ सदा चैवमित्येके ॥१।२।११७॥

Sampath kumar Medavarapu

मातापित्रोः (=$\frac{६\,१}{१\,२}$=५,$\frac{६\,१}{१\,२}$=१) कारकांशात्पञ्चमे कारकांशे वा चन्द्रगुरुभ्यां वर्तमानाभ्यां ग्रन्थकृत् ॥ 'मातापित्रोः' इति शुक्रेणेत्यादित्रयोदशसूत्रेषु सबध्यते । 'शुक्रेण' अनेनाग्रे कव्यादिफलस्य वक्ष्यमाणत्वाच्चन्द्रशुक्राभ्यामित्युचितम् । किंचिदूनं यथा स्यात्तथा ग्रन्थकृत् ॥ भाग्ये (=$\frac{४\,४}{१\,२}$=२) कारकांशाद् द्वितीये चैवं पूर्वोक्तग्रहयोग· फलं ग्रन्थकर्तृत्वादि समूह्यम् ॥ सदा (=$\frac{८\,७}{१\,२}$=३) कारकांशात्तृतीयेऽप्येवं फलं वाच्यमि· त्येके आचार्याः समामनन्ति । मातापित्रोरित्यादि षोडशसूत्र्या विद्यायोगा दर्शिताः ॥

स्वांशाद् द्वितीये शिखिना समेते स्यात् स्तब्धवाक् क्रूरखगेन दृष्टे ।
केमद्रुमः स्वाच्च तनूपदाच्च धने च रन्ध्रेऽपि च पापसाम्ये ॥ ५० ॥
दारिद्र्यदुःखानलगन्धवाहः केमद्रुमः सोऽब्जदृशा बलीयान् ।
भानां खगानां च फलानि पाके भवन्ति भव्याशयकल्पितानि ॥५१॥

स्वांशादित्यादि । स्वस्मात् कारकात् । तनूपदात् लग्नारूढात् लग्नाच्च । दारिद्र्यदुःख· मेव पीडोत्पादकत्वेनानलोऽग्निस्तत्रोद्दीपकत्वेन गन्धवाहोऽनिल इत्यर्थः । स केमद्रुमो योग· पाकावतारे स्वस्वदशायाम् । भव्याशयः सत्यवादी सत्यवादो वा । तेन कल्पि· तानि विविच्य निर्दिष्टानि । शेषं स्पष्टम् ॥ ५०–५१ ॥

भाग्ये केतौ स्तब्धवाक् ॥१।२।११८॥ स्वपितृपदाद्भाग्यरोगयोः पाप· साम्ये केमद्रुमः ॥ १।२।११९॥ चन्द्रदृष्टौ विशेषेण ॥१।२।१२०॥ सर्वेषां चैव पाके ॥१।२।१२१॥

भाग्ये ($\frac{४\,४}{१\,२}$=२) कारकांशाद् द्वितीये केतौ पापदृष्टे सति स्तब्धवाक् शीघ्रकथना· समर्थः । स्व आत्मकारक प्रकरणात्, न तु स्वशब्देन पितृपदे विशिष्येते । पिता (=$\frac{६\,७}{१\,२}$=१) लग्नम् , पदं लग्नपदं, स्वश्च पिता च पदं चेति स्वपितृपदम् तस्मात् स्वपि· तृपदाद्, भाग्यरोगयो· (=$\frac{४\,४}{१\,२}$=२,$\frac{३\,२}{१\,२}$=८) द्वितीयाष्टमयोः पापसाम्ये केमद्रुमाख्यो योग । स च चन्द्रदृष्टौ सत्यां विशेषेण भवति । परिपूर्ण इत्यर्थः । सर्वेषां राशीनां ग्रहाणां चापि फलानि पाके स्वस्वपाककाले भवन्तीति ॥

अथ द्वितीयपादपदार्थानुपसंहरति—

इत्युक्तः शशधरयाण (५१) संख्यपद्यैः
शास्त्रार्थो मुनिवचनानुरुद्ध एव ।
तेनायप्रशमितसंशयावतारं
छात्राणां नतिलतिका प्रतानिनी स्यात् ॥ ५२ ॥

इत्युक्त इति । स्पष्टम् ॥ ५२ ॥ आदित. पद्यसंख्या ३६+५१=८७।

इति श्रीजैमिनिपद्यामृतवृत्तौ मकरन्दलया द्वितीयः प्रवाहः ॥

Sampath kumar Medavarapu

अथ तृतीयः प्रवाहो विविच्यते । तत्र प्रथमं तावन्मुनीन्द्रप्रणमनपूर्वकमारूढकुण्डलीफलकीर्तनं सहेतुकं प्रतिजानीते—

फलितागमतत्त्वदर्शकं मुनिवर्यं प्रणमन्पदाश्रयात् ।
फलमुद्धृतसंशयोदयं दयमानं पिपठीःषु कीर्तये ॥ १ ॥

फलितेति । फल्यते निष्पद्यते शुभाशुभमनेनेति फलितं तदेव ऋष्यादिपरम्परया गमनादागमः तस्य यत्तत्त्वं रहस्यं तद्दर्शकमुपदेष्टारम् उक्तं चाचार्यविष्णुगुप्तेन—'अप्यर्णवस्य पुरुषः प्रतरन्कदाचिदासादयेदनिलवेगवशेन पारम् । न तस्य कालपुरुषाख्यमहार्णवस्य गच्छेत्कदाचिदनृषिर्मनसापि पारम् ॥' इति । मुनिवर्यं भगवन्तं जैमिनिं प्रणमन् तं प्रति प्रह्वीभवन् पिपठीःषु पिपठिषुषु छात्रेषु दयमानोऽनुकम्पितहृदयः सन्नहम् उद्धृत उन्मूलितः संशयोदयः संदेहप्रसरो यस्मिन्कर्मणि तद्यथा स्यात्तथा फलमादेशं पदाश्रयादारूढकुण्डल्यवलम्बनात्कीर्तये प्रतिपादये ॥ १ ॥

अथ पदम् ॥१।३।१॥

अथशब्दोऽधिकारार्थः । पदमारूढमधिकृतं वेदितव्यम् । ततः फलं वक्तव्यमित्यर्थः । पदशब्देन प्रधानतो लग्नपदं जन्मलग्नारूढं गृह्यते ॥

अथारूढकुण्डली ।



Sampath kumar Medavarapu

श्रीमन्तं लाभं चाह—

सखगे खगदृष्टिसंयुते पदलाभे(११)कमलाविलासभाक् ॥
शुभयुक्तनिरीक्षिते नयादनयादाप्तिरितोऽन्यथा भवेत् ॥ २ ॥

सखगे इति । पदादारूढाल्लाभे एकादशे सखगे खगदृष्ट्या संयुते कमलाविलासभाक् । श्रीमानित्यर्थः । पदलाभे शुभयुक्ते शुभनिरीक्षिते नयान्न्यायादाप्तिर्लाभः । इतोऽन्यथा पापयुक्ते पापदृष्टे अनयादन्यायादाप्तिर्भवेत् ॥ २ ॥

व्यये सग्रहे ग्रहदृष्टे श्रीमन्तः ॥१।३।२॥ शुभैर्न्याय्यो लाभः ॥१।३।३॥ पापैरमार्गेण ॥१।३।४॥

व्यये (=११) पदादेकादशस्थाने । शेषं स्पष्टम् ॥ अधिकलाभं श्रीमन्तं फलाविशेषं चाह—

धनलब्धिरतीव जायते निजतुङ्गादिगते ग्रहे भवे (११) ।
पदतो धनभे(२)कलाधिभूगुरुशुक्राद्युषिते श्रियां पदम् ॥ ३ ॥
धनधाम्नि निजोच्चराशिगद्युचरालम्बिनि लक्ष्मणो भवेत् ।
इह कारकभागवत्फलं कथयेत्प्राय उदीरितेतरत् ॥ ४ ॥

धनलब्धिरित्यादि । भवे पदादेकादशे निजतुङ्गादिगते ग्रहे सत्यधिका धनलब्धिः । आदिना 'स्वोच्चसुहृत्स्वत्रिकोणनवांशैः स्थानबलं स्वग्रहोपगते च' इति संग्रहः । पदत आरूढाद् धनभे द्वितीये कलाधिभूगुरुशुक्राद्युषिते सति श्रियां संपदां पदं निवासः स्यात् धनधाम्नि द्वितीयभावे निजोच्चराशिगद्युचरावलम्बिनि उच्चस्थग्रहाधिष्ठिते सति लक्ष्मणः श्रीमान् भवेत् उदीरितेतरत् । कथितादन्यत् फलं कारकभागवद् कारकांशकुण्डल्यामिवेहापि पदकुण्डल्यां कथयेत् प्रायो बाधकाभावे ॥ ३–४ ॥

उच्चादिभिर्विशेषात् ॥ १।३।५ ॥ चन्द्रगुरुशुक्रेषु श्रीमन्तः ॥१।३।१५॥ उच्चेन वा ॥१।३।१६॥ स्वांशवदन्यत्प्रायेण ॥१।३।१७॥

पदादेकादशे उच्चादिभिरुच्चादिस्थितग्रहैर्विशेषाल्लाभः । पदादेकादश इति पूर्वतो लभ्यते ॥ पदाद् द्वितीये चन्द्रगुरुशुक्रेषु वर्तमानेषु श्रीमन्तः । बहुवचनमविवक्षितम् । पदाद् द्वितीय इति पूर्वसूत्रतोऽनुवर्तते । अनुवृत्तिज्ञानार्थमेवात्र सूत्राणामग्रेऽध्यायपादसूत्राङ्का योजिताः ॥ पदाद् द्वितीये उच्चेन उच्चस्थग्रहेण वा श्रीमन्तः ॥ स्वांश इव स्वांशवत् कारकांशकुण्डल्यामन्यद् यद्यत्फलं निरूपितं तत्तत्सर्वत्र प्रायेण बाधकाभावे संभाव्यं बाधकसत्त्वे तु त्याज्यम् ॥

श्रीमतां तत्प्रतिबन्धकं विशिष्टधनं चाह—

सुत (५) धर्म(९)गतेऽथवा चतुष्टयगे(१।४।७।१०) दारपदे पदं श्रियाम् ।
यदि तत्र न भामिनीपदं मनुजाः श्रीकरुणाविवर्जिताः ॥ ५ ॥

Sampath kumar Medavarapu

पदसप्तमयोः प्रजायते बहुदिष्ट्यार्गलपापरोधया ।
यदि तत्र पुनः शुभार्गलं धनवृद्धिः प्रथते विशेषतः ॥ ६ ॥

सुतेत्यादि । दारपदे सप्तमभावपदे लग्नपदात्सुतधर्मगते त्रिकोणस्थे चतुष्टये केन्द्रस्थे वा श्रियां पदं भवेत् । यदि तत्र दारपदं न स्यात् तदा मनुजाः श्रीकरुणाविवर्जिताः स्युः । पदसप्तमयोः लग्नपदतत्सप्तमयोः । सप्तमीद्विवचनम् । अपरोधया निष्प्रतिबन्धया बहुभाग्यं स्यात् । यदि पुनः पदसप्तमयोः शुभार्गलं भवेत्तदा तु विशेषतो धनवृद्धिः प्रथते॥५-६॥

लाभपदे केन्द्रे त्रिकोणे वा श्रीमन्तः ॥१।३।१८॥ अन्यथा दुःस्थाः ॥१। ३।१९॥ पत्नीलाभयोर्दिष्ट्या निराभासार्गलया ॥१।३।२२॥ शुभार्गले धनसमृद्धिः ॥१।३।२३ ॥

लाभः (=$\frac{४३}{१}$=७) सप्तमो भावः तत्पदे तदारूढे लग्नारूढात्केन्द्रे त्रिकोणे वा श्रीमन्तः । स्थानबहुत्वेन बहुवचनम् ॥ अन्यथा केन्द्रत्रिकोणवर्जितस्थाने दुःस्था दुःखिनः । 'दुःस्थे' इति पाठे सप्तमभावपदं पञ्चाष्टमव्ययगतं न भवतीति द्रष्टव्यम् ॥ पत्नी (=१) लाभयोः (=$\frac{४३}{१}$=७) लग्नपदतत्सप्तमयोर्निराभासार्गलया निष्प्रतिबन्धार्गलया दिष्ट्या भाग्यं स्यात् । दिष्टेत्यव्ययम् । 'दिष्ट्याम्ब ते कुक्षिगतः परः पुमान्' इति श्रीभागवतम् ॥ लग्नपदतत्सप्तमयोः शुभार्गले साभासेऽपि धनसमृद्धिः स्यात् ॥ पूर्वसूत्रे तु निराभासार्गले भाग्यमिति विवेकः । अत्र वृद्धः—'यस पापः शुभो वापि ग्रहस्तिष्ठेच्छुभार्गले । तेन दृष्टेक्षितं लग्नं प्राबल्यायोपकल्पते । यदि पश्येद्ग्रहस्तं न विपरीतार्गलस्थितः ॥ इति विशेषमाह स्म ।

राजयोगानाह—

नृप एकखगेन वीक्षिते जनिहोराघटिकाविलग्नके ।
अथवात्र विलग्नसप्तमे भवनांशत्रिलवावगाहिना ॥ ७ ॥
यदि चैकमपीह खण्डितं क्षितिपत्वे विकलत्वमादिशेत् ।
अनयैव दिशा दृकाणतो नवमांशाद्य परामृशेदिदम् ॥ ८ ॥
निजकारकतो द्विसागराशुगनागेषु (२।४।५।८) शुभे समे नृपः ।
स्वत एव तृतीयषष्ठयोः खलखेटे तुलिते धराधिपः ॥ ९ ॥
इति योगयुगं विचारयेत्तनुजायाभवनेशयोरपि ।
इह मिश्रनभश्चरस्थितौ मनुजः पार्थिवसंनिभो भवेत् ॥ १० ॥

नृप इत्यादि । 'जनिहोराघटिकाविलग्नके' तत्तत्कुण्डल्यां जन्मलग्ने होराख्ये घटीलग्ने एकेन खगेन वीक्षिते सति नृपः स्यात् । लग्नत्रये यः कोऽप्येको दृष्टः समानदृष्टेति तात्पर्यम् । अथवात्र राश्यंशद्रेष्काणवशाल्लग्नसप्तमे दृष्टे नृपः । एतदुक्तं भवति— जन्महोरादिषु कुण्डलीषु यौ लग्नसप्तमौ भावौ तन्नैकग्रहदृष्ट्या नृपः स्यात् । यदि च एकमपि इह जनिहोराघटिकाविलग्नके भवनांशत्रिलवे खण्डिते न्यूनं तदाँश्लेषण-

Sampath kumar Medavarapu

तारतम्येन क्षितिपत्वे विकलत्वं वैकल्यमादिशेत् कथयेत्। तादृशदृश्यग्रहदर्शनाभावेन न्यूनो राजयोग इति भावः। अनयैव दिशा प्रकारेण नवमांशाद् दृकाणतश्चेदं सर्वं परामृशेद् विभावयेत्। अयं भावः—जन्मलग्नाश्रितनवांशकुण्डल्यां होरालग्नाश्रितनवांशकुण्डल्यां घटीलग्नाश्रितनवांशकुण्डल्यां तथा जन्मलग्नाश्रितद्रेष्काणकुण्डल्यां होरालग्नाश्रितद्रेष्काणकुण्डल्यां घटीलग्नाश्रितद्रेष्काणकुण्डल्यां च लग्नादिष्वेकग्रहदृष्टेषु राजानो भवन्ति। वृद्धोऽपि—'विलग्नघटिकालग्नहोरालग्नानि पश्यति। उच्चग्रहे राजयोगो लग्नद्वयमथापि वा॥ राशेर्दृकाणतोऽशाच्च राशेरंशादथापि वा। यद्वा राशिदृकाणाभ्यां लग्नद्रष्टा तु योगदः॥' इति। 'जन्मकालघटीलग्नेष्वेकैकेनेक्षितेषु तु। उच्चारूढे तु संप्राप्ते चन्द्राकान्ते विशेषतः॥ क्रान्ते वा गुरुशुक्राभ्यां केनाप्युच्चग्रहेण वा। दुष्टार्गलग्रहाभावे राजयोगो न संशयः॥ इति च।

स्वतः कारकादेव। तुलिते संख्यया समे। इति योगयुगमिति। एतदुक्तं भवति—तनुजायाभवनेशयोरपि सकाशाद् द्विसागराशुभनागेषु शुभे समे सति तथैवात्मकारकात्तृतीयषष्ठयोः खलखेटे तुलिते सति राजा स्यात्। शेषं स्पष्टम्॥ ७—१०॥

जन्मकालघटिकास्वेकदृष्टासु राजानः ॥१।३।२४॥ पत्नीलाभयोश्च राश्यंशकदृक्काणैर्वा ॥१।३।२५॥ तेष्वेकस्मिन्न्यूने न्यूनम् ॥१।३।२६॥ एवमंशतो दृकाणतश्च ॥१।३।२७॥ स्वभाग्यदारमातृभावसमेषु राजानः ॥१।३।३०॥ कर्मदासयोः पापयोश्च ॥१।३।३१॥ पितृलाभाधिपाच्चैवम् ॥१।३।३२॥ मिश्रे समाः ॥१।३।३३॥

जन्मकालघटिकासु, जन्मलग्नहोरालग्नघटीलग्नेष्वित्यर्थः॥ जन्मकालघटिकासु पत्नी (=१) लग्नम्, लाभः (=४३/३=७) सप्तमः तयोः पत्नीलाभयोर्लग्नसप्तमभावयोरेकग्रहदृष्टयोः राश्यंशकदृक्काणवशाद्राजानो वा॥ तेष्वेकस्मिन्न्यूने न्यूनमिति सूत्रेण किंचिद्वैकल्यं प्रतिपाद्यते। तदर्थस्त्वेवम्—ताश्च तानि च तानि 'नपुंसकमनपुंसकेनैकवच्चान्यतरस्याम्' इत्येकशेषः। तेषु जन्मकालघटिकासु राश्यंशकदृक्काणेषु चैकस्मिन्न्यूने सति न्यूनं राजत्वमित्यर्थः॥ एवमंशतो दृकाणतश्चेति जन्मसूत्रोक्तराजयोगस्यातिदेशः॥

अत्रैवं राजयोगानामुच्चावचश्रेण्यः—जन्महोराघटीकुण्डलीषु जन्मलग्ने, सप्तमे, जन्मलग्नसप्तमयोः; होरालग्ने, सप्तमे, होरालग्नसप्तमयोः; घटीलग्ने, सप्तमे, घटीलग्नसप्तमयोः; एकस्य ग्रहस्य राश्यंशद्रेष्काणवशाद् दृष्टौ सत्यां नव राजयोगाः। जन्महोराघटीलग्नेषु चैक इति दशयोगाः। एवं जन्मलग्नादिनवमांशकुण्डलीषु दश, जन्मलग्नादिद्रेष्काणकुण्डलीषु दशयोगाः। अथ जन्महोराघटीलग्नेषु त्रिषु, तत्सप्तमेषु त्रिषु, लग्नतत्सप्तमद्वन्द्वेषु त्रिषु प्रत्येकं राश्यंशवशाद् राशिद्रेष्काणवशाद् अंशद्रेष्काणवशाद् एकग्रहस्य दृष्टौ सप्तविंशती राजयोगाः। तथा जन्महोरालग्नयोः, जन्मघटीलग्नयोः होराघटीलग्नयोः राश्यंशद्रेष्काणवशाद् एकग्रहदृष्टौ त्रय इति सप्तविंशत्या सह त्रिंशद्राजयोगाः। एवं नवांशकुण्डलीषु त्रिंशद् द्रेष्काणकुण्डलीषु त्रिंशदिति सर्वे संभूय विंशत्युत्तरं शतं राजयोगाः॥

Sampath kumar Medavarapu

स आत्मकारकः तस्माद् भाग्य(=$\frac{१}{१}\frac{४}{२}$=२) दार(=$\frac{३}{१}\frac{४}{२}$=४)मातृ(=$\frac{६}{१}\frac{५}{२}$=५) भावेषु (=$\frac{४}{१}\frac{४}{२}$=८) द्वितीयचतुर्थपञ्चमाष्टमेषु स्थानेषु समेषु समसंख्येषु शुभेषु शुभग्रहेषु राजानः ॥ आत्मकारकात् कर्म (=$\frac{५}{१}\frac{१}{२}$=३) दासयोः (=$\frac{८}{१}\frac{६}{२}$=६) तृतीयषष्ठभावयोः समयोः पापयोः सत्वे राजानः । पितृ (=$\frac{६}{१}\frac{१}{२}$=१) लाभयोः (=$\frac{४}{१}\frac{३}{२}$=७) लग्नसप्तमयो-रधिपाचैवं द्वितीयचतुर्थपञ्चमाष्टमभावेषु समेषु शुभेषु, तथा तृतीयषष्ठभावयोः समयोः पापयोः सत्वे राजान इत्यर्थः ॥ इह शुभपापमिश्रणे सति समाः राजतुल्यविभूतय इत्यर्थः॥

दारिद्र्यमाह—

यदि योगयुगे शुभालये मलिनाः स्युर्मलिनालये शुभाः ।
ध्रुवमत्र तदा दरिद्रता मुनिचूडामणिनोपदिश्यते ॥ ११ ॥

यदीति । यदि निजकारकत इति श्लोकोक्ते योगयुगे । शेषं स्पष्टम् ॥ ११ ॥

दरिद्रता विपरीते ॥१।३।२४॥

विपरीते 'स्वभाग्य' इति सूत्रोक्ते शुभस्थाने पापा एव, पापस्थाने 'कर्म' इति सूत्रोक्ते शुभा एव, तर्हि दरिद्रता स्याद् ॥

यानं वैतानिकं राजकीयं सेनानीं राजचिह्नं चाह—

अवलोकितयोः परस्परं दनुजाचार्यकुमुद्वतीशयोः ।
अथवा त्रिगृहान्तरस्थयोर्जनिमाञ्जायत एव यानवान् ॥ १२ ॥
गतवत्सु निकेतने क्वचित् क्षितिभूदानवपूज्यकेतुषु ।
मिथ ईक्षणकर्तृषु क्षमापतिलक्ष्मा खलु जायते जनः ॥ १३ ॥
उदयप्रमदाधिपात्सुते रजनीप्रेयसि वागधीश्वरे ।
दितिसूनुपुरोहितेऽथवा मनुजा भूरमणाधिकारिणः ॥ १४ ॥
तनुसप्तमवेश्मवल्लभात् सहजे (३) वा परिपन्थिसद्मनि
मलिनेन खगेन संयुते पृतनाशासनतत्परो भवेत् ॥ १५ ॥
निजकारकतश्चतुर्थगौ क्षणदानायकदैत्यमन्त्रिणौ ।
कुरुतो नृपलक्ष्मलाञ्छितं जनमातोद्यतरङ्गसंगिनम् ॥ १६ ॥

अवलोकितयोरित्यादि । दनुजाचार्यः शुक्रः । कुमुद्वतीशश्चन्द्रः । अथ परस्परं त्रि-गृहान्तरस्थयोः सतोः । तथा च वृद्धः—चन्द्रः क्वापि कविश्चन्द्रं पश्यत्यपि तृतीयगे । शुक्राच्चन्द्रे ततः शुक्रे तृतीये वाहनार्थवान् ॥ इति । क्षितिभूदानवपूज्यकेतुषु कुजशुक्र-केतुषु । क्षमापती राजा तल्लक्ष्मा, राजचिह्नवानित्यर्थः । उदयो लग्नं, प्रमदा सप्तमभावः, तदधिपात् सुते पञ्चमे रजनीप्रेयसि चन्द्रे, वागधीश्वरे गुरौ; अथवा दितिसूनुपुरोहिते शुक्रे सति मनुजा भूरमणाधिकारिणो राजकीयाः स्युः ॥ तनुसप्तमवेश्मनी लग्नसप्तम-भावौ तद्वल्लभात् तदधीशात् परिपन्थिसद्म षष्ठो भावः। पृतना सेना तच्छासने, तत्परो

Sampathkumar Medavarapu

भवेत् ॥ नृपलक्ष्मलाञ्छितं नृपचिह्नविशिष्टम् । ततं वीणादिकं वाद्यमानद्धं मुरजादिकम् । वंशादिकं तु सुषिरं कांस्यतालादिकं घनम् ॥ चतुर्विधमिदं वाद्यमातोद्यमिति संकेत्यते । शेषं स्पष्टम् ॥ १२—१६ ॥

शुक्रचन्द्रयोर्मिथो दृष्टयोः सिंहस्थयोर्वा यानवन्तः ॥१।३।२८॥ शुक्रकुजकेतुषु वैतानिकाः ॥१।३।२९॥ मातरि गुरौ शुक्रे चन्द्रे वा राजकीयाः ॥१।३।३५॥ कर्मणि दासे वा पापे सेनान्यः ॥१।३।३६॥ स्वदारगयोः शुक्रचन्द्रयोरातोद्यं राजचिह्नानि च ॥१।३।४५॥

यत्र क्वापि वर्तमानयोर्मिथोदृष्टयोः शुक्रचन्द्रयोः; वा मिथः सिंह (=५७/१२=३) स्थयोः तृतीयस्थानं गतयोः शुक्रचन्द्रयोः, शुक्राच्चन्द्रे तृतीयगे वा चन्द्राच्छुक्रे तृतीयगे यानवन्तो भवेयुः ॥ यत्र क्वापि वर्तमानेषु परस्परमवलोकयत्सु शुक्रकुजकेतुषु वैतानिका राजलक्ष्माणः । वितानोऽग्निविस्तृतिरिति दृष्ट्या याज्ञिका इति केचित् ॥ मातरीति । पितृलाभाधिपादित्यनुवर्तते । लग्नाधिपात् सप्तमाधिपाच्च मातरि (=६५/१२=५) पञ्चमे गुरौ शुक्रे चन्द्रे वा राजकीयाः ॥ लग्नाधिपात् सप्तमाधिपाच्च कर्मणि (=४१/१२=३) तृतीये दासे (=५६/१२=६) षष्ठे वा पापे सेनान्यः सेनापतयः ॥ स्वाद् आत्मकारकाद् दाराः (=३६/१२=४) चतुर्थो भावः, तान् गच्छत इति दारगौ । तयोः शुक्रचन्द्रयोः सतोरातोद्यं वादित्रं राजचिह्नानि छत्रचामरादीनि स्युः ॥

अनेकधा व्ययं तत्रातिदेशं चाह—

पदतो युतिवीक्षणे व्यये सदसन्मिश्रकृते व्ययो महान् ।
रविराहुसितैर्नृपाद् व्ययो विधुदृष्ट्या तु विनिश्चयाद्भवेत् ॥ १७ ॥
शशिजेन सगोत्रवादतो गुरुणा स्यात्करमूलको व्ययः ।
कुजसौरिसमाश्रिते व्यये भवति भ्रातृमुखात्खलु व्ययः ॥ १८ ॥
व्ययगैर्व्यय ईरितो यथा धनलाभोऽपि तथैव लाभगैः ।
गगनेचरयोगदृष्टितः परिचिन्त्यो मतिमद्भिरादरात् ॥ १९ ॥

पदत इत्यादि । पदत आरूढाद् व्यये सदसन्मिश्रकृते शुभाशुभमिश्रसंपादिते युतिवीक्षणे ग्रहाणां योगनिरीक्षणे सति महान् व्ययः । लग्नपदात् द्वादशे शुभे सत्कर्मनिमित्तको व्ययः, अशुभे असत्कर्मनिमित्तको व्ययः, शुभाशुभग्रहद्वययोगे संकीर्णकर्मनिमित्तको व्यय इति तात्पर्यम् ॥ सगोत्रवादतः सगोत्रादायादाः वादो विवादः ताभ्याम्, अथवाग्रे भ्रातृमुखादिति दर्शनाद् 'विवादबन्धुतः' इति पठनीयम् । तत्र बन्धवः परिभाविता ये केचन चेति द्रष्टव्यम् । करमूलकः, राजादिदेयद्रव्यं कर इत्युच्यते । स मूलं कारणं यस्य स करमूलकः । भ्रातृमुखात्, भ्रातरः सहजाः मुखशब्देन पितृव्यपुत्रादयः ॥ व्ययगैर्व्यय इति लाभविचारार्थमतिदेशः । गगनेचरयोगदृष्टितः ग्रहयुतिविलोकनाभ्यामित्यर्थः । शेषं स्पष्टम् । तथा च वृद्धाः—'आरूढाद्व्ययभवनं ग्रहः पश्येत्तु न व्ययम् । यस्य जन्मनि सोऽपि स्यात्प्रबलो धनवानपि । दृष्टग्रहाणां बाहुल्ये तदा प्रभूरि

Sampath kumar Medavarapu

शुभगे । सार्गले चापि तत्रापि यद्गर्गलसमागमे ॥ शुभग्रहार्गले तत्र तत्राप्युच्चग्रहार्गले सुखानि स्वामिना दृष्टे लग्नभाग्याधिपेन वा । जातस्य पुंसः प्रावल्यं निर्दिशेदुत्तरोत्तरम्। इति ॥ १७–१९ ॥

नीचे ग्रहद्वययोगाद् व्ययाधिक्यम् ॥१।३।६॥ रविराहुशुक्रैर्नृपात् ॥१।३।७॥ चन्द्रदृष्टौ निश्चयेन ॥१।३।८॥ बुधेन ज्ञातितो विवादाद्वा॥१।३।९॥ गुरुणा करमूलात् ॥१।३।१०॥ कुजशनिभ्यां भ्रातृमुखात् ॥१।३।११॥ एतैर्व्यय एवं लाभः ॥१।३।१२॥

नीचे (=$\frac{६}{२}$=१२) लग्नपदाद् द्वादशे । 'एवं लग्नपदाद्' इत्यग्रिमेषु पञ्चसु सूत्रेषु संबध्यते । सेयं पञ्चसूत्री स्पष्टार्था पद्यतो व्याख्याता च ॥ एतैरिति । यथा द्वादशस्थानगतैरेतैर्ग्रहैर्व्यय उक्तः, एवमेव एकादशस्थानगतैरेतैर्लाभोऽप्युच्यते ॥

उदरामयं सद्योवार्धकं स्त्रीपुंसयोरनुरागं कलहं चाह—

पदतो हि कलत्रभे शिखी यदि वाशुश्च तदोदरामयः ।
धनसद्मनि केतुसंयुते घटते वार्धकलक्ष्म सत्वरम् ॥ २० ॥
यदि तिष्ठति केन्द्र (१।४।७।१०) कोणक (५।९) त्रिखलाभे (३।१०।११) स्तपदं तदा भवेत् ।
प्रमदापुरुषानुकूलतातनयादिष्वपि चिन्तयेदद: ॥ २१ ॥
यदि लग्नपदाद्वधूपदं पततिद्वादश(१२) रन्ध्र(८) शत्रुषु (६)।
बहुवैरकथाव्यवस्थितिः प्रमदापूरुषयोर्गृहस्थितिः ॥ २२ ॥

पदतो हीत्यादि । यदि वा अगू राहुः। घटते संगच्छते॥ अस्तपदं सप्तमपदम् । अद इदमुक्तं तनयादिष्वपि चिन्तयेदिति फलातिदेशः ॥ यदि लग्नपदादित्यत्रापि 'तनयादिष्वपि मैत्रीवद्वैरमपि विचार्यम् इति सिध्यति ॥ तथा च वृद्धाः—'आरूढौ पुनमिंत्रोस्तु त्रिलाभे केन्द्रगौ यदि । द्वयोर्मैत्री त्रिकोणे तु साम्यं द्वेषोऽन्यथा भवेत् ॥ एवं दारादिभावानामपि पत्रादिमित्रता । जातकद्वयमालोक्य चिन्तयन्तीयं विचक्षणैः ॥ इति ॥ २०–२२ ॥

लाभे राहुकेतुभ्यामुदररोगः ॥१।३।१३॥ तत्र केतुना झटिति ज्यानिलिङ्गानि ॥१।३।१४॥ केन्द्रत्रिकोणोपचयेषु द्वयोर्मैत्री ॥१।३।२०॥ रिपुरोगचिन्तासु वैरम् ॥१।३।२१॥

लाभे (=$\frac{४}{१}\frac{३}{२}$=७) लग्नपदात्सप्तमे ॥ तत्र (=$\frac{३}{१}\frac{६}{२}$=२) लग्नपदाद् द्वितीये केतुना झटिति अनवसर एव ज्यानिः जीर्णता, तस्या लिङ्गानि चिह्नानि स्युः ॥ लग्नपदात् सप्तमपदे केन्द्रत्रिकोणोपचयेषु वर्तमाने द्वयोः स्त्रीपुंसयोर्मैत्री । अत्रोपचयपदं षष्ठातिरिक्तं बोध्यमग्रिमसूत्रानुरोधात् ॥ लग्नपदाद् रिपु (=$\frac{२}{१}\frac{१}{२}$=१२) रोग (=$\frac{२}{१}\frac{३}{२}$=८) चिन्तासु (=$\frac{६}{१}\frac{६}{२}$=६) द्वादशाष्टमषष्ठभावेषु सप्तमपदे वर्तमाने द्वयोः स्त्रीपुंसयोर्वैरं स्यात् ॥

Sampath kumar Medavarapu

बुद्धिमत्सुखिदरिद्रव्ययशीलबलिन आह—

तनुकारकयोस्ततस्त्रिपड्गतदृष्ट्या त्रिपडीश्वरेक्षया ।
अथवा तनयेशवीक्षया धिषणद्ध्यो धिषणायते जनः ॥ २३ ॥
तनुकारकयोस्ततः सुखाधिपदृष्ट्या सुखभाक् प्रजायते ।
उदये निजकारकेऽपि चाष्टमपेक्षा कुरुते दरिद्रताम् ॥ २४ ॥
तनुकारकयोस्ततो व्ययाधिपदृष्ट्या व्ययकारको भवेत् ।
उदये तदधीशवीक्षिते बलिनो जन्म तथात्मकारके ॥ २५ ॥

तनुकारकयोरित्यादि । तनुकारकयोरिति सप्तमीद्विवचनम् । ततः तनुकारकाभ्यामित्यर्थः। त्रिपड्गतदृष्ट्या तृतीयषष्ठस्थग्रहावलोकनेन; त्रिपडीश्वरेक्षया तृतीयषष्ठस्वामिदृष्ट्या; अथवा तनयेशवीक्षया पञ्चमेशावलोकनेन, धिषणद्ध्यो बुद्धिसम्पत्त्या धिषणायते। धिषणो बृहस्पतिः स इवाचरति । क्यङ् ॥ उदये लग्ने । अष्टमपेक्षा अष्टमेशस्यावलोकनम् ॥ तथा आत्मकारके तदधीशवीक्षिते । कारकेशदृष्टे इत्यर्थः ॥ २३-२५ ॥

स्वपितृभ्यां कर्मदासस्थदृष्ट्या तदीशदृष्ट्या मातृनाथदृष्ट्या च धीमन्तः ॥१।३।३७॥ दारेशदृष्ट्या सुखिनः ॥१।३।३८॥ रोगेशदृष्ट्या दरिद्राः ॥१।३।३९॥ रिपुनाथदृष्ट्या व्ययशीलाः ॥१।३।४०॥ स्वामिदृष्ट्या प्रबलाः ॥१।३।४१॥

स आत्मकारकः, पिता (=$\frac{६१}{१२}$=१) लग्नम् , ताभ्यामात्मकारकपितृभ्यां सकाशात् कर्म (=$\frac{५१}{१२}$=३) तृतीयो भावः, दाराः (=$\frac{७८}{१२}$=६) षष्ठः, तत्स्थग्रहदृष्ट्या; वा तदीशदृष्ट्या; माता (=$\frac{६५}{१२}$=५) पञ्चमो भावः, तन्नाथदृष्ट्या च अर्थादात्मकारके लग्ने च धीमन्तः ॥ 'स्वपितृभ्याम्' इति दारेशेत्यादिसूत्रचतुष्टयेऽन्वेति ॥ आत्मकारके लग्ने च दाराः (=$\frac{२८}{१२}$=४) चतुर्थो भावस्तदीशदृष्ट्या सुखिनः ॥ आत्मकारके लग्ने च रोगः (=$\frac{३२}{१२}$=८) अष्टमो भावस्तदीशदृष्ट्या दरिद्राः ॥ आत्मकारके लग्ने च रिपुः (=$\frac{१२}{१२}$=१२) द्वादशो भावस्तन्नाथदृष्ट्या व्ययशीलाः ॥ आत्मकारके लग्ने च स्वामिदृष्ट्या प्रबलाः स्युः ॥

अनेकधा बन्धनमाह—

तनुतोऽर्कदृशो (१२।२) त्रिकोणके (५।९) रविरिष्फगे (१२।६)र्भवतीतिहोभयोः (११।३) ।
अथवा सुखकर्मसद्मनो (४।१०) ग्रहसाम्ये सति बध्यते जनः ॥२६॥
इह भावतदीयनायके शुभसंबन्धिनि बध्यते मृदु ।
निगडेन निबध्यते नरः खलसंसर्गिणि ताड्यतेऽपि च ॥२७ ॥

तनुत इत्यादि । वीतिहोत्रोऽग्निः । बध्यते इति बध्नातेः कर्मणि लट् ॥ भावाः 'तनुतोऽर्कदृशो.'— इत्यादिना पठिताः तदीयनायकाः तत्स्वामिनः तेषां समाहारः

Sampath kumar Medavarapu

भावतदीयनायकं तस्मिन् । अथवा 'भावतदीश्वरद्विके' इति पाठः । मृदुमन्दं यथा स्यात्तथा कारागारे रुध्यते । भावतदीयनायके खलखगिणि सति निगडेन बन्धनशृङ्खलया निबध्यते नियन्त्र्यते कशादिना ताड्यतेऽपि च । इति प्रारम्भतः सप्तविंशतिर्वैतालीयानि ॥ २६–२७ ॥

पश्चाद्रिपुभाग्ययोर्ग्रहसाम्ये बन्धः कोणयो रिपुजाययोः कीटयुग्मयोर्दाररिष्फयोश्च ॥१।३।४२॥ पञ्चमृक्षाणां तदीशानां च शुभसंबन्धे निरोधमात्रं पापसंबन्धाच्छृङ्खलाप्रहारादयः ॥१।३।४३॥

पश्चात् (=$\frac{१}{१}\frac{३}{२}$=१) लग्नात् रिपु (=$\frac{१}{१}\frac{२}{२}$=१२) भाग्ययो (=$\frac{१}{१}\frac{४}{२}$=२) द्वादशद्वितीययोः, कोणयो पञ्चमनवमयोः, रिपु (=१२) जायये (=$\frac{१}{१}\frac{६}{२}$=६) द्वादशषष्ठ्यो, कीट (=११) युग्मयो (=$\frac{५}{१}\frac{३}{२}$=३) एकादशतृतीययो, दार (=$\frac{२}{१}\frac{६}{२}$=४) रिष्फयो (=$\frac{२}{१}\frac{२}{२}$=१०) चतुर्थदशमयोर्वा ग्रहसाम्ये एकश्चेद् एक, द्वौ चेद् द्वौ, त्रयश्चेद् त्रय इति रीत्या ग्रहसमतायां घटमानायां बन्ध स्यात् ॥ एवमृक्षाणामिति स्पष्टं पद्यतो व्याख्यातं च ॥

नेत्रहानिमाह—

लग्नस्थानात्पञ्चमारूढवर्ती सिंहीसूनुर्भास्वता दृश्यमानः ।
नेत्रध्वंसी जायतेऽत्र प्रवीणैः शास्त्राकूतं कीर्त्यतां भावयित्वा ॥२८॥

लग्नस्थानादिति । शास्त्राकूत जैमिनीयागमतात्पर्यम् । शालिनीवृत्तमेतत् ॥ २८ ॥

शुक्राद् गौणपदस्थो राहुः सूर्यदृष्टो नेत्रहा ॥१।३।४४॥

शुक्रात् (=$\frac{२}{१}\frac{५}{२}$=१) लग्नात् । ग्रहादिति केचित् । गौणस्य (=$\frac{५}{१}\frac{३}{२}$=५) पञ्चमस्य यत्पदमारूढस्य तत्स्थ सूर्येण दृष्टो राहुर्नेत्रहा स्यात् ॥

अथ तृतीयपादपदार्थानुपसंहरति—

इत्युक्तो विषधरदस्र (२८) संख्यपद्यैः
शास्त्रार्थो मुनिवचनानुरुद्ध एव ।
तेनाद्य प्रशमितसंशयावतार
छात्राणां मतिसरणिः परिष्कृता स्यात् ॥ २९ ॥

इति श्रीदुर्गाप्रसादद्विवेदरचिते जैमिनिपद्यामृते पदफलोद्देशो नाम तृतीयः प्रवाहः श्रीसद्गुरुचरणार्पणमस्तु । आदित पद्यसंख्या ८७+२८=११५। इत्युक्त इति सष्टम् ॥२९॥

इति श्रीजैमिनिपद्यामृतवृत्तौ मूलकन्दल्यां तृतीय प्रवाहः ॥

Sampath kumar Medavarapu

अथ चतुर्थः प्रवाहो विविच्यते—

तत्र पूर्वं मुनीश्वरप्रशंसनपुरःसरमुपपदफलनिरूपणं प्रतिजानीते—

सुनिपुणमिह भूतं वर्तमानं भविष्य-
त्करबदरसमानं ज्ञायते यत्प्रसादात् ।
तमखिलनिगमज्ञं कर्मविज्ञं प्रशंस-
न्नुपपदफलजातं वक्ति दुर्गाप्रसादः ॥ १ ॥ (मालिनी)

सुनिपुणमिति । सुनिपुणमव्यभिचरितम् । भूतं वर्तमानं भविष्यदिति कालत्रयेण वस्तुनो वस्तुवशेन कालस्येत्यवस्थानियम् । ननु कालस्याखण्डत्वे कथमित्थं व्यवहार, औपाधिक इति गृहाण । उपाधिश्च दिगादिसम्बन्धेन नैकधा । 'अपरस्मिन्नपरं युगपच्चिरं क्षिप्रमिति काललिङ्गानि' । 'इत इदमिति यतस्तद्दिश्यं लिङ्गम्', इति भगवान् कणाद कालदिशोरनुमितौ लिङ्ग्यते ज्ञायतेऽनेनेति लिङ्ग प्रमाणमाह । तत्त्रयमपि दिग्देशाभ्यां द्विधा भिद्यते । दिशापि भेदस्य निर्वाहे पलाशादिप्रतिपत्त्यर्थं देशसाहित्यमभ्युपेयम् । सन्निकर्ष इव विप्रकर्षेऽपि शास्त्रक्रियासंस्कृत ज्ञान न प्रतिबध्यते । तथा चाह भगवान् पतञ्जलि —'परिणामत्रयसंयमादतीतानागतज्ञानम्' । इत्यादि । एतेन फलव्यभिचार-मुत्प्रेक्षमाणानामायुष्मतामाक्षेपशङ्का. 'तदप्रामाण्यमनृतव्याघातपुनरुक्तदोषेभ्य.', इति पूर्वपक्षविधयाऽक्षपादोक्तमङ्गिनोऽप्रामाण्यमिवोद्धर्तव्या प्रतिभानवद्भि । शेषं स्पष्टम् । अत्र सर्वत्र छन्दोनाम तत्र तत्र मूले निर्दिष्टमेव ॥ १ ॥

उपपदात्फले वक्तव्ये किं तावदुपपदमिति जिज्ञासां पूरयति—

इह समासबलाद् धन (२) रिष्फयोः (१२)
पदमुशन्ति किलोपपदं विदः ।
विषमतासमतावशतस्तनो-
स्तदुपयोग इति ब्रुवतेऽपरे ॥ २ ॥ (द्रुतविलम्बितम्)

इह समासबलादिति । 'पित्रनुचरात्', इति सौत्रपदस्य समासबलात् षष्ठीतत्पुरुष-बहुव्रीह्योराश्रयणात् । तनोर्विषमतासमतावशत तदुपयोग, लग्ने विषमे द्वितीयस्य पदमुपपदं, लग्ने समे द्वादशस्य पदमुपपदम् । इति तयोर्द्वितीयद्वादशभावाभ्यां साधि तयो पदयोरुपयोगश्चारितार्थ्यमित्यपरे नवीना ब्रुवते, गणनावैचित्र्यबलेनोत्प्रेक्षन्त इत्यस्माभिरुदास्यते । विशेष सूत्रवृत्तौ ॥ २ ॥

उपपदं पदं पित्रनुचरात् ॥१।४।१॥

पित्रनुचरात् पदमुपपदं स्यादिति योजना । पिता (=६/१ २/२=१) लग्नम्, आयु पितृदिनेशाभ्यामित्यादौ तथा प्रयोगात् । अनु पश्चात् चरति गच्छतीत्यनुचर, पृष्ठचर इति यावत् । भ्रमलक्षणादौ तथा प्रयोगात् । पितुरनुचर. पित्रनुचर तस्मात् पित्रनुचरात् लग्नद्वादशात् यत्पद यावदीशाश्रयं पदमृक्षाणामित्यनेन तदुपपदम् । लग्नाद

Sampath kumar Medavarapu

7943

द्वादशस्य यत्पदं तदुपपदसंज्ञं स्यादित्यर्थः । राशीनां संनिवेशानुसारेण कुण्डल्यां गणनाक्रमेण चोपनतस्य द्वादशस्य व्ययसंज्ञया व्यवहृतस्य लग्नपृष्ठवर्तित्वेनानुचराभिधानं सोपपत्तिकम् ॥ अत्रायं प्राचां व्याख्याविकल्पः—'यद्वा अनुचरतीत्यनुचरो लग्नाद् द्वितीयो भावः । तस्य लग्नोद्गमनानन्तरमेवोद्गमात् तथैव चक्रसंचारात् लग्नद्वितीयपदमुपपदमित्यर्थः । अत्र 'पितृ-अनुचरात्', इति पदच्छेदः । यदि 'पित्रनुचरात्', (=२६०६१/१२=९) इत्येवाखण्डं तर्हि नवमानुचरात् अष्टमाद् दशमाद्वेति विज्ञेयम् । यद्वा 'पित्र्यानुचरात्' (=११) इति पाठे एकादशानुचराद् द्वादशादित्यर्थः सुगम एव । यद्वा 'पित्र्यानुचरात्', (=२६०११/१२=७) इति पश्चाक्षराङ्कवशेन सप्तमात्पदमुपपदम् । सप्तमं च जन्मलग्नादेरिति ज्ञेयम् । वस्तुतस्तु 'पितुरनुचरात्' इति पाठः समुचितः । यद्वा आरूढानां पदमुपपदमित्यर्थः । पितुरनुचरादनुरोधेनागतात्पदाद् यावदीशाश्रयमिति रीत्या पदानां सर्वेषां पदमानेयमिति यावत् । इति कृष्णानन्दसरस्वती । 'पित्र्यानुचरात्' इत्यखण्डात्सप्तसंख्यालाभं पन्थोऽप्यादृतवान् । इदमपि बोध्यम्—पितृलग्नमनुचर द्वितीयं यस्येति बहुव्रीहिणा द्वादशभावबोध इति नीलकण्ठः । पितुरनुचर इति तत्पुरुषेण धनभाव इति साम्याशयः । अत एव 'इह समासबलाद् धनरिष्फयोः पदमुशन्ति किलोपपदं विदः' इत्युक्तम् ॥

अथोपारूढकुण्डली ।



Sampath kumar Medavarapu

स्त्रीसंबन्धीनि फलान्यष्टभिश्छन्दोभिराह—

उपपदभवनेऽथवा द्वितीये मलिनगृहे खलखेटसंश्रिते वा।
प्रशमितवनितोऽथवा परिव्राड् भवति न योगकृतौ खरांशसिंहौ ॥ ३ ॥
(पुष्पिताग्रा)

असिन्योगे सदृग्योगे। न प्रव्रज्या योषिन्नाशः ॥ ४ ॥ (कन्या)

तत्र धने वा नीचसुपेते। दारविनाशं शंसति सूत्रम् ॥ ५ ॥ (पङ्क्तिः)

उपपदमुच्चं श्रयदथवार्थः। घटयति पुंसां शशिवदना स्त्रीः ॥ ६ ॥
(शशिवदना)

यद्यत्र च तिष्ठेद्राशिर्मिथुनाख्यः। नूनं तनुमध्या योषा विदधाति ॥ ७ ॥
(तनुमध्या)

उपपदेऽथवा कुटुम्बके स्वपतिभाजि, वा तदीश्वरे।
स्वभवनस्थ उत्तरायुषि प्रलयमश्नुते मनोरमा ॥ ८ ॥ (मनोरमा)

उपपदधनपे निजतुङ्गगे मिलति हि गृहिणी जननोज्ज्वला।
अधरभवनभाजि तु नीचजा विमलद्युतिदृशा हृदयंगमा ॥ ९ ॥ (उज्ज्वला)

उपपदधनमे सिंहीतनूजद्युमणिसुतयुते निन्दापुटेन।
धरणिदुहितृवत्संत्यज्यते वा विलयनमयते क्लेशाकुलास्त्री ॥ १० ॥ (पुटः)

उपपदभवन इत्यादि। प्रशमिता शान्ता मृता वनिता स्त्री यस्य स प्रशमितवनितः ॥ सतः शुभस्य दृग्योगो यस्मिन् स सदृग्योगः तस्मिन् ॥ तत्र उपपदे शंसति कथयति। सूत्रं कर्तृ ॥ उच्चं श्रयद् गच्छद् उपपदम्, अथवा अर्थो द्वितीयभाव उच्चं श्रयन्निति लिङ्गविपरिणामेनान्वयः ॥ अत्र चोपपदे द्वितीये वा। योषाः कर्म। विदधाति संपादयति ॥ स्वपतिभाजि स्वामियुक्ते वा तदीश्वरे उपपदकुटुम्बनाथे स्वभवनस्थे सति उत्तरायुषि वार्धके मनोरमा स्त्री प्रलयं नाशमश्नुते प्राप्नोति। मनोरमादिशब्दाः स्त्रीविशेषवाचका अपि छन्दोनामग्रहणदृष्ट्या प्रयुक्ताः ॥ उपपदधनपे उपपदस्वामिनि धनस्वामिनि चेत्यर्थः। अधरभवनं नीचरादिः ॥ सिंहीतनूजो राहुः। द्युमणिसुतः शनिः। निन्दापुटः सार्वजनीनोऽपवादः। धरणिसुता भगवती जनकनन्दिनी। तस्या अपि त्यागो लयश्च बभूवेति रामायणम्। अयते गच्छति। शेषं स्पष्टं सूत्रतो व्याख्यातं च ॥ ३—१० ॥

तत्र पापस्य पापयोगे प्रव्रज्या दारनाशो वा ॥१।४।२॥ नात्र रविः पापः ॥१।४।३॥ शुभदृग्योगान्न ॥ १।४।४ ॥ नीचे दारनाशः ॥ १।४।५॥ उच्चे बहुदारः ॥ १।४।६॥ युग्मे च ॥१।४।७॥ तत्र स्वामियुक्ते स्वर्क्षे वा तदे-

Sampath kumar Medavarapu

तावुत्तरायुषि निर्दाराः ॥ १।४।८॥ उच्चे तस्मिन्नुत्तमकुलाद्दारलाभः ॥१। ४।९॥ नीचे विपर्ययः ॥१।४।१०॥ शुभसंबन्धात्सुन्दरी ॥१।४।११॥ राहुश- निभ्यामपवादात्त्यागो नाशो वा ॥१।४।१२॥

अधिकाराद् उपपदे; तत्र (=३६=२) उपपदाद् द्वितीये वा, पापस्य पापग्रहस्य राशौ सति, पापयोगे सति वा प्रव्रज्या संन्यासः, दारनाशः स्त्रीनाशो वा स्यात् । नील- कण्ठस्तु 'उपपदे' इति पक्षं नाङ्गीकुरुते । 'आरूढात्तु धने पापस्वामिके पापसंयुते । संन्यासो वा कलत्रस्य नाशो भवति निश्चितम् ॥' इति केशवोऽपि । आरूढमुपपदम् ॥ अत्र द्वितीयसूत्रोक्तफले रविः पापत्वेन न गृह्यते । तेन तत्स्वामिकस्य सिंहस्यापपत्वं सिद्धम् ॥ 'शुभदृग्योगात्' इत्यत्रापि रवेरपापत्वं संपातायातम् ॥ नीचोच्चे परिभाषिते एव ॥ युग्मे (=५३=३) उपपदे द्वितीये वा मिथुनराशौ सति बहुदारः स्यात् ॥ तत्र (=३६=२) उपपदे द्वितीये वा स्वामियुक्ते सति; स्वर्क्षेऽन्यस्मिन् स्वराशौ, तद्वेतौ तच्छब्देन पूर्वपरामर्शाद् उपपदद्वितीयौ गृह्येते । नीलकण्ठमतेन द्वितीय एव गृह्यते । तयोः तस्य वा हेतुर्लिङ्गं स्वामीति तात्पर्यम् । तस्मिन् राशि । अन्यस्मिन् राशौ स्वामि- युक्ते वेति निष्कृष्टार्थः । शेषं स्पष्टम् । दारकारके शुक्रे बुधतुलयोरन्यतरस्मिन् स्थिते सति वा अनित्यदारकारके स्वराशौ स्थिते वोत्तरायुषि निर्दारः स्यादिति, तथा चोत्त- रेषु त्रयोदशसूत्रेषु दारकारकः संबध्यते इति च, विशेषः स्वामिग्रन्थे स्वे इति सूत्र- द्वयी स्पष्टा । तत्र का नाम उत्तमता? यत्प्रशस्तभूता अधमता; या शुक्रशोणितसं- सर्गजनितोऽतिशय इति ब्रूमः । तथाच भगवान् मनुः—'वर्णापेतमविज्ञातं नरं कलुष- योनिजम् । आर्यरूपमिवानार्यं कर्मभिः स्वैर्विभावयेत् ॥ अनार्यता निष्ठुरता क्रूरता निष्क्रियात्मता । पुरुषं व्यञ्जयन्तीह लोके कलुषयोनिजम् ॥ पित्र्यं वा भजते शीलं मा- तुर्वोभयमेव वा । न कथंचन दुर्योनिः प्रकृतिं स्वां नियच्छति ॥' इति ॥ एतद्वैपरीत्येन सुयोनिता व्याख्याता ॥ उपपदे द्वितीये वा शुभवर्गदृष्टियोगे सति सुन्दरी स्त्री स्यात् ॥ अपवादो 'लोकापवादाद् भयम्' इत्यादौ हेयत्वेनोक्तः ॥

पुनरपि स्त्रीसंबन्धीनि फलान्यष्टभिराह—

दैत्यपुरोधःशिखिनावत्र स्व रक्तप्रदरम् ।
यच्छत इन्दोस्तनयः केतुश्चास्थिस्रवणम् ॥ ११ ॥ (माणवकम्)
सहस्रांशुसैंहीतनूजन्ममन्दाः ।
कुरुङ्क्षेक्षणाया ह्यस्थिज्वराय ॥ १२ ॥ (सोमराजी)
अत्रावस्थितिमाप्तौ राकेशात्मजकेतू ।
कुर्वाते नियमेन स्थूलाङ्गीं मदलेखाम् ॥१३॥ (मदलेखा)
उपपदद्रविणगे धरणिभूबुधगृहे ।
कुजशनैश्चरयुते नसि रुजा मृगदृशः ॥१४॥ (गजगतिः)

Sampath kumar Medavarapu

इह च सुरगुरुद्युमणिसुतयतिः ।
श्रवणरुजमथो दिशति नरहकाम् ॥ १५ ॥ (मधुमती)
इह गतौ गुरुतमौ वितरतो रदरुजाम् ॥ १६ ॥ (सती)
निशां प्राप्तावुपपदधनगे कुम्भे मीने सवितृसुततमौ ।
सीमन्तिन्याः पवनभवगदं दत्तो यद्वा गमनविकलताम् ॥ १७ ॥
(भ्रमरविलसितम्)
उपपदभे धनधाऽप्यथवा शुभखगदृष्टिसमागमने ।
कथितरुजा कलितावयवा न भवति जन्मवतां सुमुखी ॥ १८ ॥
(सुमुखी)

दैत्यपुरोध इत्यादि । अत्र उपपदे तद्वितीये वा । एवमग्रेऽपि । यच्छतः दत्तः 'दाण् दाने' इत्यस्य यच्छादेशे रूपम् ॥ सिद्धीतनूजन्मा राहुः ॥ राकेशात्मजो बुधः । मदलेखां यौवनमदमन्थरामिति तात्पर्यम् ॥ नसि नासिकाया रुजा रोगः ॥ द्युमणिसुतः शनिः । नरहका 'नहरुवा' इति ख्यातो जङ्घागतो रोगः, प्रकरणविरोधान्न तु विपक्ष्येति । वितरतो दत्तः । तम इत्यदन्तः ॥ पवनभवगदं वातरोगम् । गमनविकलतां पङ्गुभावम् ॥ कथितरुजा कलितावयवा उक्तरोगाक्रान्ता । सुमुखी स्त्री ॥ शेषं स्पष्टं सूत्रतो व्याख्यातं च ॥ ११—१८ ॥

शुक्रकेतुभ्यां रक्तप्रदरः ॥ १।४।१३॥ अस्थिस्रावो बुधकेतुभ्याम् ॥ १।४।१४॥ शनिरविराहुभिरस्थिज्वरः ॥ १।४।१५ ॥ बुधकेतुभ्यां स्थौल्यम् ॥१।४।१६॥ बुधक्षेत्रे मन्दाराभ्यां नासिकारोगः ॥ १।४।१७ ॥ कुजक्षेत्रे च ॥१।४।१८॥ गुरुशनिभ्यां कर्णरोगो नरहका च ॥१।४।१९॥ गुरुराहुभ्यां दन्तरोगः ॥१।४।२०॥ शनिराहुभ्यां कन्यातुलयोः पङ्गुर्वातरोगो वा ॥१।४।२१॥ शुभदृग्योगान्न ॥१।४।२२॥

उपपदद्वितीययोः शुक्रकेतुभ्यां स्थिताभ्यां स्त्रिया रक्तप्रदराख्य आमयो भवति । एवमग्रेऽपि व्याख्येयम् । कन्यातुलयोः कन्या (=११) कुम्भः, तुला (=$\frac{3}{1}\frac{5}{2}$=१२) मीनः ॥

पूर्वफलानामतिदेशं तत्र विशेषं च पद्मिराह—

उपपदगृहतः फलद्यालयाच्चद्धिगतखगात्तदीयांशकात् ।
विकसितधिषणाप्रभाभासुरैर्गणितफलमिदं विचार्य धने ॥ १९ ॥ (प्रभा)
एतेभ्यो यदि धर्ममन्दिरे वर्तेरन्बुधसौरिभार्गवाः ।
कुर्वन्ति हानपत्यमंशुमत्स्वर्भान्वङ्गिरसो बहून्सुतान् ॥ २० ॥ (शुद्धविराट्)
यदामुतः शुभालयं चकोरबन्धुराश्रयेत् ।
तदैकमात्मसंभवं भणन्ति सूत्रवेदिनः ॥ २१ ॥ (प्रमाणिका)

Sampath kumar Medavarapu

यद्येतेभ्यः शुभगृहमध्ये मिश्राः खेटाः समधिगताः स्युः ।
पुत्रोत्पत्तिर्भवति विलम्बादत्र प्राज्ञैर्वलमपि वेद्यम् ॥ २२ ॥ (मत्ता)
चेदितो नवमभवने तिष्ठतो रुधिररविजौ ।
तर्हि पुंस इह कुरुतो दत्तकं प्रचुरकलहम् ॥ २३ ॥ (हलमुखी)
ओजराशिभाजि पुण्यभावे (९) तेभ्य एव भूरिदारकाः स्युः ।
युग्मऋक्षगे तु तत्र पुंसां जायते किलाल्पता प्रजानाम् ॥ २४ ॥
(मयूरसारिणी)

उपपदगृहत इत्यादि । उपपदगृहतः उपपदात् यः कलत्राख्यः सप्तमो भावः तस्मात्, तदधिगतो यो ग्रहः तस्मात्, तन्नवांशकाच्च । धने द्वितीये इदं भणितफलं कथितं फलजातं विकसितधिषणाप्रभाभासुरैः विकसिता उन्मीलिता या धिषणा बुद्धिः,तस्या या प्रभा नवनवोन्मेषः तद्भासुरैर्जातकज्ञैविद्वद्भिर्विचार्यम् ॥ एतेभ्य उक्तस्थानेभ्यः सकाशाद् । एवमग्रेऽप्येकोनविंशश्लोकोक्तानि स्थानानि बोध्यानि । अंशुमत्स्वर्भान्वङ्गिरसः रविराहुगुरवः ॥ चकोरबन्धुः चन्द्रमाः । मिथः अपलापनपलकारकाः । भत्रेति संभवाभिप्रायेण ॥ दत्तकमिति । 'दद्यान्माता पिता वायं स पुत्रो दत्तको भवेद्' इति याज्ञवल्क्यः । दत्तकस्वीकारे दायादानां परस्परं विवादात् प्रचुरकलहमिति विशेषणम् ॥ प्रजानां संततीनाम् ॥ १९—२४ ॥

सप्तमांशग्रहेभ्यश्चैवम् ॥ १।४।२३ ॥ बुधशनिशुक्रेष्वनपत्यः ॥ १।४।२४॥ पुत्रेषु रविराहुगुरुभिर्बहुपुत्रः ॥ १।४।२५ ॥ चन्द्रेणैकपुत्रः ॥१।४।२६॥ मिश्रे विलम्बात्पुत्रः ॥१।४।२७ ॥ कुजशनिभ्यां दत्तपुत्रः ॥१।४।२८॥ ओजे बहुपुत्रः ॥१।४।२९॥ युग्मेऽल्पप्रजः ॥ १।४।३० ॥

उपपदाद् यः सप्तमो भावः, यश्च तद्भाववर्ती ग्रहो नवांशश्च तेभ्यः सकाशादेवं पूर्वोक्तानि फलानि समुन्नेयानि ॥ बुधेति । अग्रिमसूत्रात् 'पुत्रेषु' इति सम्बध्यते । 'पुत्रेषु' इति न पृथक्सूत्रं न वा बुधशनीति सूत्रानुयोगि तथैव पाठस्वारस्यात् । ततश्चायमर्थः— उपपदाद् यथा व्याख्यातसप्तमांशग्रहेभ्यः सकाशात् नवमभावेषु बुधशनिशुक्रेषु वर्तमानेष्वनपत्यो निःसंतानः स्यात् ॥ नीलकण्ठमते तु पुत्रपदस्यानुवर्तनाभावे विभक्तिविपरिणामेनान्वये च उपपदात्सप्तमांशग्रहेषु बुधशनिशुक्रेषु सत्सु अपत्यहीनो भवतीति वाक्यार्थः संपद्यते ॥ उपपदात्सप्तमांशग्रहेभ्यः पुत्रेषु (=३/१=९) नवमभावेषु रविराहुगुरुभिर्बहुपुत्रः स्यात् । नीलकण्ठस्तु पुत्रपदस्य यथाश्रुतमर्थमुपादाय यथासंबन्धं पञ्चमस्थानमिति व्याख्यातवान् ॥ मिश्रे विलम्बात् । अनुवर्तनात्पुत्र इति लब्धुं शक्यम् ॥ ओजयुग्मशब्दौ प्रसिद्धार्थावेव ॥

Sampath kumar Medavarapu

पूर्वोक्तलातिदेशं विशेषं च सप्तभिराह—

उदयभतत्पतितस्तत एवात्मजभवनाच्च तदीयनभोगात्।
अथ च तद्दशकतः प्रतिभावाल्ललितपदं निगदेत्फलजातम् ॥ २५ ॥
(ललितपदम्)

पदतश्च यदीनतनूजतमौ सहजर्क्षे (३) गतावनुजं निहतः।
यदि लाभगृहाधिगतौ तु तदा कुरुतो निजपूर्वभवस्य मृतिम् ॥ २६ ॥
(तोटकम्)

चेत्तत एव विराजतिशुक्रो विक्रम (३) लाभ (११) निकेतनमध्ये।
पृष्ठजपूर्वजगर्भविनाशं जन्मवतो विदधाति जनन्याः ॥ २७ ॥ (दोधकम्)

लग्नाद्रन्ध्रस्थाने (८) दैत्याचार्यावेक्षा।
पूर्वप्रसूगर्भध्वंसायैवादिष्टा ॥ २८ ॥ (विद्युल्लेखा)

भौमजीवचन्द्रबोधना उपारूढतद्ध्रवात्तदात्मजालयात्।
तत्खगाल्लवाच्च सोत्थ (३) लाभ(११)गा
भ्रातृसंपदं वितन्वतेतराम् ॥ २९ ॥ (श्येनिका)

चेत्कथितेभ्यः सहजनिकेते (३) लाभगृहे (११)वा कुजशनिदृष्टे।
भ्रातृविनाशो भवति यथास्वं शिष्यत आत्मार्यमसुतदृष्टे ॥ ३० ॥
(मौक्तिकमाला)

यस्य शिखीभणितेभ्यो विक्रम (३) लाभ (११) विहारी।
तस्य यथाक्रममुक्ताश्चित्रपदा हि भगिन्यः ॥३१॥ (चित्रपदा)

उदयभेत्यादि। उदयभतत्पतितः जन्मभतत्स्वामिभ्यामित्यर्थः। तत एव आत्मजभवनात्तदीयनभोगाद् ग्रहाच्च। अथ तद्दशकाच्च। प्रतिभावात् सूक्ष्मसूक्ष्मतरार्थग्राही ललितानि मनोरञ्जकानि पदानि यस्मिन्कर्मणि तथथा स्यात्तथा फलजातं निगदेत् कथयेत् ॥ पदतश्च पूर्वोक्तेभ्यः स्थानेभ्यः। निहतः मारयतः। निजात्पूर्वं भव उत्पत्तिर्यस्य स निजपूर्वभवो ज्येष्ठः तस्य ॥ ततः पूर्वोक्तेभ्यः ॥ दैत्याचार्यस्यावेक्षा दृष्टिः। आदिष्टा कथिता ॥ बोधनो बुधः। उपारूढतद्ध्रवात् उपपदतदीशात्; तदात्मजालयात्, उपपदतत्स्वामिनोः पञ्चमात्; तथा पञ्चमग्रहनवांशात् ॥ अर्यमसुतः शनिः तेन दृष्टे आत्मा स्वमात्रं शिष्यते ॥ उक्ताः कनिष्ठा ज्येष्ठाः ॥ २५–३१ ॥

गृहक्रमात्कुक्षितदीशपञ्चमांशग्रहेभ्यश्चैवम् ॥१।४।३१॥ भ्रातृभ्यां शनिराहुभ्यां भ्रातृनाशः ॥१।४।३२॥ शुक्रेणव्यवहितगर्भनाशः ॥१।४।३३॥ पितृभावे शुक्रदृष्टेऽपि ॥१।४।३४॥ कुजगुरुचन्द्रबुधैर्बहुभ्रातरः ॥१।४।३५॥ शन्याराभ्यां दृष्टे यथास्वं भ्रातृनाशः ॥ १।४।३६ ॥ शनिना स्वमात्रशेषश्च ॥ १।४।३७ ॥ केतौ भगिनीबाहुल्यम् ॥१।४।३८॥

Sampath kumar Medavarapu

ग्रहक्रमात् जन्मलग्नराशिक्रमात् कुक्षितदीशपञ्चमांशग्रहेभ्यश्चैवं पूर्वोक्तानि फलानि विचार्याणि । 'ग्रहक्रमात्' इति विशेषोपादानाद् जन्मलग्नतद्राशी अपि गृह्येते । अग्रेऽप्युपपदं गृह्यत एव । कुक्षिशब्देन जन्मलग्नराशिः, शेषं पद्यतो व्याख्यातम् । उक्तेभ्यः भ्रातृभ्यां तृतीयैकादशस्थाभ्यां शनिराहुभ्यां भ्रात्रोः कनिष्ठज्येष्ठयोर्नाशः स्यात् । 'कर्मादिर्भ्रातुः ॥२।३।२१' 'व्ययादिर्ज्येष्ठस्य ॥२।३।२३॥' इति वक्ष्यमाणसूत्राभ्यामवगतोऽयमाशयो यथासंबन्धमुत्तरत्राप्युपतिष्ठत एव ॥ उक्तेभ्यः तृतीयैकादशस्थेन शुक्रेण व्यवहितयोरात्मनान्तरितयोः कनिष्ठज्येष्ठयोर्गर्भयोर्नाशः ॥ पिता (=६१/१२=१) लग्नम्, ततः भावे (=४४/१२=८) अष्टमे शुक्रदृष्टे अपिना व्यवहितगर्भनाशः ॥ कुजेति सूत्रं स्पष्टं पद्यतो व्याख्यातं च ॥ उक्तेभ्यः तृतीयैकादशे च स्थाने शन्याराभ्यां दृष्टे यथास्वं भ्रातृस्थानमनतिक्रम्य कनिष्ठस्य ज्येष्ठस्य, उभयत्र दृष्टे उभयोश्च नाशः ॥ उक्तेभ्यः तृतीयैकादशयोः शनिदृष्टौ स्वमात्रशेषः स्यात् । ज्येष्ठकनिष्ठनाशो भवतीत्यर्थः । उक्तेभ्यः तृतीयैकादशयोः केतौ सति यथास्वं भगिनीबाहुल्यम् ॥

फलान्तराणि त्रिभिराह—

उपपदवनिताधीशाद् (७) यदि धनभवने (२) राहुः ।
प्रथयति नियतं दंष्ट्रां विकलितवचनं केतुः ॥२२॥ (भुजगशिशुसृता)

तिष्ठत्युपपद—स्त्रीशाद् (७) धन (२) गृहे ।
सौरी रचयते रूपेण विकृतम् ॥ २३ ॥ (वसुमती)

स्वांशादेव फलितज्ञैः पुंसां गौरमुखवर्णाः ।
होराशास्त्रपरिपाट्या विश्वासार्थमुपदेश्याः ॥ २४ ॥ (हंसरुतम्)

उपपदेत्यादि । तथा च वृद्धः—'सप्तमेशाद् द्वितीयस्थे राहौ मूकः खले स्थिते । अदन्तोऽधिकदन्तो वा दंष्ट्रायुक्तोऽथवा भवेत् ॥ तिष्ठतिति स्पष्टम् ॥ स्वांशाद् आत्मकारकांशाद् । एतदुक्तं भवति—'लग्ननवांशपतुल्यतनुः स्याद् वीर्ययुतग्रहतुल्यतनुर्वा । चन्द्रसमेतनवांशपवर्णः' इति होराशास्त्रोक्तरीत्या आत्मकारकगतो यो नवांशस्तस्य यः स्वामी तत्तुल्यतनुस्तत्सदृशः प्राणी स्यात् । अथवा कारकांशकुण्डल्यां सर्वग्रहेभ्यो यो बली तत्तुल्यतनुः स्यात् । अथवा तत्र चन्द्राधिगतो यो नवांशस्तत्स्वामितुल्यवर्णः स्यात् । तुल्यतापदको वर्ण आकारश्च । 'रक्तश्यामो भास्करो, गौर इन्दुर्नात्युच्चाङ्गो, रक्तगौरश्च वक्रः । दूर्वाश्यामो ज्ञो, गुरुर्गौरगात्रः, श्यामः शुक्रो, भास्करिः कृष्णदेहः ॥' इति 'मधुपिङ्गलदृक्'—इत्यादि च । अथवांश इत्युपलक्षणम् । तेन 'जीवेन्दुभूमिपुत्राणां द्रेष्काणे गौरवर्णता । कृष्णत्वं मन्ददृेष्काणे शेषाणां चैव मिश्रता ॥' इत्यादि संगृह्यते । अत्रेदमपि न विस्मर्तव्यम्—निरक्षासन्नेषु रामेश्वरादिविषयेषु तरणिकिरणाना लम्बप्रायनिपातेनोष्णताधिक्यात्कन्योरादिषु तिर्यङ्प्रायनिपातेन शैत्याधिक्याच्च तत्र

Sampath kumar Medavarapu

तत्र जातानां परिणामवशेनापाततः कृष्णगौरादिव्यत्यासेऽपि सूक्ष्मानुसंधानैकवोध्यो वर्ण-मेदप्रयुक्तो विशेषोऽवतिष्ठत एव । अतएव सांप्रदायिकाः—'वर्णस्तु जातिकुलदेशानुमानतो ज्ञेयः,। अन्यत्रापि—'इक्षुक्षीरगुडादीनां माधुर्यस्यान्तरं महत् ॥ तथापि न तदाख्यातुं सरस्वत्यापि शक्यते ॥' इति ॥ ३२—३४ ॥

लाभेशाद्भाग्यमे राहौ दंष्ट्रावान् ॥ १।४।३९ ॥ केतौ स्तब्धवाक् ॥१।४।४० ॥ मन्दे कुरूपः ॥१।४।४१॥ स्वांशवशाद्गौरनीलपीतादिवर्णाः ॥१।४।४२॥

उपपदादिति प्रकरणाल्लभ्यते । लाभः (=$\frac{४}{६}\frac{३}{२}$=७) तत्सप्तमः तदीशात् भाग्यं (=$\frac{२}{६}\frac{४}{३}$=२) द्वितीयम्, तच्च तद्धं च तस्मिन् भाग्यमे ॥ केताविति सूत्रद्वयी स्पष्टा ॥ स्वांश आत्मकारकनवांशः तद्वशात्तदवलम्बनात् । मेषस्य वर्णो रक्तः, वृश्चिकस्य पीतः तत्स्वामी रक्तगौरः वृषस्य वर्णः श्वेत, तुलायाः कृष्ण इति तत्स्वामी श्याम ईषद्गौर इति तद्व्याख्यातारः । मिथुनस्य वर्णः शुकतनुनिभः, कन्यायाः चित्र इति तत्स्वामी दूर्वाश्यामः । कर्कस्य वर्णः पाटल इति तत्स्वामी गौरः । सिंहस्य वर्णो धूम्रपाण्डुरिति तत्स्वामी रक्तश्यामः । धनुषो वर्णः पिङ्गलः, मीनस्य स्वच्छ इति तत्स्वामी गौरः । मकरस्य वर्ण. कर्बुरः, कुम्भस्य बभ्रुरिति तत्स्वामी कृष्ण इति । वर्णस्य कैवल्ये मिश्रणे चापि तरतमभावस्य सत्वादिन्दुगुर्वोर्गौरवर्णौ नैकविधाविति पदार्थपरीक्षकैर्विभावनीयम् । एतेन गौरनीलपीतादिवर्णा इति सूत्रशेषमपि व्याख्यातम् ॥

देवताभक्ति-परजातादिफलानि चतुर्भिराह—

आत्मकारकादमुत्र देवभक्तिमुद्दिशन्ति ।
अस्य तुङ्गनीचपुण्यपापतावलम्बनेन ॥ ३५ ॥ (समानिका)

आत्मांशको यदि च केवलपापखेट-
संबन्धभाग्भवति तर्हि परेण जातः ।
योगोऽत्र कारकखगस्य न पापभावं
संभावयन्ति फलितागमबोधवृद्धाः ॥३६॥ (मधुमाधवी)

योगो यदि चायं पातङ्गितमाभ्यां
जायेत तदानीं प्राकट्यमदभ्रम् ।
चेदन्यनभोगैर्गुप्त्या कुलमान-
श्रेणीमणिमाला न म्लानिमुपयाति ॥ ३७ ॥ (मणिमाला)

अपवादमात्रमेव स्वांशे शुभखेटवर्गसहिते तु ।
आर्याणामवतंसः कुलमुख्यो द्विग्रहे तत्र ॥ ३८ ॥ (आर्या)

आत्मकारकादित्यादि । अस्य आत्मकारकस्य ॥ संभावयन्ति गणयन्ति ॥ कुलमानश्रेण्येव निर्मलत्वान्मणिमाला । लोकदृष्टेदम् । वस्तुतस्तु वर्णसंकरप्रयुक्तो दोषः संता-

Sampath kumar Medavarapu

नचरितद्वारेण यथाकालं प्रादुर्भविष्यत्येव ॥ तत्र स्वांशे द्विग्रहे कुलमुख्यः । आर्याणामवतंस इति संभवाभिप्रायेण छन्दोनामग्रहणार्थम् । एवमन्यत्रापि ॥ ३५—३८ ॥

अमात्यानुचराद्देवताभक्तिः ॥१।४।४३॥ स्वांशे केवलपापसंबन्धे परजातः ॥ १।४।४४ ॥ नात्र पापात् ॥ १।४।४५ ॥ शनिराहुभ्यां प्रसिद्धिः ॥१।४।४६॥ गोपनमन्येभ्यः ॥१।४।४७॥ शुभवर्गोऽपवादमात्रम् ॥ १।४।४८ ॥ द्विग्रहे कुलमुख्यः ॥ १।४।४९ ॥

अमात्यस्यानुचरो भ्रातृकारकः तस्माद् देवता नैगमिकी आगमिकी च द्व्यपि निराकारा साकारा च । आकारत्वे तस्या अनेकत्वप्रतिपादकं सूत्रम्—'विरोधः कर्मणीति चेन्नानेकप्रतिपत्तेर्दर्शनात् ।' इति ।

'त्रीणि शता त्री सहस्राण्यग्निं त्रिंशच्च देवा नव चासपर्यन् ।' इत्यादि । तस्यां भक्तिः सा च कारकस्य तुङ्गगत्वे दृढा, नीचगत्वे शिथिला, पुण्यत्वे सौम्यदेवतायां, पापत्वे च क्रूरदेवतायां चेति पद्यतः स्पष्टम् ॥ स्वांशे आत्मकारकांशे ॥ अत्र आत्मकारकस्य पापत्वे परजातो न स्यात् ॥ आत्मकारकांशे वर्गरूपेण प्रसाभ्यां शनिराहुभ्यां परजातत्वप्रसिद्धिः ॥ अत्रैव अन्येभ्यः पापेभ्यो गोपनं परजातत्वगुप्तिः । आत्मकारकांशे पापग्रहोत्थयोगघटितेऽपि शुभवर्गसंबन्धे सति परजातत्वस्यापवादमात्रम् ॥ आत्मकारकांशे द्विग्रहयोगे सति कुलमुख्यः स्यात् ॥

इदानीं प्रकरणस्य गौरवदोषं परिहरति—

लाघवेन घटनेऽपि पदानां गौरवेण घटितोऽत्र निबन्धः ।
जन्मपत्रकरणे विशदोक्तिः स्वागता हि फललेखनसिद्ध्यै ॥ ३९ ॥
(स्वागता)

लाघवेनेति । स्पष्टम् ॥ ३९ ॥

अथ चतुर्थपादपदार्थानुपसंहरति—

इत्युक्तो दिविचरराम(३९)संख्यपद्यैः
शास्त्रार्थो मुनिवचनानुबद्ध एव ।
तेनाद्य प्रशमितसंशयावतारं
छात्राणां मतिसरसी सरस्वती स्यात् ॥४०॥ (प्रहर्षिणी)

इति श्रीदुर्गाप्रसादद्विवेदरचिते जैमिनिपद्यामृते प्रतिवृत्तमिश्रवृत्तकउपपदफलोद्देशो नाम चतुर्थः प्रवाहः श्रीदगुरुचरणार्पणमस्तु । आदितः पद्यसंख्या ११५+३९=१५४

इत्युक्त इति । मतिरेव सरसी सा प्रसरणगुणयोगात् सरस्वती नदी, तद्विशेषो वा स्यात् ॥ ४० ॥

इति श्रीजैमिनिपद्यामृतवृत्तौ मूलकन्दल्यां चतुर्थः प्रवाहः पूर्वार्धं चेति शिवम् ॥

Sampath kumar Medavarapu

अथ पञ्चमः प्रवाहः । तत्र मुनीन्द्रनमनपूर्वकमायुर्मीमांसां प्रतिजानानो गणितप्रक्रियामेकोनविंशत्या प्रपञ्चयति—

नामं नामं जगन्मान्यं जैमिनिं मुनिकुञ्जरम् ।
आयुर्दायो यथाशास्त्रविवेचनमनूद्यते ॥ १ ॥
चरे लग्नाष्टमेशौ चेद्वा स्थिरद्विस्वभावयोः ।
खार्का गजाशा अङ्गाङ्का अब्दा दीर्घायुषस्त्रिधा ॥ २ ॥
तावेव चेद् द्विस्वभावे वा चरस्थिरयोः खलु ।
खेभा व्यगाश्चतुःषष्टिर्हायना मध्यमायुषः ॥ ३ ॥
स्थिरे लग्नपरन्ध्रेशौ वा चरद्विस्वभावयोः ।
खाब्धयोऽङ्गाग्नयो दन्ताः समा हीनायुषो मताः ॥ ४ ॥
एवमेवाङ्गचन्द्राभ्यां त्रेधायुरवधारयेत् ।
अथवा शनिचन्द्राभ्यामिति संन्यासिनोऽवदन् ॥ ५ ॥
इत्थमेव हि जन्माङ्गहोराङ्गाभ्यां परामृशेत् ।
परामर्शविसंवादे संवादद्वितयागतम् ॥ ६ ॥
चेत्प्रकारत्रयेणापि भिन्नमायुरवाप्यते ।
तदाङ्गहोरालग्नाभ्यां तदानयनमिष्यते ॥ ७ ॥
लग्नजायागते चन्द्रे चन्द्रलग्नत एव तत् ।
यद्वा शनिशशाङ्काभ्यामिति संन्यासिनो मतम् ॥ ८ ॥
दीर्घदीर्घं(१२०)मध्यदीर्घं(१०८)हीनदीर्घं(९६)मिति त्रिधा ।
दीर्घमध्यं(८०)मध्यमध्यं(७२)हीनमध्य(६४)मिति त्रिधा ॥ ९ ॥
दीर्घहीनं(४०)मध्यहीनं(३६)हीनहीन(३२)मिति त्रिधा ।
आयुषां क्रममास्थाय स्फुटीकरणमाचरेत् ॥ १० ॥
लभ्यते त्रिंशता भागैरन्त्योपान्त्यादि चेत्तदा ।
योगकारकसंख्यातलग्नेशादिगतैः किमु ॥ ११ ॥
फलेनोनोऽनुपातीयो मध्यराशिः प्रजायते ।
प्रमाणमायुषः स्पष्टं यदि हीनायुरागतम् ॥ १२ ॥
मध्यायुषि तु तन्मध्ये योजयेदायुरागतम् ।
दीर्घायुषस्तु सद्भावे स्वोर्ध्वखण्डे क्षिपेदिदम् ॥ १३ ॥
विधित्रयद्वयैकैश्चेद् दीर्घमायुर्भवेत्तदा ।
बृहन्मध्याल्पकाः खण्डा हीनं चेद्व्यत्ययान्मताः ॥ १४ ॥
यत्र योगकृतसंसारिस्तदा कक्ष्याक्षयो भवेत् ।
दीर्घं मध्यं मध्यमे तु हीनमायुरिति स्थितिः ॥ १५ ॥

Sampath kumar Medavarapu

सुश्लोकशतके तु—

'जन्मलग्नेश्वरः खेटो भानोरधिसुहृत्सुहृत् ।
वा चेद्दीर्घायुरथवा समो मध्यायुरुच्यते ॥
अल्पायुरधिशत्रुश्चेच्छत्रुर्वा, रविरत्र चेत् ।
भवेल्लग्नेश्वरस्तर्हि जन्मराशीश्वरो, यदा ॥
तयोः स एव नाथश्चेत्तदा यद्गृहगो रविः ।
तद्वशादिह निर्णयमायुर्विद्वद्भिरेव हि ॥ इति कान्यकुब्जाः ।

कृष्णानन्दसरस्वतीस्वामिग्रन्थे वृद्धवाक्यान्तराण्यपि—

'धर्मे मोक्षे चिरायुष्यं, धर्मे कामे च मध्यमम् ।
धर्मे धने च स्वल्पायु, धर्मे धर्मे गतायुषः ॥
लग्नलग्नेशतद्राशिनाथभानां त्रिकोणके ।
अल्पमध्यचिरायुष्यं रूपवर्षप्रमाणतः ॥' इति ।

धर्मः (= $\frac{५९}{१२}$ =११) एकादशः । मोक्षः (= $\frac{६५}{१२}$ =५) पञ्चमः । कामः ($\frac{५१}{१२}$ =३) तृतीयः । धनम् (=९) नवमः । 'आयुः पितृदिनेशाभ्याम् ॥२।१।१॥' इति सूत्रानुसारेणात्र धर्ममोक्षादिद्वन्द्वे लग्नेशाष्टमेशयोरवस्थानमूह्यम् ॥ योऽयमष्टमेशादिरिह निर्याणकारकः स चेल्लग्नत्रिकोणे तर्हि रूपवर्षप्रमाणतोऽल्पायुः स्यात् । एतदुक्तं भवति—लग्ने द्वादश, पञ्चमे चतुर्विंशतिः, नवमे षट्त्रिंशत् । इति यथोत्तरं द्वादशवर्षाण्युपचीयन्ते । विंशत्युत्तरशतसङ्ख्याकपूर्णायुरङ्गीकारे तु त्रयोदश वर्षाणि चत्वारो मासा उपचीयन्त इति विशेषः । एवं लग्नेशाश्रितराशौ तत्पञ्चमे तन्नवमे च, तथा लग्नेशाश्रितराशीशाश्रितराशौ तत्पञ्चमे तन्नवमे चाष्टमेपादिनिर्याणकारकावस्थानेन यथोत्तरमुपचितानि त्रिधा मध्यमायूंषि त्रिधा चिरायूंषि च स्युः ।

स्थानानि ।	आयूंषि ।
१	१२।१३,४
५	२४।२६,८
९	३६।४०।०
१	४८।५३,४
५	६०।६६,८
९	७२।८०,०
१	८४।९३,४
५	९६।१०६,८
९	१०८।१२०,०

अथात्र त्रैराशिकेनायुरानयने प्रागुक्तानां वृहन्मध्याल्पखण्डानामेवमुपयोग उपदिष्टः—

Sampath kumar Medavarapu

यदि 'आयुः पितृदिनेशाभ्याम्' 'एवं मन्दचन्द्राभ्याम्' 'पितृकालतश्च' इति प्रकारत्रयेणापि दीर्घायुरवाप्यते; तर्हि 'खाब्धयः' इति दीर्घहीनः खण्डो ग्राह्यः। यदि च प्रकारद्वयेन दीर्घायुस्तदा 'भङ्गाभयः' इति मध्यहीनः खण्डो ग्राह्यः। यदि चैकेन प्रकारेण दीर्घायुस्तदा 'दन्ता.' इति हीनहीनः खण्डो ग्राह्यः। एवं प्रकारत्रयेण हीनायुषि हीनहीनः, प्रकारद्वयेन मध्यहीनः, प्रकारैकेण दीर्घहीन इति हीनायुरानयने व्यत्ययादेन एव खण्डा ग्राह्याः। 'आयुः—' इति प्रथमेन प्रकारेण मध्यमायुषो निश्चये बृहत्खण्डो ग्राह्यः। 'एवम्—' इति द्वितीयेन मध्यमः। 'पितृकालतः—' इति तृतीयेनाल्पक इत्येके। प्रकारत्रयेणैकेन वा मध्यायुष्यागते मध्यमं खण्डम्। प्रकारद्वयेन मध्यायुषि एकेन दीर्घायुषि बृहत्खण्डम्, प्रकारद्वयेन मध्यायुषि एकेन हीनायुषि स्वल्पकं खण्डं ग्राह्यमिति मम प्रतिभातीत्यनुपातीयखण्डविवेकः। 'चरे लग्नाष्टमेशौ चेद्' इत्यादि त्रिधा विभक्तस्य योगत्रयस्य दर्शनार्थं चक्रम्—

दीर्घायुः। चरे लग्नेशः। चरेऽष्टमेशः।	दीर्घायुः। स्थिरे लग्नेशः। द्विस्वभावेऽष्टमेशः।	दीर्घायुः। द्विस्वभावे लग्नेशः। स्थिरेऽष्टमेशः।	दीर्घदीर्घम् १२०	मध्यदीर्घम् १०८	हीनदीर्घम् ९६
मध्यायुः। चरे लग्नेशः। स्थिरेऽष्टमेशः।	मध्यायुः। स्थिरे लग्नेशः। चरेऽष्टमेशः।	मध्यायुः। द्विस्वभावे लग्नेशः। द्विस्वभावेऽष्टमेशः।	दीर्घमध्यम् ८०	मध्यमध्यं ७२	हीनमध्यम् ६४
हीनायुः। चरे लग्नेशः। द्विस्वभावेऽष्टमेशः।	हीनायुः। स्थिरे लग्नेशः। स्थिरेऽष्टमेशः।	हीनायुः। द्विस्वभावे लग्नेशः। चरेऽष्टमेशः।	दीर्घहीनम् ४०	मध्यहीनम् ३६	हीनहीनम् ३२

एवं त्रिविधेष्वप्यायुषि प्रकारत्रयेणाप्येकाकारेष्ववगतेषु विसंवादाभावात्प्रामाण्यम्। एकप्रकारेण भिन्नतायां प्रकारद्वयसंवादात्प्रामाण्यम्। प्रकारत्रयेणापि भिन्नतायां 'विसंवादे पितृकालतः' इति सूत्रमुपतिष्ठते। एतदेव 'एवमेवार्कचन्द्राभ्याम्', इत्यादिनोपनिबद्धम्।

अत्रेदमपि बोध्यम्—सौत्रमन्दपदमुपादाय 'अथवा शनिचन्द्राभ्याम्' इति। 'यद्वा शनिशशाङ्काभ्याम्' इति च यो व्याख्यानेद्वयस्यैवमेकवाक्यता। तथा च मैत्रेयं प्रति भगवान्पराशरः—

'लग्नेशादष्टमेशाच्चैको योगः कथितो द्विज।
होरालग्नाभ्यां द्वितीयं योगमेवं विचिन्तयेत्॥

Sampath Kumar Medavarapu

तृतीयं शनिचन्द्राभ्यां चिन्तनीयं द्विजोत्तम ।
लग्ने चन्द्रः सप्तमे वा चिन्तयेल्लग्नचन्द्रतः ॥' इति ।

एतेन 'आयुः पितृदिनेशाभ्याम् ॥२।१।१॥' 'पितृकालतश्च ॥२।१।५॥' 'एवं मन्दचन्द्राभ्याम् ॥२।१।६॥' इत्येवं क्रमेण योगत्रयी व्याख्याता भवति; तथा 'एवं मन्दचन्द्राभ्याम्', इति सूत्रे मन्दशब्देन शनिर्ग्राह्यो यदि 'पितृलाभगे चन्द्रे चन्द्रमन्दाभ्याम् ॥२।१।९॥' इति सूत्रस्य विषयो न स्यात् । यदि पुनः पितृगो लाभगो वा चन्द्रस्तर्हि मन्दशब्देन लग्नं ग्राह्यमिति । वस्तुतस्तु सूत्रेषु तत्र तत्र मन्दशब्देन शनिग्रहणाद् अत्रापि शनिर्ग्राह्य इति प्रतिभाति । इदमेव समीचीनमित्यस्माकं नाग्रहः, यथा यस्मै रोचेत तथा तेन विधीयताम् ।

अथानुपाते भावाभावस्थानमित्थमुपदिष्टं वृद्धैः—

'पूर्णमादौ हानिरन्तेऽनुपातो मध्यतो भवेत् ।
राशिद्वयस्य योगार्धं वर्षाणां स्पष्टमुच्यते ।
एवं द्विकानां संचिन्त्यं त्रयाणां सूत्रवर्त्मना' इति ।

एतदुक्तं भवति—यदि योगकर्ता राश्यादौ स्यात्तर्हि दीर्घायुरादिक्रमेण दीर्घहीनं मध्यहीनं हीनहीनमिति चत्वारिंशत्पट्त्रिंशद् द्वात्रिंशत्खण्डाः पूर्णा एव । यदि राश्यन्ते तदा खण्डानामभाव एव । मध्ये त्वनुपातेन खण्डानि ज्ञायन्ते । तत्रेत्थं लाघवम्—यावन्तो योगकारका ग्रहास्तेषां योगो योगकारकग्रहसंख्यया भाज्यस्ततो लब्ध्यानुपातः यदि त्रिंशता भागैरन्त्योपान्त्यादि द्वात्रिंशत्पट्त्रिंशच्चत्वारिंशद्रूपं खण्डं लभ्यते तदा योगकारकसंख्याप्तलब्धेशादिगतभागैः किं फलं तत्तत्खण्डसंबन्ध्यायुःखण्डम् । तच्च यथा गतद्वात्रिंशदादिखण्डाच्छोध्यं शेषं स्पष्टायुः स्यात्, यद्यल्पायुषः सद्भावः । यदि मध्यायुस्तर्हि फलं यथागतद्वात्रिंशदादिखण्डे योज्यं स्पष्टायुः । यदि दीर्घायुस्तर्हि फलं चतुःषष्ट्यादिखोर्ध्वखण्डे योज्यं स्पष्टायुः स्यादिति गणितप्रक्रिया ॥

यदत्र योगकृत्सौरिरित्यादिना शनियोगे कक्ष्याह्रासो गुरुयोगे कक्ष्यावृद्धिरुक्ता । तत्र का नाम कक्ष्या ? दीर्घमध्यहीनायूरूपा सौत्री 'खाब्धयोऽद्रामयो दन्ताः' इति वृद्धोपदेशविमर्शेऽपि गृहाण ।।एतदुक्तं भवति—दीर्घं चेन्मध्यं मध्यं चेदल्पमल्पं चेदमायुः । तथा चत्वारिंशच्चेत्पट्त्रिंशत्, पट्त्रिंशच्चेत् द्वात्रिंशत्, द्वात्रिंशच्चेदधस्तात् । इति कक्ष्याह्रासः । कक्ष्यावृद्धिस्तु—धनायुश्चेद् अल्पायुः, अल्पायुश्चेन्मध्यायुः, मध्यायुश्चेद्दीर्घायुः, दीर्घायुश्चेतत ऊर्ध्वमिति । तथा अधस्ताच्चेद् द्वात्रिंशत्, द्वात्रिंशच्चेत् पट्त्रिंशत्, पट्त्रिंशच्चेत् चत्वारिंशत्, चत्वारिंशच्चेद् ऊर्ध्वम् । दीर्घायुषि प्राप्ते खेभा द्यगाश्चतुःषष्टिहीनाः सिद्धा एव सन्ति तत्रामिमायुःखण्डज्ञानार्थमनुपातः । तत्रापि यदि राश्यादौ योगकर्तृग्रहावस्थानं तदा पूर्णखण्डस्य तदूर्ध्वखण्डे मध्यायुषि योजिते खार्कादयः परमायुःखण्डा उत्पद्यन्ते । यदि पुनाराश्यन्तेऽवस्थानं तदा पूर्णखण्डस्य शून्यत्वात्खेभादयो मध्यमायुःखण्डा एवावशिष्यन्ते । त एवायूंषि । एवं मध्यायुषि प्राप्ते तु खाब्ध्यादयो हायनाः सिद्धा एव । केवलमग्रिमार्थमनुपातः । तत्रापि राश्यादौ ग्रहावस्थाने पूर्ण-

Sampath kumar Medavarapu

खण्डस्य योजनात्खाब्धिप्रभृतयः खण्डा द्विगुणतया परिणममानाः खेमादयो मध्यमायुःखण्डा भवन्ति । राश्यन्ते तु केवला एव तिष्ठेयुः । राशिमध्ये पुनरपचीयेरन्निति किं पिष्टस्य पेषणेन । मैत्रेयं प्रति भगवान्पराशरोक्तिरपि—

'अल्पाल्पायुर्भवेदल्पमल्पान्मध्यं प्रजायते ।
मध्यमाज्जायते दीर्घं कक्ष्यावृद्धेश्च लक्षणम् ॥'

इत्यतो वैपरीत्येन कक्ष्याह्रासोऽपि—

'आयुर्दाये समापन्ने कक्ष्यात्रयमिहोच्यते ।
दीर्घमध्याल्परूपं चेत्तत्प्रमाणं वदाम्यहम् ।
पट्त्रिंशाब्देन कक्ष्यैका तस्या हानिः प्रजायते ॥' इति ।
'अल्पाल्पायुर्विजानीयाद्बाल्ये च निधनं भवेत् ।' इति च ।

अन्ये शनावित्यादि । अत्र विपरीतशब्दस्य अर्थे । शेषं सूत्रान्तःपातीति ॥१–१९॥

आयुः पितृदिनेशाभ्याम् ॥२।१।१॥ प्रथमयोरुत्तरयोर्वा दीर्घम् ॥२।१।२॥ प्रथमद्वितीययोरन्त्ययोर्वा मध्यम् ॥२।१।३॥ मध्ययोराद्यन्तयोर्वा हीनम् ॥२।१।४॥ एवं मन्दचन्द्राभ्याम् ॥२।१।५॥ पितृकालतश्च ॥२।१।६॥ संवादात्प्रामाण्यम् ॥२।१।७॥ विसंवादे पितृकालतः ॥२।१।८॥ पितृलाभगे चन्द्रे चन्द्रमन्दाभ्याम् ॥२।१।९॥ शनौ योगहेतौ कक्ष्याह्रासः ॥२।१।१०॥ विपरीतमित्यन्ये ॥२।१।११॥ न स्वर्क्षतुङ्गगे सौरे ॥२।१।१२॥ केवलपापदृग्योगिनि च ॥२।१।१३॥ पितृलाभगे गुरौ केवलशुभदृग्योगिनि च कक्ष्यावृद्धिः ॥२।१।१४॥

पिता (=६१२=१) लग्नम्, दिनम् (=८) अष्टमः, तयोः पितृदिनेशयोरीशौ स्वामिनौ ताभ्यामायुर्विचार्यम् ॥ प्रथमयोश्चरराश्योः उत्तरयोः स्थिरद्विस्वभावराश्योर्वा मध्ये स्थितयोर्लग्नेशाष्टमेशयोर्दीर्घमायुः स्यात् । अनेकस्मिन्नेव चरादिराशौ लग्नेशाष्टमेशयोरवस्थानत्वे एकस्यैव ग्रहस्य लग्नेशाष्टमेशत्वे वा योगभङ्गो न जायत इति व्याख्यातारः ॥ प्रथमद्वितीययोः चरस्थिरराश्योः अन्तयोर्द्विस्वभावराश्योर्वा मध्ये स्थितयोर्लग्नेशाष्टमेशयोर्मध्यमायुः स्यात् ॥ मध्ययोः स्थिरराश्योः आद्यन्तयोश्चरद्विस्वभावराश्योर्वा स्थितयोर्लग्नेशाष्टमेशयोर्हीनायुः स्यात् ॥ एवं यथा लग्नेशाष्टमेशाभ्यां दीर्घमध्यहीनायूंषि विचारितानि, तथा मन्दचन्द्राभ्यामपि विचार्याणीति योजना । मन्दः (=५५=१) लग्नम्, चन्द्रः शशी ताभ्यामिति नीलकण्ठादयः । मन्दः शनिः, चन्द्रः शशीति कृष्णानन्दसरस्वतीस्वामिनः ॥ चकार एवमर्थे । एवं पिता (=६१२=१) लग्नम्, कालो होरालग्नम्, ताभ्यामप्यायूंषि विचार्याणीत्यर्थः । होरालग्नसाधनं प्रथमप्रवाहे द्रष्टव्यम् । तत्सावयवमेव साध्यमिति स्वाम्यादीनां बहूनां मतम् ॥ संवादात् त्रिविधेष्वप्यायुरानयनप्रकारेषु काभ्यां चिदपि प्रकाराभ्यां यदायुरागच्छति तदेव ग्राह्यम् ॥ विसंवादे त्रिविधेनापि प्रकारेण भिन्ने आयुषि पितृकालतो जन्मलग्नहोरालग्नाभ्यां यदायुरागच्छति तदेव ग्राह्यम् ॥ पिता (=६१२=१) लग्नम्, लाभः (=३२=७) सप्तमः,

Sampath kumar Medavarapu

तद्रे चन्द्रे चन्द्रः शशी, मन्दः (=६५/१२=१) लग्नं ताभ्यां यदायुरायाति तदेव ग्राह्यम्,
अन्यथा शनिचन्द्राभ्यामिति पञ्चमसूत्रोपात्तमन्दशब्दार्थनिर्णयः ॥ शनौ योगहेतौ यो-
गकर्तरि सति कक्ष्याह्रासः स्यात् । अत्र दीर्घमध्यहीनायुर्योगानुरोधेन निर्दिष्टाः स्वा-
ध्ययोऽङ्गाश्रयो दन्ताः शरदः कक्ष्याशब्देन ह्रासवृद्धिप्रसङ्गे गृह्यन्त- इति सर्वे । कक्ष्या
(=११) एकादश शरद इत्येकदेशिनः ॥ अन्ये आचार्याः शनौ योगहेतौ सति विपरी-
तमाचक्षते । तत्र न ह्रासवृद्धी इति **नीलकण्ठः** । वृद्धिरिति **स्वाम्यादयः** ॥ स्वर्क्षगे
तुङ्गगे सौरे शनौ सति कक्ष्याह्रासो न स्यात् । स्वशत्रुराशिगे स्वनीचराशिगे तु कक्ष्या-
ह्रासः स्यादित्यर्थात्सिद्धम् ॥ तथा केवलपापदृग्योगिनि च शनौ कक्ष्याह्रासो न स्यात् ।
शुभपापदृग्योगिनि तु कक्ष्याह्रासः स्यादित्यर्थात्सिद्धम् ॥ अयमभिप्रायः—'शनौ योगहेतौ
कक्ष्याह्रासः ॥ २।१।१०॥' इति सामान्येनाभिधानम् । 'विपरीतमित्यन्ये ॥२।१।११॥'
इत्यन्येषामाचार्याणां मतप्रदर्शनम् । 'न स्वर्क्षतुङ्गगे सौरे—केवलपापदृग्योगिनि च
॥२।१।१२-१३॥ इति सूत्राभ्यामाचार्यस्य स्वाभिमतविशेषकथनम् । तत्रान्याचार्यमत-
मेवानुभवसिद्धमिति **नीलकण्ठकेशवौ** ॥ पिता (=६/६ १/२=१) लग्नम्, लाभः (=४/६ ६/२=७)
सप्तमः, तद्रे तथा केवलशुभदृग्योगिनि च गुरौ कक्ष्यावृद्धिः स्यात् । नेतरत्र कक्ष्या-
वृद्धिरित्यार्थात्सिद्धम् ॥

अथायुरुदाहरणम्—

तत्र प्राग्दर्शितग्रहस्थित्या लग्नेशो बुधः स्थिरगः, अष्टमेशः शनिर्द्विस्वभावगः, तेन
'प्रथमयोरुत्तरयोर्वा दीर्घम् ॥२।१।२॥' इति सूत्रेण दीर्घायुः । अथैकवाक्यतापक्षे 'पि-
तृलाभगे चन्द्रे चन्द्रमन्दाभ्याम् ॥२।१।९॥' इति विशेषशास्त्रस्य विषयाभावे
'एवं मन्दचन्द्राभ्याम् ॥२।१।५॥' इति सूत्रेण शनिर्द्विस्वभावगः, चन्द्रः स्थिरगः,
तेनापि दीर्घायुः । एवं 'पितृकालतश्च ॥२।१।६॥' इति सूत्रेण लग्नं होरालग्नं च द्विस्व-
भावगौ, तेन 'प्रथमद्वितीययोरन्त्ययोर्वा मध्यम् ॥२।१।३॥' इति सूत्रेण मध्यायुः ।
अत्र प्रकारद्वयसंवादाद्दीर्घायुरेव ग्राह्यं न तु मध्यायुः । अत्र योगकर्तारो ग्रहा एते—

रा. ° ′ ″
बुधः=७।२७।१४।४८
शनिः=८।२६।२४।१८
शनिः=८।२६।२४।१८
चन्द्रः=११।१५।०।१४

राशीन्विहाय सर्वेषामंशादीनां योगः योगकर्तृसंख्यया भक्तः योगकर्तृसंख्या=
४) ९५°।३′।२८″(२३°।४५′।५४″।३०‴

मध्यखण्डेन ३६ गुणितः ३६×(२३°।४५′।५४″।३०‴)=८५५°।३२′।४२″ त्रिंशता ३०
भक्तः (८५५°। ३२′।४२″)÷३०

अत्र लाघवार्थमंशादि द्वादशघ्नं दिनादिकमिति लब्धं वर्षादि २८।६।६।३२।२४ ए-
तदनुपातीयमध्यराशेः षट्त्रिंशन्मितात्पातितं जातम् ७।५।२३।२७।३६ एतस्मोर्ध्वखण्डे
७२ निक्षिप्तं जातं स्पष्टमायुः ७९।५।२३।२७।३६

Sampath kumar Medavarapu

अथवा योगकर्तॄणां भोग्यांशादीनां योगो योगकर्तृसंख्यया भक्तः भोग्यांशाः—

बुधस्य=२।४५।१२

शनेः=३।३५।४२

शनेः=३।२५।४२

चन्द्रस्य=१४।५९।४६

योगकर्तृसंख्या

४) २४।५६।२२ (६।१४।५।३०

मध्यखण्डेन ३६ गुणितः

३६×(६।१४।५।३०)=२२४।२७।१८

अत्रापि लाघवार्थमंशादि द्वादशघ्नं दिनादिकमिति जातं वर्षादि ७५।२३।२७।३६ एतत्स्वोर्ध्वखण्डे निक्षिप्तं जातं स्पष्टमायुर्वर्षादि ७९।५।२३।२७।३६ ॥

अथ विज्ञातस्यायुषः परिसमाप्तौ निधनमाहोस्वित्तन्मध्यसमयेऽपीति प्रतिपादनार्थं द्वारबाह्यसञ्ज्ञाकथनपूर्वकं 'दशाश्रयो द्वारं—' इति श्लोकाभ्यां निधनयोगं 'शुभदृग्योग' इत्यर्धेन तदपवादं तथा 'लग्नाष्टमेशे—' इत्युत्तरार्धेनार्यया च विशेषमाह—

दशाश्रयो द्वारमिति बाह्यस्तावतिथस्ततः ।
एतौ राशी क्रमेणोक्तौ पाकभोगाभिधावपि ॥ २० ॥
मालिन्ये द्वारबाह्यस्य द्वारद्वारेशयोरपि ।
तन्नवांशदशामध्ये प्राणिनो निधनं भवेत् ॥ २१ ॥
शुभदृग्योगसत्त्वा तु तत्र नापादयेन्मृतिम् ।
लग्नाष्टमेशे तुङ्गस्थे नवांश उपचीयते ॥ २२ ॥
तत्रापि पदेशादशापाके शमनः पराक्रमते ।
पदनवकांशदशायां तनुमृतिपतिकोणयोर्वापि ॥ २३ ॥

दशाश्रयो द्वारम् ॥२।४।२॥ ततस्तावतिथं बाह्यम् ॥२।४।३॥ मलिने द्वारबाह्ये नवांशे निधनं द्वारद्वारेशयोश्च मालिन्ये ॥२।१।१५॥ शुभदृग्योगान्न ॥२।१।१६॥ रोगेशे तुङ्गे नवांशवृद्धिः ॥२।१।१७॥ तत्रापि पदेशादशान्ते पदनवांशदशायां पितृदिनेशत्रिकोणे वा ॥२।१।१८॥

'पञ्चमे पदक्रमात्प्राग्—२।३।३०॥' इत्यादिसूत्रोपदिष्टगणनानुसारेण यस्मिन्समये यस्य कस्यचिद्राशेर्या चरादिका दशा वर्तते, तस्या आश्रयो राशिर्द्वारं द्वारपदवाच्यम् । यस्य राशेर्वर्तमाना दशा स राशिरित्यर्थः ॥ ततः तस्माद् दशाश्रयभूताद्राशेस्तावतिथः तावत्संख्याकोऽयमिमो राशिर्बाह्यं बाह्यपदवाच्यम् । प्रथमदशाराशितो यावत्संख्याकः पाकापरपर्यायो द्वारराशिर्जायते तस्मात्तावत्संख्याक एव भोगापर-

Sampath kumar Medavarapu

पर्यायो बाह्यराशिरिति तत्त्वम् । प्रथमदशायां द्वारं बाह्यं चैक एव राशिः । द्वितीयदशायां द्वितीयो द्वारं तृतीयो बाह्यम् । तृतीयदशायां तृतीयो द्वारं पञ्चमो बाह्यराशिः । एवमग्रे चतुर्थपञ्चमषष्ठा द्वारराशयः सप्तमनवमैकादशास्तद्बाह्यराशयः ॥ द्वारं च बाह्यं चेति समाहारद्वन्द्वः । द्वारबाह्ये मलिने स्वयं पापे पापयुक्ते पापदृष्टे च सति द्वारबाह्ययोर्नवांशे अन्तर्दशाराशौ निधनं स्यात् । एवं द्वारद्वारेशयोर्बाह्यबाह्येशयोरपि मालिन्ये निधनम् ॥ तत्र शुभदृग्योगाद् द्वारबाह्यतदीशाश्रयनवांशे निधनं न स्यात् रोगः (= $\frac{३\,२}{१\,२}$ =८) अष्टमः तदीशे तुङ्गे नवांशवृद्धिः । एतेन तदग्रिममलिनराश्यन्तर्दशायां निधनमुक्तं स्यात् ॥ तत्रापि नवांशवृद्धिपरत्वेऽपि पदं लग्नारूढं तस्य य ईशः स्वामी तस्याश्रयीभूतो यो राशिः तस्य या महादशा तस्या अन्ते पर्यवसाने, वा पदनवांशदशायां लग्नारूढराश्यन्तर्दशायां, वा पितृदिने (= $\frac{६\,१}{१\,२}$ =१,८) लग्नाष्टमौ तयोर्यावीशौ ताभ्यां त्रिकोणे पञ्चमनवमान्यतरराश्यन्तर्दशायां विदशायां वा निधनं स्यात् ॥

अथ प्रकारान्तरेण दीर्घमध्याल्पायुर्योगं सापवादं शार्दूलविक्रीडितेन, बलनिर्णयं चित्रपदया चाह—

लग्नात्सप्तमतश्च यौ मृतिपती मध्ये तयोर्यो बली
तस्मिन्केन्द्रगते बृहत्पणफरस्थानस्थिते मध्यमम् ।
स्यादापोक्लिमगेऽल्पमेवमपि तद्विद्यान्निजात्कारका-
दङ्गाद्धर्मगते तु कारकखगे तद्वैपरीत्यं भवेत् ॥ २४ ॥
जैमिनिदर्शनमाद्यत्पाटवपूर्णमनीषाः ।
अत्र हि राशित एव प्राणविमर्शमुशन्ति ॥ २५ ॥

जैमिनिदर्शनेत्युक्तिस्तु 'शाणप्रसारितमिव लिखितमिव मतौ निषिक्तमिव हृदये । शास्त्रं यस्य सभगणं नादेशा निष्फलास्तस्य ॥' इति मिहिरोपदेशाभिप्रायेण ॥

पितृलाभरोगेशप्राणिनि कण्टकादिस्थे स्वतश्चैवं त्रिधा ॥२।१।१९॥ योगात्समे स्वस्मिन्विपरीतम् ॥२।१।२०॥ राशितः प्राणः ॥२।१।२१॥

पिता (= $\frac{६\,१}{१\,२}$ =१) लग्नम् , लाभः (= $\frac{५\,३}{१\,२}$ =७) सप्तमः ताभ्यां सकाशाद् रोगे (= $\frac{३\,२}{१\,२}$ =८) अष्टमौ तयोर्यावीशौ स्वामिनौ तयोर्मध्ये यः प्राणी बलवान् तस्मिन् कण्टकादिस्थे लग्नादिकेन्द्रपणफरापोक्लिमस्थे त्रिधा योगः स्यात् । तस्मिँल्लग्नादिकेन्द्रस्थे दीर्घायुः, पणफरस्थे मध्यायुः, आपोक्लिमस्थेऽल्पायुरित्यर्थः । एवं स्वतश्च कारकादपि योगत्रयं ज्ञेयम् । एतदुक्तं भवति—आत्मकारकात्तत्सप्तमाच्च यावष्टमेशौ तयोर्मध्ये यो बली तस्मिन्कारकात्केन्द्रगे दीर्घम् , पणफरगे मध्यम् , आपोक्लिमगेऽल्पम् ॥ योगात् (= $\frac{३\,१}{१\,२}$ =७) जन्मलग्नसप्तमात्समे (= $\frac{५\,५}{१\,२}$ =९) नवमे स्वस्मिन्नात्मकारके विपरीतम् । केन्द्रपणफरापोक्लिमस्थे हीनमध्यदीर्घाण्यायूंषि स्युरित्यर्थः ॥ राशितः प्राण इति । 'कारकयोगः प्रथमो भानाम् ॥२।३।६॥' इत्यादिना वक्ष्यमाणं बलमत्र ग्राह्यम् । न पुनरंशाधिक्यरूपमिति तात्पर्यम् ॥

अत्र विशेषं दीर्घादियोगे कक्ष्याह्रासं चेन्द्रवज्रयाह—

लग्नात्कलत्रादपि रन्ध्रनाथे स्वेनान्विते वैक्यमितेऽपि मध्यम् ।
पापान्तरस्थे तनुदारगेहे कक्ष्याक्षयो वा सखले त्रिकोणे ॥२६॥

लग्नादिति । स्वेनात्मकारकेण अन्विते युक्ते, वा ऐक्यमेकभावमिते प्राप्ते सति । शेषं स्पष्टम् ॥ २६ ॥

अथ कारकेऽपि कक्ष्याह्रासं सविशेषं मन्दाक्रान्तायाः पूर्वार्धेनाभिधायोत्तरार्धेनापवादं सविशेषमाह—

स्वस्मिन्नेवं फलमुपदिशन्त्यत्र पापेऽधरस्थे
यद्वानुच्चे खलखगयुते कश्चिकाह्रासमाहुः ।
कक्ष्यावृद्धिं ध्रुवमितरथा वागधीशेऽपि चैवं
सौम्यासौम्यप्रमुखकलना यत्नतो योजनीया ॥ २७ ॥

स्वस्मिन्नेवमिति । सौम्यासौम्यप्रमुखकलना शुभाशुभोच्चनीचविवेक इत्यर्थः ॥ २७ ॥

अत्रापि विशेषमनुष्टुभाह—

पूर्णेन्दुशुक्रयोरेकराशिवृद्धिर्युतौ भवेत् ।
शनैश्चरप्रसक्तौ तु वैपरीत्यं प्रजायते ॥ २८ ॥

रोगेशयोः स्वत ऐक्ये योगे वा मध्यम् ॥२।१।२२॥ पितृलाभयोः पापमध्यत्वे कोणे पापयोगे वा कक्ष्याह्रासः ॥२।१।२३॥ स्वस्मिन्नप्येवम् ॥२।१।२४॥ तस्मिन्पापे नीचेऽतुङ्गेऽशुभसंयुक्ते च ॥२।१।२५॥ अन्यदन्यथा ॥२।१।२६॥ गुरौ च ॥२।१।२७॥ पूर्णेन्दुशुक्रयोरेकराशिवृद्धिः ॥२।१।२८॥ शनौ विपरीतम् ॥२।१।२९॥

लग्नात्सप्तमाच्च रोगो (=३२=८) अष्टमराशी तदीशयोः, स्वतः कारकेणैक्ये सति योगे वा सति मध्यायुः स्यात् । अत्र कृष्णानन्दसरस्वती 'अयं योगः स्वतन्त्रो वा दीर्घस्य मध्यतापादको वा अल्पस्य मध्यतापादको चेति विवेचनीयम्' इत्याहस्म । नीलकण्ठस्तु 'पितृलाभ—' इत्यादिना निर्णीतं दीर्घायुरपि मध्यायुरिति । एवमन्येऽन्यदिति ॥ पिता (=६१=१) लग्नम्, लाभः (=४३=७) सप्तमः, एतयोः पापमध्यत्वे पापान्तर्वर्तित्वे सति, वा कोणे त्रिकोणे पापयोगे सति कक्ष्याह्रासः स्यात् ॥ स्वस्मिन्कारकेऽप्येवं विचार्यम् । एतदुक्तं भवति—कारकतत्सप्तमराश्योः पापमध्यत्वे, वा तयोस्त्रिकोणे पापयोगे कक्ष्याह्रासः स्याद् ॥ एतस्मिन्कारके पापे नीचे सति, अथवा अतुङ्गेऽनुच्चराशिगते अशुभसंयुक्ते सति कक्ष्याह्रासः स्याद् ॥ अन्यदन्यथा । अयमभिप्रायः—लग्नसप्तमयोः कारकसप्तमयोर्वा शुभमध्यत्वे, वा तेषां त्रिकोणेषु शुभयोगे सति, तथात्मकारके शुभे नीचातिरिक्ते, वा तुङ्गे शुभसंयुक्ते सति कक्ष्यावृद्धिः स्याद् ॥ गुरौ च । एवं गुरावपि पापमध्यवर्तिनि तत्त्रिकोणे वा पापयोगिनि कक्ष्याह्रासः । शुभमध्यगते तत्त्रिकोणे वा शुभगते तु कक्ष्यावृद्धिः । नीचे पापयुक्ते कक्ष्याह्रासः । इतरथा तु कक्ष्यावृद्धिः ॥

Sampath kumar Medavarapu

शुभग्रहयोगप्रसङ्गे पूर्णेन्दुशुक्रयोर्योगे एकराशिवृद्धिरेव स्यान्न पुनः कक्ष्यावृद्धिः ॥ पापग्रहयोगप्रसङ्गे शनौ योगकर्तरि विपरीतमेकराशिह्रास एव स्यान्न पुनः कक्ष्याह्रासः। अत्र चन्द्रशुक्रशनीनां प्राधान्येन योगकर्तृत्वे ग्रहान्तरेषु योगकरेष्वप्येकराशेर्वृद्धिह्रासौ वा स्यान्न तु कक्ष्यायाः, इति साम्यादयः ॥

अथ स्थिरदशाब्दाँस्तदारम्भस्थानं च द्रुतविलम्बितेनाह—

तुरग(७)कुञ्जर(८)खेचर(९)संमिताः स्थिरदशाशरदः क्रमतो मताः।
इयमुदाह्रियते द्रुहिणाह्वयद्युचरसंश्रितराशिमुखी किल ॥ २९ ॥

तुरगेति स्पष्टार्थम् ॥ २९ ॥

शशिनन्दपावकाः क्रमादब्दाः स्थिरदशायाम् ॥२।३।३॥ ब्रह्मादिरेषा ॥२।३।४॥

शशी (=$\frac{५५}{१२}$=७) सप्त। नन्दाः (=$\frac{८०}{१२}$=८) अष्टौ। पावकाः (=$\frac{१४१}{१२}$=९) नव। अब्दाः क्रमात्, मेषे सप्त, वृषे अष्टौ, मिथुने नव । पुनः कर्के सप्त, सिंहे अष्टौ, कन्याया नव। एवमग्रेऽपि उक्तलक्षणो ब्रह्मा, तदादिरियं स्थिरदशा ॥ अत्रान्तराणि चरदशावद् ॥

अथ ब्रह्मग्रहं शार्दूलविक्रीडितेन लक्षयति—

मध्ये मूर्तिकलत्रयोर्दिविचरो जायेत यो वीर्यवाँ-
स्तस्मादत्र सपत्न(६)कुञ्जर(८)रवि(१२)स्थानेश्वरप्राणवान्।
चेल्लग्नास्तगतर्क्षयोर्बलवतः पृष्ठावलम्बी भव-
त्योजस्थोऽपि स एव तावदपिभिर्ब्रह्माख्यया ख्याप्यते ॥ ३० ॥

मध्य इति। सप्तमभोग्याल्लग्नभुक्तावधिको भागो लग्नस्य पृष्ठभाग इति व्यवह्रियते ॥

अथ शार्दूलविक्रीडितेन ब्रह्मणो निर्णये विशेषं प्रपञ्चयति—

पातङ्गावथवा तमोदिविसदि ब्रह्मत्वमृच्छत्यपि
ब्रह्मातः खलु षष्ठ एव गदितश्चेद्ब्रह्मणोऽनेकता।
ब्रह्मांशाभ्यधिको विधुंतुदयुतौ तूक्ताद्भवेदन्यथा
ब्रह्मा स्वाष्टमपोऽथवा मृतिगतोऽपि स्याद्विवादे बली ॥ ३१ ॥

पातङ्गाविति। ऋच्छति गच्छतीति सप्तमी 'ब्रह्मा स्वाष्टमप—' इति प्रकारान्तरेण ब्रह्मणः प्रतिपादनम् ॥ ३१ ॥

प्रभुभाववैरीशप्राणी पितृलाभप्राण्यनुचरो विषमस्थो ब्रह्मा ॥२।१।४९॥ ब्रह्मणि शनौ पातयोर्वा ततः ॥२।१।५०॥ बहूनां योगे स्वजातीयः ॥२।१।५१॥ राहुयोगे विपरीतम् ॥२।१।५२॥ ब्रह्मा स्वभावेशो भावस्थः ॥२।१।५३॥ विवादे बली ॥२।१।५४॥

प्रभुः (=$\frac{४२}{१२}$=६) षष्ठः, भावः (=$\frac{४४}{१२}$=८) अष्टमः, वैरी (=$\frac{२४}{१२}$=१२) द्वादशः, एतेषां य ईशाः स्वामिनः तत्र यः प्राणी बलवान् सः। पिता (=$\frac{६१}{१२}$=१) लग्नम्, लाभः (=$\frac{४३}{१२}$=७) सप्तमः, तत्र यः प्राणी बलवान् राशिः तस्य अनुचरः, पृष्ठवर्ती सन् विषमस्थः मेषमिथुनादिविषमराशिगतो जायते, स ब्रह्माख्यग्रह इति परिभाष्यते ॥

Sampath kumar Medavarapu

शनौ ब्रह्मणि सति, पातयोर्वा ब्रह्मणोः सतोः, शनिराहुकेतुषु ब्रह्मलक्षणाक्रान्तेषु सत्सु तेभ्यः ततः (=$\frac{६}{१२}$=६) षष्ठो ग्रहो ब्रह्मा ॥ बहूनां ग्रहाणां योगे ब्रह्मयोगे प्राप्ते स्वजातीयः स्वस्य आत्मकारकस्य जातीयः अधिकांशो ब्रह्मा ॥ बहुषु ब्रह्मणो लक्षणे अन्विष्यमाणे राहुयोगे सति विपरीतं पूर्वसाद् वैपरीत्येन न्यूनांशो ब्रह्मा ॥ स्वाद् आत्मकारकाद् यो भावः (=$\frac{४४}{१२}$=८) अष्टमः तदीशः तथा भावस्थः अष्टमस्थो ब्रह्मा । विवादे 'स्वभावेशो भावस्थः' इति पूर्वसूत्रेण द्वयोर्ब्रह्मत्वे सति यो बली स ब्रह्मा ॥

अथ ब्रह्मग्रहदशां स्रग्विण्याह—

ओजभे ब्रह्मखेटाश्रयर्क्षाक्रमाद् युग्मराशौ तु तत्सप्तमाद् व्युत्क्रमात् ।
स्याद् दशा ब्रह्मसंज्ञात्र वर्षप्रमा स्वस्वभात् षष्ठकक्षाधिनाथावधिः ॥३२॥

ओजभे इति सष्ठम् । ब्रह्मग्रहर्क्षाद् आरम्भणीयत्वाद् ब्रह्माख्येयं दशा ॥ ३२ ॥

ब्रह्मादिः पुरुषे समा दासान्ताः ॥२।३।२६॥ स्थानव्यतिकरः ॥२।३।२७॥

पुरुषे विषमे जन्मलग्ने सति ब्रह्मादिर्ब्रह्मग्रहाश्रितराश्यादिः क्रमेण दशा प्रवर्तनीया । तत्र समा दशाब्दा दासान्ताः स्वराशेः षष्ठराशिस्वामिपर्यन्ता ग्राह्याः । दासः (=$\frac{७८}{१२}$=६) षष्ठो राशिः । समे जन्मलग्ने तु स्थानव्यतिकरः । स्थानं (=७) सप्तमराशिस्तस्य व्यतिकरः संबन्धः । ब्रह्मग्रहाश्रितराशितः सप्तमराश्यादिर्व्युत्क्रमेण दशा प्रवर्तनीयेति तात्पर्यम् ॥

अथ स्थिरदशोदाहरणम् ।

'ब्रह्मा स्वभावेशो भावस्थः ॥२।१।५३॥' इति सूत्रेणात्मकारकात्सूर्यादष्टमेशो बुधो ब्रह्मा भवति, तदाश्रितराशिर्वृश्चिकः स च समः तेन वृश्चिकाद्व्युत्क्रमेणार्थात्पूर्वं वृश्चिकस्य ततस्तुलाकन्यादीनां दशा प्रवर्तनीयेति । इहान्तराणि चरदशावत् ॥

स्थिरदशाचक्रम् ।

सू.बु.के.		मं.गु.	शु.		ल.	चं.रा.				शु.	श.	
वृश्चि.	तु.	क.	सिं.	कर्क.	मि.	वृ.	मे.	मी.	कुं.	म.	ध.	
८	७	९	८	७	९	८	७	९	८	७	९	
१९२९	१९३७	१९४४	१९५३	१९६१	१९६८	१९७७	१९८५	१९९२	२००१	२००९	२०१६ (२०२५)	
७ २९ ५१ २४											७ २९ ५१ २४	

Sampath kumar Medavarapu

अथ ग्रहदशोदाहरणम् ।

लग्नं मिथुनराशिः स च विषमस्तेन ब्रह्मग्रहाश्रितवृश्चिकराशेः सकाशात्क्रमेण दशा प्रवर्तनीया । पूर्वं वृश्चिकस्य ततो धनुषस्ततो मकरादीनामिति । अत्र दशाब्दाः स्वस्वराशेः षष्ठराशिस्वामिपर्यन्ता ग्राह्याः । यथा वृश्चिकात्षष्ठराशिस्वामी भौम एकादशे तिष्ठतीति तदवधिगणनया दशाब्दा वृश्चिकराशेः सिद्धाः । एवमेव धनुषः सकाशात्षष्ठराशिस्वामी शुक्रो द्वितीय इति तदवधिगणनया वर्षं लब्धम् । एवमेव मकरादीनामपि वर्षाण्यानीतानि ।

ग्रहदशाचक्रम् ।

सू. बु. के.	श.	शु.				चं. रा.	ल.		बृ.	मं. गु.	
वृश्चि.	ध.	म.	कुं.	मी.	मे.	वृष.	मि.	कर्क.	सिं.	क.	तु.
१०	१	१०	३	८	७	८	३	१	४	८	१०
१९२९	१९३९	१९४०	१९५०	१९५३	१९६१	१९६८	१९७६	१९७९	१९८०	१९८४	१९९२ (२००२)
७ २९ ५१ २४											७ २९ ५१ २४

अथ योगार्धदशामार्ययाह—

भवति चरस्थिरदशयोरर्धं योगार्धसंज्ञिताऽत्र दशा ।
लग्नात्समपाणवतो विषमसमत्वे क्रमोत्क्रमतः ॥ ३३ ॥

जगतस्थुषोरर्धं योगार्धं ॥ २।४।१९ ॥ स्थूलादर्शवैषम्याश्रयमेतद् ॥२।४।२०॥

योगार्धं योगार्धदशायां जगतस्थुषोः प्रतिराशिसमागतचरदशाब्दस्थिरदशाब्दयोरर्धं योगार्धं योगार्धा दशा स्यात् । अन्वर्थेयं संज्ञा । एतद्योगार्धं स्थूलं (=$\frac{३८}{३८}$=१) लग्नम्, आदर्शः सप्तमम्, एतयोर्मध्ये बलवतः प्रवर्तनीयम् ॥

अथ योगार्धदशोदाहरणम् ।

लग्नसप्तमयोर्मध्ये सप्तमराशिर्बलवत्त्वेन सप्तमराशितः क्रमेण दशा प्रवर्तनीया । वर्षाण्यत्र प्रतिराशिचरदशाब्दस्थिरदशाब्दयोर्योगार्धतुल्यानि ।

Sampath kumar Medavarapu

योगार्धदशाचक्रम् ।

श.	शु.				चं.रा.	ल.		बृ.	मं.गु.		सू. बु.के.
ध.	म.	कु.	मी.	मे.	वृ.	मि.	कर्क.	सिं.	क.	तु.	वृश्चि.
८ ६	४ ०	८ ६	८ ०	६ ०	८ ०	७ ०	४ ६	८ ६	९ ६	५ ०	९ ०
१९२९	१९३८	१९४२	१९५०	१९५८	१९६४	१९७२	१९७९	१९८४	१९९२	२००२	२००७ (२०१६)
७ २९ ५१ २४	१ २९ ५१ २४	१ २९ ५१ २४	७ २९ ५१ २४	७ २९ ५१ २४	७ २९ ५१ २४	७ २९ ५१ २४	७ २९ ५१ २४	१ २९ ५१ २४	७ २९ ५१ २४	१ २९ ५१ २४	१ २९ ५१ २४

अथ सकलायुर्योगापवादत्वेन निधनयोगविशेषं स्थिरदशामालम्ब्य शिखरिण्याह—

यथाखण्डं देही निधनमुपयाति स्थिरदशा-
निवेशे तत्रर्क्षव्यतिकरविशेषोऽयमुदितः ।
भवेद् यः पापान्तो मलिनगृहकोणान्तरगतो-
ऽथवा क्रूराक्रान्तो व्ययनिधनयोर्मृत्युकृदसौ ॥ ३४ ॥

यथाखण्डं देहीति । ऋक्षव्यतिकरविशेषो राशिसंबन्धविशेष इत्यर्थः ॥ ३४ ॥

अत्रापि विशेषमिन्द्रवज्रयाह—

रिष्फाष्टमेशौ कृशचन्द्रशुक्रमात्रेक्षितौ तत्र मृतिं विधत्तः ।
तत्रापि चाद्यर्क्षमृतीशदृष्टनवांशपाके निधनं स्मरन्ति ॥ ३५ ॥

रिष्फाष्टमेशाविति । तत्र द्वादशाष्टमराशिदशायाम् ॥ ३५ ॥

स्थिरदशायां यथाखण्डं निधनम् ॥२।१।३०॥ तत्रर्क्षविशेषः ॥२।१।३१॥ पापमध्ये पापकोणे रिपुरोगयोः पापे वा ॥२।१।३२॥ तदीशयोः केवलक्षीणेन्दुशुक्रदृष्टौ वा ॥२।१।३३॥ तत्राप्याद्यर्क्षारिनाथदृश्यनवभागाद्वा ॥२।१।३४॥

स्थिरदशायां 'शशिनन्दपावकाः क्रमादब्दाः—'(२।३।१) इति वक्ष्यमाणलक्षणायां यथाखण्डं खण्डमनतिक्रम्य वर्तत इति यथाखण्डम् । लग्नात्पञ्चमान्तं प्रथमं खण्डम्, षष्ठमादष्टमान्तं द्वितीयं खण्डम्, नवमाद्व्ययान्तं तृतीयं खण्डमिति संप्रदायविदः । स्थिरदशानुरोधेन पूर्णायुषः खण्डत्रये परिकल्पिते, हीनायुषः प्रथमे मध्यायुषो द्वितीये दीर्घायुषस्तृतीये खण्डे निधनं स्यात् ॥ तत्र यथानिर्दिष्टखण्डेऽपि 'पापमध्ये' इत्या-

Sampath kumar Medavarapu

दिना निरूपित ऋक्षविशेषो निधनकारी स्यात् ॥ पापमध्ये पापद्वयमध्यवर्तिराशिदशाया पापकोणे प्रथमदशाप्रदराशित्रिकोणे, रिपु (=१२) द्वादश', रोग (=$\frac{३}{२}\frac{२}{२}$=८) अष्टम, द्वादशाष्टमयो पापे पापाक्रान्ते वा निधनं स्यात् । यस्मादुक्तस्थाने सपापे तद्राशिदशायामिति तात्पर्यम् ॥ तदीशयोस्तथाभूतद्वादशाष्टमराशिस्वामिनोरुपरि केवलयो क्षीणेन्दुशुक्रयोर्दृष्ट्या सत्या द्वादशाष्टमराशिदशाया निधन स्यात् । अथवा तदीशयोर्द्वादशाष्टराशीशयोरिति व्याख्येयम् ॥ तत्रापि मारकराशिदशायामपि आद्यर्क्षे प्रथमदशाप्रदो यो राशिस्तस्माद् य अरि (=$\frac{१}{१}\frac{२}{२}$=८) अष्टमराशिस्तत्रायेन दृष्टो यो राशिस्तस्यान्तर्दशाया वा निधन स्यात् । अथवा आद्यर्क्षारी दशमषष्ठराशी इति स्वामी । अन्ये त्वन्यद् ॥

अथ निधनराशिविशेषं दर्शयितुं प्राण्यप्राणिभेदेन द्विविधं रुद्रग्रहमुपजात्याह—

लग्नात्कलत्रादपि यौ मृतीशौ तयोर्बलीयानुपलभ्यते यः ।
स रुद्रसंज्ञः खचरः प्रदिष्टो बलेन हीनोऽपि खलेन दृष्टः ॥ ३६ ॥

अथ रुद्रग्रहफल सविशेषं स्रग्धराभ्यामाह—

सद्दृष्टे रुद्रखेटे बलिनि निगदितं रुद्रशूलान्तमायु-
र्नूनं तत्रापि सौम्ययुक्चरपरिगते तावदायुर्वदन्ति ।
न व्यर्कक्रूरयोगेऽथ शशिशनिकुजालोकितेवीतसौम्ये
वा पापाढ्येऽपि सौम्येक्षणवति परतो वात्र रुद्रद्वयेऽपि ॥३७॥
शूले चेदन्तशूले भवति हि मरणं प्रायशोऽस्याश्रितर्क्षे-
ऽप्यङ्के मीने विशेषादुदयनिधनगे रुद्रराश्यन्तमायुः ।
अल्पं चेदाद्यशूले मृतिरिह घटते मध्यमं मध्यशूले
दीर्घं पर्यन्तशूले तदिदमृपिवचस्तारतम्येन विद्यात् ॥ ३८ ॥

पितृलाभभावेशप्राणी रुद्रः ॥२।१।३५॥ अप्राण्यपि पापदृष्टः ॥२।१।३६॥ प्राणिनि शुभदृष्टे रुद्रशूलान्तमायु. ॥२।१।३७॥ तत्रापि शुभयोगे ॥२।१।३८॥ व्यर्कपापयोगे न ॥२।१।३९॥ मन्दारेन्दुदृष्टेशुभयोगाभावे पापयोगेऽपि वा शुभदृष्टौ वा परतः ॥२।१।४०॥ शूले चेत्तदन्तशूले ॥२।१।४१॥ रुद्राश्रयेऽपि प्रायेण ॥२।१।४२॥ क्रिये पितरि विशेषेण ॥२।१।४३॥ द्वन्द्वे रुद्रे तदन्तं प्रायः ॥२।१।४४॥ प्रथममध्यमोत्तमेषु वा तत्तदायुषाम् ॥२।१।४५॥

पिता (=$\frac{६}{१}\frac{१}{१}$=१) लग्न, लाभ (=$\frac{४}{१}\frac{३}{१}$=७) सप्तम, ताभ्यां क्रमोत्क्रमगणनया यौ भावौ (=$\frac{४}{१}\frac{४}{१}$=८) अष्टमराशी तयोर्यावीशौ स्वामिनौ तयोर्मध्ये यः प्राणी बलवान् स रुद्राख्यो ग्रह स्यात् ॥ लग्नसप्तमाभ्यां यावष्टमेशौ तत्र दुर्बलोऽपि पापदृष्टश्चेद्रुद्र । तथा च प्राणी अप्राणीति द्वौ रुद्रौ स्याताम् ॥ रुद्रे प्राणिनि बलवति शुभदृष्टे च सति रुद्रशूलान्तमायु । यथाक्रममल्पमध्यदीर्घायुर्वशेन प्रथमद्वितीयतृतीयशूलपर्यन्तमायु

Sampath kumar Medavarapu

स्यात्। लग्नादि प्रथम शूल, पञ्चमादिद्वितीय शूल, नवमादिस्तृतीय शूल इति साम्प्रदायिका ॥ तत्रापि प्राणिनि रुद्रेऽपि शुभयोगे सत्यवश्य रुद्रशूलान्तमायु स्यात्। इति कारिकाकार। तत्र द्वितीये रुद्रेऽपि शुभयोगे सति रुद्रशूलान्तमायुर्भवति न तु शुभदृष्ट्येति भाव। इति सुबोधिनीकार ॥ अर्कमपहायान्यपापयोगे सत्येतत्फल न जायते। अर्कयोगेन त्वेतस्य भङ्ग ॥ प्राणिनि अप्राणिनि वा रुद्रे मन्दारेन्दुदृष्टे शुभयोगाभावे एको योग। रुद्रद्वये मन्दारेन्दुदृष्टे शुभदृष्टौ सत्या वा तृतीयो योग। प्रथमो योग शुभयोगाभावघटितो, द्वितीय पापयोगघटित इति, प्रथमयोग शुभपापयोगरहित इति सिध्यति। योगत्रये सपूर्णे सति परतो रुद्रशूलान्तादग्रे आयु स्यात् ॥ अत्र शुभपापा वृद्धैर्निर्णीता —

'अर्कारमन्दफणिन क्रमात्क्रूरा यथाश्रयम्।
चन्द्रोऽपि क्रूर एवात्र क्वचिदङ्गारकाश्रये।
गुरुध्वनकविज्ञा स्युर्यथापूर्वं शुभग्रहा ॥' इति।
'प्रत्येक शुभराशिस्थ उच्चस्थो वा बुध शुभ।
'गुरुशुक्रौ च सौम्यस्थौ ततोऽन्यत्राशुभा स्मृता ॥' इति च।

क्रमाद् यथोत्तरम्। यथाश्रय यथाक्रूरसौम्यराशिसश्रयम्। यथापूर्वं बुधाच्छुक्र शुक्रात्केतु केतोर्गुरुरिति यथोत्तरम्। शेष स्पष्टम् ॥ चेच्छूले मृत्युस्तर्हि तदन्तशूले रुद्रशूलग्रहादशान्त पातिन्या तदन्तर्दशायाम् ॥ अर्थोऽय वृद्धैस्पष्टुहित —

'पापमात्रस्य शूलत्वे प्रथमर्क्षे मृतिर्भवेत्।
मिश्रे मध्यमशूलर्क्षे शुभमात्रेऽन्तिमे मृति ॥' इति।
'क्रूराश्रयेषु क्षेत्रेषु शुभानामाश्रयेषु च।
निर्याणमीरित तत्तु शूलर्क्षेष्वेव निर्दिशेत् ॥' इति च।

यदि द्वावपि रुद्रौ पापौ तर्हि प्रथमशूले, यदि चैको रुद्र पाप पर शुभस्तर्हि द्वितीयशूले, यदि च द्वावपि शुभौ तर्ह्यन्तशूले, मृत्यु स्यात् ॥ प्रायेण रुद्राश्रये रुद्रग्रहाधिष्ठितराशावपि मृत्यु स्यात्। प्रायशब्दोपादानेन रुद्राश्रयात्प्राक् पश्चाद्वेति स्वत सिद्धम् ॥ क्रिय (=१२) मीन पिता (=६/१ ३/१=१) लग्न तस्मिन्मीने लग्ने सति विशेषेण रुद्राश्रिते राशौ मृत्यु स्यात् ॥ क्रियोमेष इति स्वाम्यादय ॥ द्वन्द्व (=४/१ ४/१=८) अष्टम तस्मिन्नष्टमे रुद्रे रुद्रद्वये सति रुद्राश्रितराशिदशाया प्रायो मृत्यु। द्वन्द्व द्विस्वभावराशिरिति स्वामी ॥ अल्पमध्यदीर्घरूपाणा तत्तदायुषा प्रथममध्यमोत्तमेषु त्रिषु शूलेषु वा क्रमेण मृत्यु स्यादिति ॥

अथ प्रकारान्तरेणायुर्निश्चयाय महेश्वराख्यमहमुपजानाह—

स्वतोऽष्टमेशो हि महेश्वरो भवेत्स्वोच्चे स्वभेरिष्फमृतीशयोर्बली।
स्वस्मिन्स्वपाते निधनालये वा महेश्वर कारकपष्ठमूर्चिरे ॥ ३९ ॥

स्वत इति। स्वस्मिन्कारके स्वोच्चे स्वभे वेति योजना। स्वस्मिन्निधनालये वा सपाते इति योजना। सूर्यादिगणनया कारकषष्ठ महेश्वरमूचिरे ॥ ३९ ॥

Sampath Kumar Medavarapu

अथ ब्रह्ममहेश्वरयो फलमुपजात्याह—

ब्रह्मग्रहाधिष्ठितभाच्च यावन्महेश्वरर्क्षस्य दशान्तमायुः ।
तत्रापि माहेश्वरतोऽष्टमेशात्त्रिकोणराशेः परिपाककाले ॥ ४० ॥

अथ मारकग्रहान्वसन्ततिलकेनाह—

लग्नात्स्वतश्च सहज(३)क्षत(६)रिष्फ(१२)रन्ध्र-
(८)नाथेषु वीर्यवहलो मृतिदोऽरिपस्तु ।
प्रायेण मारकखगर्क्षदशासु मृत्यु-
स्तत्रास्ततोऽरि(६)निधन(८)व्यय(१२)पाऽपहारे ॥ ४१ ॥

लग्नादिति । अपहारेऽन्तर्दशायाम् ॥ ४१ ॥

स्वभावेशो महेश्वरः ॥२।१।४६॥ स्वोच्चे स्वमे रिपुभावेशप्राणी ॥२।१।४७॥ पाताभ्यां योगे स्वस्य तयोर्वा रोगे ततः ॥२।१।४८॥ ब्रह्मणो यावन्महेश्वरर्क्षदशान्तमायुः ॥२।१।५५॥ तत्रापि महेश्वरभावेशत्रिकोणाब्दे ॥२।१।५६॥ स्वकर्मचित्तरिपुरोगनाथप्राणी मारकः ॥२।१।५७॥ चित्तनाथः प्रायेण ॥२।१।५८॥ तदृक्षदशायां निधनम् ॥२।१।५९॥ तत्रापि कालाद्रिपुरोगचित्तनाथापहारे ॥२।१।६०॥

स्वाद् आत्मकारकाद् यो भाव (=$\frac{४}{१}\frac{४}{२}$=८) अष्टम तदीशो महेश्वरो महेश्वराख्यग्रह इति परिभाष्यते ॥ आत्मकारके स्वोच्चे स्वगृहे वा वर्तमाने सति रिपु (=१२) द्वादश , भाव (=$\frac{४}{१}\frac{४}{२}$=८) अष्टम , एतयोर्यावीशौ तत्र प्राणी महेश्वर इति पूर्वेणानुषङ्ग स्वस्य आत्मकारकस्य पाताभ्यां राहुकेतुभ्यां योगे सति अथवा स्वाद् रोग (=$\frac{३}{१}\frac{२}{२}$=८) अष्टम तत्र तयो पातयोर्योगे सति तत (=$\frac{६}{१}\frac{६}{२}$=६) सूर्यादिगणनया आत्मकारकात् षष्ठो महेश्वर इति ॥ स्थिरदशाया ब्रह्मग्रहाश्रितराशिमारभ्य महेश्वरग्रहाश्रितराशिदशापर्यन्तमायु स्यात् ॥ तत्रापि महेश्वरग्रहाश्रितराशिदशायामपि महेश्वराश्रितराशितो यो भाव (=$\frac{४}{१}\frac{४}{२}$=८) अष्टमराशिस्तस्य य ईशस्तस्माद्यस्त्रिकोण पञ्चमनवमवर्ती राशिस्तस्याब्देऽन्तर्दशाकाले मृत्यु स्यात् ॥ स्वाद् आत्मकारकात् लग्नाद्वा कम (=$\frac{५}{१}\frac{१}{२}$=३) तृतीय , चित्त (=$\frac{६}{१}\frac{६}{२}$=६) षष्ठ , रिपु (=१२) द्वादश , रोग (=$\frac{३}{१}\frac{२}{२}$=८) अष्टम , एतद्राशिनाथाना मध्य य प्राणी स मारक स्यात् ॥ तत्र चित्तनाथ षष्ठेश , प्रायेण बहुप्रकारेणेति स्वामी । मारक स्यात् ॥ तदृक्षदशायां मारकाश्रितराशिदशाया मारकस्वामिकराशिदशाया वा मृत्यु स्यात् ॥ तत्रापि मारकराशिदशायामप्यात्मकारकाल्लग्नाद्वा य काल (=$\frac{३}{१}\frac{१}{२}$=७) सप्तमस्तस्माद् रिपु (=१२) द्वादश , रोग (=$\frac{३}{१}\frac{२}{२}$=८) अष्टम , चित्त (=$\frac{६}{१}\frac{६}{२}$=६) षष्ठ , एतद्राशीनां ये नाथास्तेषामपहारेऽन्तर्दशाभुक्तौ मृत्यु स्यात् ॥ अत्र विशेषमाह वृद्धः—

'षष्ठाष्टमेशौ भवतो मारकावष्टमेश्वर ।
प्रायेण मारको राशिदशास्तत्र विशेषत ॥

Sampath kumar Medavarapu

पञ्चमे पापभूयिष्ठे षष्ठेशो मुख्यमारकः ।
षष्ठात्त्रिकोणगो वापि मुख्यमारक इष्यते ॥
मध्यायुषि मृतिः षष्ठदशायामष्टमस्य वा ।
षष्ठात्त्रिकोणस्य पुनर्दीर्घाल्पविषये भवेत् ॥
षष्ठे बलयुते तस्य त्रिकोणे मृतिमादिशेत् ।
षष्ठेशश्चेद्बलाढ्यः स्यात्तत्रिकोणे मृतिं वदेत् ॥
व्यवस्थेयं समस्तापि कारकादिदशास्वपि ।
बलिनः शुक्र (१) शशिनो (७) र्मध्यं षष्ठाष्टमादिकम् ॥
चरे चरस्थिरद्वन्द्वा इति यो राशिरागतः ।
स एव मारको राशिर्भवतीति विनिर्णयः ॥
बहुराशिसमावेशे बलवान्मारकः स्मृतः ।
चरइत्यादिनायुर्यत्तत्समाप्त्युचितो भवेत् ॥
यो राशिः स तु विज्ञेयो मारकः सूत्रसंमतः ॥' इति ।

चरेचरस्थिरद्वन्द्वा इति प्रतीकबोधितः संदर्भस्त्वयम्—

'लग्नेशरन्ध्रपयोश्च लग्नेन्द्वोर्लग्नहोरयोः ।
सूत्राण्येवं प्रयुञ्जीयात्संवादादायुषां त्रये ॥
चरेचरस्थिरद्वन्द्वाः स्थिरद्वन्द्वचरस्थिराः ।
द्वन्द्वेस्थिरोभयचरा दीर्घमध्याल्पकायुषः ॥' इति ।

अत्रायं नैलकण्ठीयो लेखः—पितृदिनेशादिद्विकानामाश्रयीभूतो यो राशिः स मारकः
ते राशयो यदि बहवस्तर्हि 'अग्रहात्सग्रहो ज्यायान्सग्रहेष्वधिकग्रहः । साम्ये चरस्थि-
रद्वन्द्वाः क्रमात्स्युर्बलशालिनः ॥' इत्यनेन यो राशिर्बलवान् स मारकस्तद्राशिदशायां
तदीशाश्रयराशिदशायां वा मृतिरिति । अपरे तु 'चर—' इत्यादिश्लोकेन यद्दीर्घायुः
समागतं 'पूर्णे—' (टी. १ प्रवा.) इत्यादिना स्पष्टीकृतं तदायुर्यद्राशौ समाप्तं तद्रा-
शिरेव मारक इत्यर्थः ॥

अथ पद्यमपादपदार्थानुपसंहरति—

इत्युक्तो धरणिसमुद्र (४१) संख्यपद्यैः
शास्त्रार्थो मुनिवचनानुरुद्ध एव ।
तेनायमशमितसंशयावतारं
छात्राणां मतिकमलं श्रियं दधातु ॥ ४२ ॥

इति श्रीदुर्गाप्रसादद्विवेदरचिते जैमिनिपद्यामृते निधननिर्णयो नाम
पञ्चमः प्रवाहः श्रीगुरुचरणार्पणमस्तु । आदितः पद्यसंख्या १५४+
४१=१९५

इत्युक्त इति ॥ स्पष्टम् ॥ ४२ ॥

इति श्रीजैमिनिपद्यामृतवृत्तौ मूलकन्दल्यां पञ्चमः प्रवाहः ॥

Sampath kumar Medavarapu

अथ षष्ठः प्रवाहो विविच्यते ।

अथ पित्रादीना निधनकाल विवक्षुस्तत्कारकादिविशेष शार्दूलविक्रीडिताभ्यामाह—

यः प्राणी रविशुक्रयोः स जनकश्चन्द्रारयोस्तु प्रसू-
र्निर्वीर्योऽपि यथाक्रमं मलिनदृग्युक्तो भवेत्कारकः ।
तस्मिन्प्राणिनि सौम्यदृष्टियुजि तच्छूले हि पित्रोर्मृतिः
केचित्तन्निधनेश्वरे स्फुटबले तच्छूल इत्यादिशन् ॥१॥
आयुष्यन्यदपीक्षणीयमुदयाद्रिष्फेऽर्कसौम्यान्विते
तद्राशौ त्रिशरर्क्षपाकसमये तातान्तमाहुः परे ।
पित्रोर्व्यर्कमपापमात्रकदृशा प्राग्द्वादशाब्द्या मृति-
र्दाराणां गुरुयुग्मशूल इतरेषां चापि तच्छूलके ॥२॥

य प्राणीत्यादि । यो रविशुक्रयोर्मध्ये बली स पितृकारक । यश्चन्द्रभौमयो स मातृकारक । एतयोर्मध्ये निर्बलोऽपि पापदृष्टो यथाक्रम पितृमातृकारक स्यात् । तस्मिन् पितृकारके मातृकारके वा बलिनि शुभदृष्टे सति पितृमातृकारकाश्रितस्य राशेस्त्रिकोणराशिदशाया पितुर्मातुश्च निधन स्यात् । प्राणिनोऽप्राणिनो वा कारकस्याष्टमेश्वरेऽधिकबले सति तदाश्रितराशित्रिकोणराशिदशायामन्ये निधनमादिशन्ति ॥ आयुषि विचारणीये उक्तमनुक्तमन्यदपि निरीक्षणीयम् । लग्नाद् द्वादशे राशौ सूर्यबुधान्विते तद्राशौ सिंहमिथुनकन्यान्यतमसत्त्वे तृतीयपञ्चमराशिदशाया परे पितृनिधनमाहु । मातृपितृकारकयोर्व्यर्कपापमात्रावलोकेन द्वादशाब्द्या प्राङ् मातापित्रोर्निधन स्यात् । गुर्वाक्रान्तराशित्रिकोणराशिदशाया स्त्रिया निधनम् । इतरेषा पुत्रमातुलादीनामपि तत्तत्कारकराशित्रिकोणराशिदशाया निधनमनुसधेयम् ॥ १—२ ॥

रविशुक्रयोः प्राणी जनकः ॥२।२।१॥ चन्द्रारयोर्जननी ॥२।२।२॥ अप्राण्यपि पापदृष्टः ॥२।२।३॥ प्राणिनि शुभदृष्टे तच्छूले निधन मातापित्रोः ॥२।२।४॥ तन्नाथेशे स्फुटबले तच्छूल इत्यन्ये ॥२।२।५॥ आयुषि चान्यत् ॥२।२।६॥ अर्कज्ञयोगे तदाश्रिते क्रिये लग्नमेपदशायां पितुरित्येके ॥२।२।७॥ व्यर्कपापमात्रदृष्टयोः पित्रोः प्राग्द्वादशाब्दात् ॥२।२।८॥ गुरुशूले कल त्रस्य ॥२।२।९॥ तत्तच्छूले तेषाम् ॥२।२।१०॥

रविशुक्रयोश्चन्द्रयोश्च मध्ये अप्राण्यपि पापदृष्टो यथाक्रम पितृमातृकारको भवेत् । यद्युभौ समप्राणौ तदा द्वावपि कारकाविति स्वामी ॥ प्राणिनीति चतुर्थं स्पष्टम् ॥ ताभ्या प्राण्यप्राणिकारकाभ्या भावौ (=$\frac{४}{१२}$=८) अष्टमौ तदीशे स्फुटबले सति । शेष स्पष्टम् ॥ क्रिये (=१२) लग्नाद् द्वादशराशौ अर्कज्ञयोगे सूर्यबुधसत्त्वे तदाश्रये तत्स्वामिकसिंहमिथुनकन्यान्यतमराशिसत्त्वे सति लग्न (=३) तृतीयराशि मेष (=$\frac{१५}{१२}$=५) पञ्चमो राशिस्तद्दशाया पितृनिधनमित्येके । अत्र व्याख्याविकल्पः स्वामिग्रन्थे ॥ पित्रोः प्राणिनोरप्राणिनोर्वा मातापितृकारकयोः । शेष स्पष्टम् ॥

Sampath kumar Medavarapu

अथ मरणनिमित्तानि मत्तमातङ्गलीलाकराख्यदण्डकेन पञ्चचामरेणार्यया वसन्ततिलकेन च प्रपञ्चयति—

लग्नतो वा स्वतो विक्रमे क्रूरयुक्तेक्षिते दुष्टभावेन मृत्यूदयो जायते
सौम्यदृग्योगसत्त्वे शुभो मिश्रखेटप्रसङ्गे तथाभूतनिर्याणमाख्यायते ।
भास्वता राजमूलात्तुषारांशुना यक्ष्मणः क्षोणिजेन व्रणास्त्राग्निदाहादितः
सौरिणा वाततो मन्दतन्नन्दनाभ्यां विषाम्बूरगोद्बन्धनाद्यान्निमित्तादपि ३

तथोदयात्स्वतोऽथवा तृतीयके शिखावता
विषूचिकाजलामयादितश्च मृत्युमादिशेत् ।
मृगाङ्कमान्दिसंक्रमेण पूगसंभवान्मदा-
द्विपान्नदानकैतवप्रयोगतश्च सत्वरम् ॥ ४ ॥
शोफारुचिवमनाद्याद् गुरुणा मेहाद् भृगूद्भवेनात्र ।
मिश्रान्मिश्रसुसदा शशिदृग्योगे तु निश्चयान्निधनम् ॥ ५ ॥
सौम्यग्रहैश्च निधनं शुभदेशमध्ये
पापैस्तु कुत्सिततमे किल कीकटाद्ये ।
वागीश्वरेण कविनापि च बोधपूर्व-
मन्यैस्तु विस्मृतिपुरस्सरमादिशन्ति ॥ ६ ॥

लग्नतो वा स्वत इत्यादि । तथाभूतनिर्याणं शुभाशुभमिश्रं निधनम् । मन्दतन्नन्दनाभ्यां मन्दमान्दिभ्यामित्यर्थः । शेषं स्पष्टम् ॥३–६॥

कर्मणि पापयुतदृष्टे दुष्टं मरणम् ॥२।२।११॥ शुभं शुभदृष्टियुते ॥२।२।१२॥ मिश्रे मिश्रम् ॥२।२।१३॥ आदित्येन राजमूलात् ॥२।२।१४॥ चन्द्रेण यक्ष्मणः ॥२।२।१५॥ कुजेन व्रणशस्त्राग्निदाहाद्यैः ॥२।२।१६॥ शनिना वातरोगात् ॥२।२।१७॥ मन्दमान्दिभ्यां विषसर्पजलोद्बन्धनादिभिः ॥२।२।१८॥ केतुना विषूचीजलरोगाद्यैः ॥२।२।१९॥ चन्द्रमान्दिभ्यां पूगमद्यान्नकवलादिभिः क्षणिकम् ॥२।२।२०॥ गुरुणा शोफारुचिवमनाद्यैः ॥२।२।२१॥ शुक्रेण मेहात् ॥२।२।२२॥ मिश्रैर्मिश्रात् ॥२।२।२३॥ चन्द्रदृग्योगान्निश्चयेन ॥२।२।२४॥ शुभैः शुभदेशे ॥२।२।२५॥ पापैः कीकटे ॥२।२।२६॥ गुरुशुक्राभ्यां ज्ञानपूर्वकम् ॥२।२।२७॥ अन्यैरन्यथा ॥२।२।२८॥

* लग्नाद् कारकाद्वा कर्म (=६/२= ३) तृतीयः तस्मिन्पापयुते दृष्टे वा दुष्टमभिजलपातबन्धनादिप्रयोज्यं मरणं स्यात् । सायासमिति परमार्थः ॥ लग्नाद् कारकाद्वा तृतीये शुभयुक्ते दृष्टे वा शुभं ज्वरशिरोगप्रयोज्यं मरणं स्यात् । निरायासमिति परमार्थः ॥ मिश्रे शुभपापयुतदृष्टे तृतीये मिश्रं शुभाशुभात्मकं मरणम् ॥ 'लग्नाद् कारकाद्वा तृतीये' इत्यंशोऽग्रे 'अन्यैरन्यथा' इति सूत्रं यावदनुवर्तनीयः ॥ मन्दमान्दिभ्यां शनिगुलिकाभ्याम् ॥ चन्द्रदृग्योगान्निश्चयेनेत्युक्त्या चन्द्रदृग्योगाभावे लग्नकारकाभ्यां तृतीयस्थान-

Sampath kumar Medavarapu

गतेनापि तत्तद्ग्रहेण तत्तद्रोगनिमित्तकं मरणं सदिग्धमिति गम्यते ॥ शुभैः पापैरिति बहुवचनमविवक्षितमिति नीलकण्ठ ॥ शेषं स्पष्टं पद्यतो व्याख्यात च ॥

अथ लग्नद्वादशयोर्मध्यसज्ञा सफला सापवादा च स्रग्धरयाह—

लग्नाद्यं पूर्वपट्कं व्ययमुखमपरं पट्कमेतत्प्रदिष्टं
खं खं मध्यं तदन्तः खरकिरणभुवा राहुणा केतुना वा ।
पित्रोः संस्कारकर्ता न भवति मनुजः सौम्यदृग्योगसत्वे
योगोऽयं नाशमेति सरहस्यजने संगते वा पदाली ॥ ७ ॥

लग्नाद्यमिति । लग्नाद्यं पूर्वपट्कं खं मध्य लग्नमध्यमुक्तम् । व्ययमुखमपर पट्कं द्वादशादिपट्क खं मध्य द्वादशमध्यमुक्तमित्यर्थं । तदन्त लग्नमध्ये, खरकिरणभुवा शनिना, राहुणा केतुना वाधिष्ठिते मातु सस्कारकर्ता न स्यात् । एवं तदन्त. द्वादशमध्ये, शनिना राहुणा केतुना वाधिष्ठिते पितु सस्कारकर्ता न स्यात् । सस्कार और्ध्वदैहिक-लक्षणः । अत्र सौम्यग्रहदृष्टियुतिसत्वे पित्रोः सस्कारकर्तृलक्षणोऽयं दुर्योग. सरहस्य-जनेऽनुष्ठिते सति संगता आपदालीव नाशमेतीत्यर्थं ॥ ७ ॥

लेयादिजनकयोर्मध्ये शनिराहुकेतुभिः पित्रोर्न संस्कर्ता ॥२।२।२९॥
लेयादिपूर्वार्धे जनकाद्यपरार्धे ॥२।२।३०॥ शुभदृग्योगान्न ॥२।२।३१॥

लेय (=$\frac{3}{3}$=१) लग्नम्, जनकः (=$\frac{2}{8}$=१२) द्वादशः तयोर्मध्ये शनिराहुभ्या शनिकेतुभ्या वा स्थिताभ्या मातापित्रोः सस्कर्ता न स्यात् ॥ लेयादिपूर्वार्धे लग्नादिपूर्व-पट्के, जनकाद्यपरार्धे द्वादशादिव्युत्क्रमेणोत्तरपट्के यथाक्रम लग्नद्वादशमध्यसञ्ज्ञिते । तत्र वर्तमानाभ्या शनिराहुभ्या शनिकेतुभ्या वा मातापित्रो सस्कर्ता न स्यादिति विवि-प्यमध्यपदार्थबोधकं सूत्रम् ॥ तत्र शुभग्रहदृष्टियोगान्मातापित्रो. सस्कारकर्ता स्यादिति पूर्वयोगभङ्ग. ॥

अथ षष्ठपादपदार्थानुपसहरति—

इत्युक्तः श्रुतियुतराम (७) संख्यपद्यैः
शास्त्रार्थो मुनिवचनानुरुद्ध एव ।
तेनाद्यप्रशमितसंशयाद्यतारं
छात्राणां मतिकुमुदं मुदं प्रयातु ॥ ८ ॥

इति श्रीदुर्गाप्रसादद्विवेदरचिते जैमिनिपद्यामृते पित्रादिनिधननिर्णयो नाम षष्ठः प्रवाहः श्रीसद्गुरुचरणार्पणमस्तु । आदितः पद्यसंख्या १९५+७=२०२

इत्युक्त इति । श्रुतिनियुता रामा. सप्त । शेषं स्पष्टम् ॥ ८ ॥
इति श्रीजैमिनिपद्यामृतवृत्तौ मूलकन्दल्या षष्ठः प्रवाहः ॥

Sampath kumar Medavarapu

अथ सप्तमः प्रवाहो विविच्यते ।

अथ दशाभेदबलभेदान्विवक्षुरादावन्तर्दशा पुष्पिताग्रयाह—

भवति विषमभे क्रमात्तदादेः समभवने तु तदस्ततो विलोमात् ।
इह सकलदशान्तरप्रवृत्तिर्यदि न विशेषनिरूपितोऽथवाधः ॥ १ ॥

भवतीति स्पष्टार्थम् ॥ १ ॥

अथ निर्याणशूलदशामुपजातिकयाह—

लग्नास्तयोर्यो बलवाँस्तदादिः प्रणीयते शूलदशान्तहेतुः ।
एकैकराशेः शरदश्चरादिवत्प्रातिस्विकं यत्र न मानमुच्यते ॥ २ ॥

लग्नास्तयोरिति । अथ सामान्येनाह—एकैकराशेरिति । शेषं स्पष्टम् ॥२॥

अथ पितुर्मातुरनुजस्य भगिनीपुत्रयोश्च निर्याणशूलदशा वैतालीयाभ्यामाह—

उदयास्तशुभर्क्षमांसलात् पितृनिर्याणदशा विधीयते ।
तत एव तुरीयकांसलाज् जननीशूलदशापि नीयते ॥ ३ ॥
मृतिशूलदशानुजन्मनस्तनुजायासहजोद्भटादिका ।
भगिनीसुतयोस्तु सा भवेदुदयास्तात्मजवीर्यवन्मुखी ॥ ४ ॥

उदयास्तेत्यादि । उदयास्ताभ्यां ये शुभर्क्षे नवमराशी तयोर्मध्ये मांसलाद् बलवतः । तत एव उदयास्ताभ्यामेव यौ तुरीयौ राशी तयोर्मध्ये अंसलाद् बलवत. । एवं तनुजायाभ्यां यौ सहजौ तृतीयराशी तयोर्मध्ये उद्भटादिका बलवदादिका । एवमुदयास्ताभ्यां यावात्मजौ पञ्चमराशी तयोर्मध्ये वीर्यवन्मुखी । शेषं स्पष्टम् ॥३—४॥

अथ ज्येष्ठभ्रात्रादीनां निर्याणशूलदशां विद्युन्मालयाह—

लग्नास्ताभ्यां लाभमाणी यः स्यात्तस्याज्ज्येष्ठभ्रातुः ।
मातापित्रोस्तुल्या वेद्या तत्कल्पानां निर्याणोक्तिः ॥ ५ ॥

लग्नास्ताभ्यामिति । तत्कल्पानां मातापित्रो. सदृशानाम् ॥ ५ ॥

विषमे तदादिर्नवमांशः ॥२।३।१॥ अन्यथादर्शादिः ॥२।३।२॥ पितृलाभप्रथमप्राण्यादिः शूलदशा निर्याणे ॥२।३।१८॥ पितृलाभपुत्रप्राण्यादिः पितुः ॥२।३।१९॥ आदर्शादिर्मातुः ॥२।३।२०॥ कर्मादिर्भ्रातुः ॥२।३।२१॥ मात्रादिर्भगिनीपुत्रयोः ॥२।३।२२॥ व्ययादिर्ज्येष्ठस्य ॥२।३।२३॥ पितृवत्पितृवर्गे ॥२।३।२४॥ मातृवन्मातृवर्गे ॥२।३।२५॥

विषमे ओजे महादशाराशौ सति तदादिः क्रमेण नवांशोऽन्तर्दशा प्रणीयते । अन्यथा समे आदर्शादिरक्रमेणेति योजना । एतदुक्तं भवति—यथा पुरतोऽवस्थापिते दर्पणे बिम्बप्रतिबिम्बयोरव्यवहितावस्थानं तथा क्रमोत्क्रमाभ्यां लग्नादिद्वादशादिगणनाप्यव्यवहितावस्थानाभिप्रायिकेति प्रतिभाति । 'आदर्शादिर्मातु' (२।३।२०) इति सौत्रप्रयोगेण मुनीन्द्रस्यादर्शशब्दो नियमेन सप्तमवाचको नाभिप्रेत इत्यपि स्प-

Sampath kumar Medavarapu

क्रम् । आदृश्यते रूपमत्रेत्यादर्शं । आदर्शो दर्पण इति पर्यायौ । आदर्शं सम्मुखो भवतीत्यादि शिरोमणीयवासनाभाष्यश्लेषस्तु समभण्डलानुरुद्धदर्शनाभिप्रायक । वेन 'स्थूलादर्श—' (२।४।२०) इत्यत्रादर्शशब्द सप्तमवाचकतया प्राचा व्याख्यातोऽपि । निर्याणे निर्णीयमाने पिता (=$\frac{६}{१}\frac{१}{२}$=१) लग्न, लाभ (=$\frac{४}{१}\frac{३}{२}$=७) सप्तमम्, एतयोर्मध्ये य प्रथमप्राणी बलाधिकस्तदादिका शूलदशा स्यात् । लग्नसप्तमान्यतरत्रिकोणराशि॰ दशा निर्याणकारिणीत्यर्थं ॥ पितृलाभाभ्या लग्नसप्तमाभ्या सकाशाद् यथाप्राप्तक्रमोत्क्र॰ मगणनया यौ पुत्रौ (=$\frac{२}{१}\frac{२}{२}$=९) नवमराशी तत्र यलवदादि पितुर्निर्याणदशा स्यात् ॥ तथा आदर्श (=$\frac{५८}{१}\frac{०}{२}$=४) बलवाश्चतुर्थराशिस्तदादिर्मातुर्निर्याणदशा स्यात् ॥ तथा कर्म (=$\frac{४}{१}\frac{१}{२}$=३) बलवाँस्तृतीयराशिस्तदादिर्भ्रातुर्निर्याणदशा स्यात् ॥ तथा माता (=$\frac{६}{१}\frac{५}{२}$=५) बलवान् पञ्चमराशिस्तदादिर्भगिनीपुत्रयोर्निर्याणदशा स्यात् ॥ तथा व्यय (=११) बलवानेकादशराशिस्तदादिर्ज्येष्ठस्य निर्याणदशा स्यात् ॥ यथा तथाभूतबलवन॰ वमादिप्रवृत्ता पितृनिर्याणदशा तथैव पितृवर्गस्य पितृव्यादेरपि निर्याणदशेत्यर्थं ॥ मातृ॰ वदिति स्पष्टम् ॥

अथ निर्याणदशासु प्रकारान्तरेण शूलदशा अब्दगणना चोपजातिकयाह—

यो नैधनात्सप्तमराशिरस्माद् विधीयते शूलदशावशेषम् ।
ओजेऽङ्ककेत' क्रमत' समे तूत्क्रमाच्च वर्षाण्यत्र एव विद्यात् ॥ ६ ॥

य इति स्पष्टम् । 'लग्नास्तयो'—, इत्यादिना प्राङ् नैकधा निर्याणदशा दर्शिता । तत्र किल लग्नसप्तमयोमध्ये सप्तमो धनुर्बलवत्, तत उत्क्रमेण दशा प्रवर्त्या । वर्षाणि स्थिरवत् । इह दीर्घायुष सद्भावात् धनुषस्त्रिकोणराशी मेषसिंहौ । तत्र सिंहो निर्याणभम् ॥

लग्नसप्तमाभ्या नवमराशी कुम्भसिंहो, तत्र सिंहो बलवान् अत पितुर्निर्याणमन्वेष्यम् । एव मातादीनामपि ॥

निर्याणराशावन्विष्टे तत इद प्रकारान्तरमप्यवतारणीयम् ॥ ६ ॥

निर्याणलाभादि शूलदशा फले ॥२।४।१६॥ पुरुषे समा. सामान्यतः ॥२।४।१७॥

फले फलनिमित्त शूलदशा तत्र शूल—महेश्वरर्क्षादिभेदेन अनेकधा । तत्र निर्या॰ णराशेर्यो लाभ (=$\frac{५}{१}\frac{३}{२}$=७) सप्तम तदादिरिय दशा ॥ पुरुषे विषमराशौ सामान्यत क्रमात्, अन्यथा उत्क्रमादित्यर्थान्वयम् ॥

अथ मण्डूकाख्यामन्तर्दशामुपजातिकयाह—

ओजात्क्रमादुत्क्रमतश्च युग्माल्लग्नास्तयोर्वीर्यवतश्च राशेः ।
वदन्ति मण्डूकदशा त्रिकूटक्रमेण निर्याणविपाकसिद्ध्यै ॥ ७ ॥

ओजादिति स्पष्टम् । अन्तर्भोगकालस्तु चरान्तर इवावसेय. ॥

Sampath kumar Medavarapu

स्थूलादर्शवैपम्याश्रयो मण्डूकस्त्रिकूटः ॥२।४।१५॥

स्थूलः (=३७/१२=१) लग्नम्, आदर्शः सप्तमः, एतयोर्मध्ये वैषम्याश्रयो बलाधिक्यवान् दशारम्भहेतुभूतः । त्रयः कूटाश्चरस्थिरद्विस्वभावा यत्रासौ त्रिकूटः । मण्डूको मण्डूकाख्यान्तर्दशा । मण्डूक इव गतौ प्लुतियोगवशादन्वर्था ॥

अथ मण्डूकदशोदाहरणम् ।

लग्नसप्तमयोर्मध्ये सप्तमो धनूराशिर्बलवाँस्तेन पूर्वं धनुषि धनुरादित्रिकूटक्रमेण दशा प्रवर्तनीया ॥ तत्रायं क्रमः —धनुषि धनुर्मीनमिथुनकन्यामकरमेषकर्कतुलाकुम्भवृषवृश्चिकाः । एवमग्रे ॥

अथ बलविभागमुपजातिकाचतुष्टयेनाह—

प्राणोऽत्र राशेः, स च कारकाढ्ययोगः, समत्वे द्युचराधिकत्वम् ।
ततो हि तुङ्गादिरतो निसर्गश्चरादिकक्रामिकवीर्यवाही ॥ ८ ॥
पत्युस्ततः कारकसंगमादिरंशाधिकश्चात्र बली विशेषात् ।
ओजे द्वितीयव्ययगो बलीयानितीरितं राशिबलं किलाद्यम् ॥ ९ ॥
बलं द्वितीयं पतिजीवचान्द्रिदृग्योग, ईशस्य बलं तृतीयम् ।
स्वात्कण्टकादिष्वधिपस्य वीर्यं पूर्णक्रमेणापचयं प्रयाति ॥ १० ॥
बलं चतुर्थं खलदृष्टियोगतुङ्गादियातग्रहयुक्तिरोजे ।
इत्थं बलानामवधार्य तत्त्वं दैवज्ञवर्यैः फलमूहनीयम् ॥ ११ ॥

प्राणोऽत्र राशेरित्यादि । स्पष्टार्थम् ॥ ८—११ ॥

अथ प्राणः ॥२।३।५॥ कारकयोगः प्रथमो भानाम् ॥२।३।६॥ साम्ये भूयसा ॥२।३।७॥ ततस्तुङ्गादिः ॥२।३।८॥ निसर्गस्ततः ॥२।३।९॥ तदभावे स्वामिन इत्थं भावः ॥२।३।१०॥ आग्रायत्तो विशेषात् ॥२।३।११॥ प्रातिवेशिकः पुरुषे ॥२।३।१२॥ इति प्रथमः ॥२।३।१३॥ स्वामिगुरुज्ञदृग्योगो द्वितीयः ॥२।३।१४॥ स्वामिनस्तृतीयः ॥२।३।१५॥ स्वात्स्वामिनः कण्टकादिष्वपारदौर्बल्यम् ॥२।३।१६॥ चतुर्थतः पुरुषे ॥२।३।१७॥ पापदृग्योगस्तुङ्गादिग्रहयोगः ॥२।३।२८॥ इति चत्वारः ॥२।३।२९॥

राशीनामाद्यबलं कारकग्रहयोगः ॥ ग्रहयोगसाम्ये भूयसा अधिकसंख्येन ग्रहयोगेन बलम् ॥ ततो भूयस्त्वानन्तरं राशेस्तुङ्गादिः स्वतुङ्गस्वगृहस्वमित्रगृहस्थग्रहयोगो बलम् ॥ ततस्तुङ्गादिबलानन्तरं चरात्स्थिरः, स्थिराद् द्विस्वभाव इति क्रमेण बली ॥ तदभावे कारकयोगाद्यभावे स्वामिनो राश्यधिपतेरित्थं भावः कारकयोगादिर्बलम् ॥ अत्र बलचिन्तायां विशेषाद् आग्रायत्तोऽधिकांशग्रहो बली ॥ पुरुषे ओजराशौ प्रातिवेशिक उभयपार्श्ववृत्तिर्द्विद्वादशगतो ग्रहो बलाधायक इत्यर्थः ॥ इति प्रथमः प्राणः ॥ 'स्वामिगुरुज्ञानां दृष्टयो योगा द्वितीयः प्राणः ॥ स्वामिनस्तृतीयः प्राणः 'स्वात्स्वामिनः'—, इत्याद्युक्तः ॥ स्वाद् आत्मकारकात् कण्टकादिषु केन्द्रपणफरापोक्लिमेषु स्वामिनो राश्यधिपतेरपारदौर्बल्यं

Sampath Kumar Medavarapu

स्यात् । एतदुक्त भवति—केन्द्रे पूर्णं पणफरे ततो न्यूनमापोक्लिमे ततोऽपि न्यूनम् ॥ पुरुषे विषमराशौ 'पापद्वयोग '—,इति चतुर्थबलाद्बल स्यात् ॥ पापग्रहाणा दृष्टियोग स्तथा तुङ्गादिगतग्रहयोगो बल स्यात् ॥ 'कारकयोग '—,इत्यादिना त्रय एकोऽयमिति चत्वार प्राणा ॥

अथ सप्तमपादपदार्थानुपसंहरति—

इत्युक्तः शशधरभूमि (११) संख्यपद्यैः शास्त्रार्थो मुनिवचनानुरुद्ध एव। तेनाद्य प्रशमितसंशयावतार छात्राणां मतिमुकुरभ्रमत्करोतु ॥ १२ ॥

इति श्रीदुर्गाप्रसादद्विवेदरचिते जैमिनिपद्यामृते दशाभेदादिप्रस्तावो नाम सप्तम प्रवाह. । श्रीद्गुरुचरणार्पणमस्तु । आदित. पद्यसंख्या २०२+११=२१३

इत्युक्त इति । मतिरेव मुकुरो दर्पण ॥ शेष स्पष्टम् ॥ १२ ॥

इति श्रीजैमिनिपद्यामृतवृत्तौ मूलकन्दल्या सप्तम प्रवाह ॥

अथाष्टम. प्रवाहो विविच्यते।

अथ कारककेन्द्रदशा दोधकत्रयेणाह—

कारककेन्द्रदशा हि तदादिस्थायिन एव नवांशकनाथाः ।
लग्नचतुष्टयमासलपूर्वा द्वादश राशय उद्धरणीया. ॥ १ ॥
अत्र पराक्रमते बलशाली लग्नतदस्तभयो. कलनासु ।
स्वामिगृहावधिकाऽधिकसंख्या व्योमसदामपि वर्षमितिः स्यात् ॥२॥
जातकतत्त्वमहानिधिमुद्राद्रावणकर्मपटुप्रतिभानै. ।
स्वामिबलानि फलानि च बुध्वा प्राग्वदमुत्र यथायथमूह्यम् ॥ ३ ॥

कारककेन्द्रदशेत्यादि । तदादिस्थायिन केन्द्रादिवर्तिनो राशय एव नवांशकानामन्तर्दशाना नाथा स्यु । एतदुक्त भवति—केन्द्रस्था पणफरस्था आपोक्लिमस्था राशयोऽन्तर्दशास्वामिनो भवन्ति । तत्र लग्नादिचतुष्टये बलक्रमेण दुर्बलान्ता अन्तर्दशा गणनीया। अथ लग्नात् तत्सप्तमाद्वा अन्तर्दशा प्रारभ्यते क्रमोत्क्रमाभ्याम् । जातकतत्वे स्वादिष्फलप्रपञ्चाथम् ॥ १-३ ॥

स्वकेन्द्रस्थाद्या स्वामिनो नवांशानाम् ॥२।४।११॥ पितृचतुष्टयवैषम्य बलाश्रय. स्थित ॥२।४।१२॥ स तल्लाभयोरावर्तते ॥२।४।१३॥ स्वामिबल फलानि च प्राग्वत् ॥२।४।१४॥

स्वकेन्द्रस्थाद्या स्व आत्मकारक तस्य केन्द्रादिगता राशयो नवांशानामन्तर्दशानां स्वामिनः स्यु । पूर्वं केन्द्रस्था तत पणफरस्था तत आपोक्लिमस्था राशय इति

Sampath kumar Medavarapu

तात्पर्यम् ॥ पितुः (=$\frac{६}{२}$$\frac{३}{३}$=१) लग्नाचतुष्टये लग्नादिकेन्द्रे वैषम्यबलाश्रयोऽधिकप्राणो यो राशिस्तत्पूर्वको दशाप्रदो राशिः स्थितः व्यवस्थितः ॥ स तल्लाभयोः कारकसप्तमयोरावर्तते परिणमितो भवति ॥ स्वामीति सूत्रं स्पष्टं पद्यतो व्याख्यातं च ॥

अथ कारककेन्द्रदशोदाहरणम् ।

अत्र सूर्यः कारकस्ततः सप्तमश्चन्द्रः एतयोरधिष्ठाने वृश्चिकवृषौ। इह बलवतो वृश्चिकाद् उत्क्रमेण कारकराशिदशा प्रवर्तनीया। तन्नान्तर्दशैवम्—कारकाधिष्ठितवृश्चिकराशेरुत्क्रमेण केन्द्रीभूतानां वृश्चिकसिंहवृषकुम्भानां मध्ये वृश्चिको बलवॉस्तेन पूर्वं वृश्चिकराशौ वृश्चिकस्य, ततस्तन्न्यूनबलस्य वृषस्य, ततस्तन्न्यूनबलस्य सिंहस्य, ततः कुम्भस्य; अथ कारकादिकेन्द्रपणफरीभूतानां तुलाकर्कमेषमकराणां मध्ये बलक्रमेण पूर्वं मकरस्य, ततः कर्कमेषतुलानाम्; अथ कारकादिकेन्द्रापोक्लिमीभूतानां कन्यामिथुनमीनधनुषां मध्ये बलक्रमेण पूर्वं कन्यायास्ततो धनुर्मिथुनमीनानामन्तर्दशा प्रवर्तनीयेति। एवमेव तुलादिषु। अन्तर्दशाभोगकालस्तु दशमासादिः प्रतिराशिसमानः ॥

कारककेन्द्रदशाचक्रम्।

सू. बु. के.		मं.	वृ.		ल.	चं. रा.				शु.	श.
वृश्चि.	तु.	क.	सिं.	कर्क.	मी.	वृ.	मे.	मी.	कुं.	म.	ध.
१०	३	१०	९	२	५	८	५	७	९	१	८.
१९२९	१९३२	१९४२	१९५१	१९५३	१९५८	१९६६	१९७१	१९७८	१९८७	१९८८	१९९६ (२००६)
७ २९ ५१ २४											७ २९ ५१ २४

अथ कारककेन्द्रदशायां कारकादीनामन्दप्रदर्शनम्।

अत्र प्रथमं तावत्कारकस्य सूर्यस्य, पश्चात्तद्युक्तस्य बुधस्य केतोश्च; ततः केन्द्रगतानां चन्द्रराहुगुरूणां, ततः पणफरगतस्य शुक्रस्य, ततः आपोक्लिमगतयोर्मङ्गलशनैश्चरयोश्चेति दशाक्रमः। तत्रान्दाः 'स्वामिगृह—' इत्यादिना। अन्तर्दशाश्चात्र मैराशिकैः ॥

Sampath kumar Medavarapu

कारककेन्द्राब्दचक्रम्।

सू.	बु	के.	च	रा	गु	शु	मं	श
३	५	१२	११	३	७	८	१०	२
१९२९	१९३२	१९३७	१९४८	१९५०	१९६३	१९७०	१९७८	१९८८ (१९९०)
७ २६ ५१ २४								७ २९ ५१ २४

अत्रेद वक्तुमावश्यकम्—'स्वकेन्द्रस्थाद्या' इति सूत्रेण कारकदशा आक्षिप्यते। सा केन्द्रारभ्यतया कारककेन्द्रदशेति व्यवह्रियते। एव तदाश्रितराशितदन्तर्दशे अपि लभ्येते। उभयलिङ्गात्। नवो नूतन अशो भाग नवाश, स्वस्मिन्नपि स्वदायभागयोगात्। अन्तराश इति तात्पर्यम्। एवमेव पदेशोपपदेशदशे तदन्तर्दशे अपि प्रवर्तयितु शक्ये।

अथ नक्षत्रदशा आर्ययाह—

विंशोत्तर्यादिदशासरणिर्नक्षत्रदायसंपन्ना।
गौरीश्वरसंवादे सपरिकरा साधु मीमास्या ॥ ४ ॥

सिद्धा उडुदाये ॥२।४।१८॥

उडुदाये नक्षत्रायुर्दाये विंशोत्तर्यादिदशा सिद्धा ज्ञेया। तथा च मम पद्यानि—
तर्का दिश शिखरिणो धृतयो महीपा नन्देन्दवो नगभुवो मुनय स्वदस्रा।
सूर्येन्दुभूसुतविधुतुदजीवसौरिविस्केतुभार्गवदशाशरद स्वसूर्या ॥
६+१०+७+१८+१६+१९+१७+७+२०=१२०
जन्मर्क्षे दस्रहिते नन्दभक्तावशेषिते। वह्निभाद्भास्करादीना दशा विंशोत्तरीक्रमे ॥
स्वजन्मकालिकी दशा मयातनाडिका हृता भभोगनाडिकोद्धृता फल गता दशा भवेत्।
अपानया विवर्जिता स्वजन्मकालिकी दशा दशान्त भोग्यसज्ञिता तत शुभाशुभ वदेत् ॥

महादशा स्वस्वदशाभिराहता खनेत्रचन्द्रैर्विहृता समादिका।
अन्तर्दशा व्योमसदा भव त्वथो आसा समासेन महादशा मता ॥

यथा सूर्यान्त सूर्यस्य दशा (१×६×१९×३०)/१२० =मा ३ दि १८ एव चन्द्रादीनामपि। अथ सूर्यव्यन्तरम्। तत्र पूर्वानीतव्यन्तरम् ३।१८ सवर्णित जातम् १०८ ततोऽनुपातेन (१०८×१×६०)/१२० =दि ५ घ २४ इद व्यन्तरम्। अथ सूर्यप्रत्यन्तरम् तत्र व्य तरम् ५ घ २४ सवर्णित जातम् ३२४ ततोऽनुपातेन (३२४×६×६०)/१२० =घ १६ प. १२ अत्र फलान्युडुदायप्रदीपाख्येन निबन्धरत्नेन ज्ञेयानीति दिक्।

Sampath kumar Medavarapu

अथ विंशोत्तरीदशोदाहरणम् ।

जन्मदिने सूर्योदयात्कृत्तिकानक्षत्रस्य भोग्यघट्यादि ७।४१ जन्मेष्टम् ३०।५९ अतो रोहिणीनक्षत्रे जन्मेति ज्ञानं जातमेव । अथात्र रोहिणीनक्षत्रस्य जन्मसमये गतगम्यघट्यादीनामानयनम् । तद्यथा—जन्मेष्टम् ३०।५९ कृत्तिकाया भोग्यघट्यादिना ७।४१ हीनं २३।१८ जातं रोहिणीनक्षत्रस्य भुक्तघट्यादि । इदमेव भयातम् । कृत्तिकाया भोग्यघट्यः ७।४१ षष्टिघटीभ्यः शुद्धाः ५२।१९ अग्रिमदिवसीयपञ्चाङ्गस्थरोहिणीनक्षत्रभोग्यघट्यादिना ९।४६ सहिता ६२।५ जातं रोहिण्या भोग्यघट्यादिभभोगः ६२।५ अयमेव भभोगः । अथ दशाया भुक्तभोग्यवर्षाद्यानयनम्—

रोहिणीनक्षत्रे जन्म तेन चन्द्रस्य महादशायां जन्म, तस्य दशावर्षाणि दश, ततोऽनुपातः—यदि भभोगेन ६२।५ दशावर्षाणि दश लभ्यन्ते तदा भयातेन २३।१८ किम् ६२।५ : १० : : २३।१८ सवर्णितं जातम्

३७२५ : १० : : १३९८=१३९८०/३७२५

३७२५) १३९८० (३ वर्षाणि

११९७५

२००५ द्वादश १२ गुणितम्

२३६६० (९ मासाः

२२३५०

१३१० त्रिंशता ३० गुणितम्

३९३०० (१ दिनम्

३७२५

२०५ षष्टि ६० गुणितम्

१२३०० (५ घट्यः

१८६२५

८७५ पुनः षष्ट्या ६० गुणितम्

५२५०० (१४ पलानि

३७२५

१५२५०

१४९००

३५० पुनरपि षष्ट्या ६० गुणितम्

२१००० (५ विपलानि

१८६२५

२३७५ शेषमर्धाधिकमिति षड् विपलानि गृहीतानि ।

एवं चन्द्रस्य पूर्वं भुक्तदशा वर्षादिका=३ व. ९ मा. १ दि. ५ घ. १४ प. ६ वि. । दशभ्यः शुद्धा भोग्यदशा वर्षादिका=६।२।२८।५४।४५।५४ ॥

Sampath kumar Medavarapu

अथ विंशोत्तरीदशाचक्रम् ।

चं.	मं.	रा.	बृ.	श.	बु.	के.	शु.	सू.
६ २ २८ ५४ ४५ ५४	७	१८	१६	१९	१७	७	२०	६
१९२९	१९३५	१९४२	१९६०	१९७६	१९९५	२०१२	२०१९	२०३९ (२०४५)
७ २९ ५१ २४	१० २८ ४६ १०							१० २८ ४६ १०

अथो आर्यागीत्योद्गीतिभ्यां दृग्दशामाह—

उदयान्नवमतदीक्षितदशमतदीक्षितभवतदीक्षितानां च ।
राशीनां निर्दिष्टा त्रिकूटपदक्रमेण दृग्दशासरणिः ॥ ५ ॥

यद्युदयान्नवमर्क्षं भवति वृषो वृश्चिकः सिंहः ।
कुम्भोऽथवा तदानीं नवमो राशिर्विलोमतो ग्राह्यः ॥ ६ ॥

क्रमतश्चरेपु शरगजशिवाः स्थिरेषूत्क्रमादेते ।
द्वितनुषु वेदनगाशा दर्शनयोग्याश्च राशयोऽभिहिताः ॥ ७ ॥

उदयादित्यादि । क्रमत इत्यादिना प्रागुक्तो दृष्टिक्रमो निबद्धः ॥ ५–७ ॥

कुजादित्रिकूटपदक्रमेण दृग्दशा ॥२।४।२१॥ मातृधर्मयोः सामान्यं विपरीतमोजकूटयोः ॥२।४।२२॥ यथा सामान्यं युग्मे ॥२।४।२३ ॥

कुजः (=६३=९) नवमः तदादिर्लमतो नवमादित्रिकूटपदक्रमेण नवमदशमैका- दशराशिरूपेण दृग्दशा ज्ञेया । अन्वर्था संज्ञा ॥ माता (=६५=५) सिंहः, धर्मः (=५६=११) कुम्भः, एतयोरोजकूटयोर्गणनायां सामान्यमनुलोमगणना विपरीतं विलो- मगणना स्यात् । युग्मे युग्मकूटे यौ वृषवृश्चिकौ तयोर्यथासामान्यं यथाशास्त्रं विलोमग- णनैव स्यात् ॥

Sampath kumar Medavarapu

अथ दृग्दशोदाहरणम् ।

'उदयागमम—'इत्यादिना दृग्दशा प्रवर्तनीया । तत्र त्रिकूटपदक्रमेण स्थिरदशाया रव इति ॥

अथ दृग्दशाचक्रम् ।

		चं. रा.	बृ.	सू. बु. के.	शु.			श.		ल.	मं.
वृ.	कुं.	वृ.	सिं.	वृश्चि	म.	मे.	क.	ध	मी.	मि.	कन्या
७	८	८	८	८	७	७	७	९	९	९	९
१९२९	१९३६	१९४४	१९५२	१९६०	१९६८	१९७५	१९८२	१९८९	१९९८	२००७	२०१६ (२०२५)
७ २९ ५१ ३४											७ २९ ५१ ३४

अथ श्लोकाभ्यां त्रिकोणदशामाह—

लग्नपञ्चमधर्माणां यो राशिर्बलवान्भवेत् ।
तमारभ्य त्रिकोणाख्यदशारम्भः प्रजायते ॥ ८ ॥
अनुलोमविलोमाभ्यां गणना विषमे समे ।
राशौ दशावत्सरास्तु बोध्या नाथावसानकाः ॥ ९ ॥

लग्नपञ्चमधर्माणामित्यादि । लग्नादीनां मध्ये यो बलवाँस्तमारभ्य क्रमोत्क्रमाभ्यां लग्नादि-त्रिकोणचतुष्टयानुसारेण दशा प्रवर्तनीया । तत्राब्दाश्चरदशावदिति निष्कर्षः ॥ ८–९ ॥

पितृमातृधर्मप्राण्यादिस्त्रिकोणे ॥२।४।२४॥

त्रिकोणे त्रिकोणदशाया पिता (=१) लग्नम्, माता (=५) पञ्चमः धर्मो नवमः । प्रकृतसूत्रानुरोधाद् धनेति पाठः साधीयान् । तथात्र धनम् (=९) पितृमातृधनानां लग्नपञ्चमनवमानां मध्ये यः प्राणी बलवान् तदादि· क्रमोत्क्रमाभ्यां राशीनां दशा प्रवर्तनीया । त्रिकोणेत्यन्वर्थसंज्ञा । अत्रान्तराणि चरदशायामिव गणनीयानि ॥

Sampath kumar Medavarapu

अथ त्रिकोणदशोदाहरणम् ।

लग्नपञ्चमनवमानां मध्ये लग्नस्थमिथुनराशिर्बलवाँस्तेन मिथुनादिका यथोक्ता त्रिकोणदशा प्रवर्तनीया ।

अथ त्रिकोणदशाचक्रम् ।

ल.				सू. बु. के.		बृ.	श.		मं. गु.	शु.	चं.रा.
मि.	तु.	कुं.	कर्क.	वृश्चि.	मी.	सिं.	ध.	मे.	क.	म.	वृ.
५	३	९	२	१०	७	९	८	५	१०	१	८
१९२९	१९३४	१९३७	१९४६	१९४८	१९५८	१९६५	१९७४	१९८२	१९८७	१९९७	१९९८ (२००६)
७ २९ ५१ २४											७ २९ ५१ २४

अथ पाकभोगराशीन्दर्शयन्ननुष्टुभा फलमतिदिशति—

त्रैकोणिकदशायां तु द्वारबाह्यानुरोधतः ।
होरोदन्वत्पारदृश्वा पूर्ववत्फलमादिशेत् ॥ १० ॥

त्रिकोणेति । होरैव दुरवगाहत्वादिना उदन्वान् उदधिस्तस्य पारदृश्वा ॥ १० ॥

तत्र द्वारबाह्याभ्यां तद्वत् ॥२।४।२५॥

तत्र त्रिकोणदशायाम् ॥

अथ तत्तत्कारकेभ्यस्तत्तत्स्थानफलमनुष्टुभाह—

सप्तमाद्य तृतीयाद्य प्रथमान्नवमादपि ।
दारान्भ्रातरमात्मानं गुरुं च चिन्तयेत्स्वतः ॥ ११ ॥

सप्तमाचेति ॥ ११ ॥

घासगैरिकात्पत्नीकरात्कारकैः फलादेशः ॥२।४।२६॥

घासः (=$\frac{४}{७}\frac{२}{१}$=७) सप्तमः, गैरिकः (=$\frac{१}{३}\frac{३}{२}$=३) तृतीयः, तस्मात् । पत्नी (=१) प्रथमः, करः (=$\frac{१}{२}$=९) नवमः, तस्मात् । कारकैस्तत्तत्कारकैः फलादेशः ॥

Sampath kumar Medavarapu

अथ नक्षत्रदशामनुष्टुभाह—

यन्नक्षत्रे भवेज्जन्म तन्नाड्योऽर्कविभाजिताः ।
क्रमोत्क्रमाभ्यां लग्नादिराशयोऽत्र दशाधिपाः ॥ १२ ॥

यदिति ॥ १२ ॥

ताराकांशे मन्दाद्यो दशेशः ॥२।४।२७॥

ताराया श्चन्द्रनक्षत्रस्यार्कांशे द्वादशभागे मन्दः ($\frac{\text{ठ}}{\text{ठ}}$=१) लग्नं तदाद्यो दशेशो दशास्वामी । एतदुक्तं भवति—जन्मकाले यन्नक्षत्रं तस्य याः सर्वर्क्षरीत्या घटिकाविघटिकास्ता द्वादशधा विभज्य प्रथमखण्डमारभ्य द्वादशसु खण्डेषु क्रमेण लग्नादिद्वादशराशयो दशास्वामिनः । तथा लग्नमारभ्य क्रमोत्क्रमभेदेन द्वादशराशिदशाः । दशाब्दाः स्थिरवत् ॥

अथ नक्षत्रदशोदाहरणम् ।

रोहिण्यां जन्म । तेन पूर्वसाधिते भभोगभयाते ३७२५,१३९८। एतयोर्मध्ये भभोगे ३७२५ द्वादशहृते फलं पलादि ३१०।२५। अनेन भयाते १३९८ हृते फलं राश्यादि ४।१५।६।३१।इदं जन्मलग्ने २।२७।४५।२७ योजिते जातम् ७।१२।५१।५८। अतः प्रथमदशास्वामी वृश्चिकराशिस्ततो व्युत्क्रमेण द्वादशराशीनां दशा प्रवर्तनीयेति ।

अथ नक्षत्रदशाचक्रम् ।

सू. बु. के.		मं. शु.	बृ.			ल.	चं. रा.			शु.	श.
वृश्चि.	तु.	क.	सिं.	कर्क.	मि.	वृ.	मे.	मी.	कुं.	म.	ध.
८	७	९	८	७	९	८	७	९	८	७	९
१९२९	१९३७	१९४४	१९५३	१९६१	१९६८	१९७७	१९८५	१९९२	२००१	२००९	२०१६ (२०२५)
७ २९ ५१ २४											७ २९ ५१ २४

Sampath kumar Medavarapu

अथ तारालग्नफलमनुष्टुभाह—

तारालग्ने तुङ्गयाते नीचगे वापि लक्ष्मणाः ।
मित्रराशिगते किंचिदरिभस्थे तु दुर्गताः ॥ १३ ॥

तारालग्न इति ॥ १३ ॥

तस्मिन्नुच्चे नीचे वा श्रीमन्तः ॥२।४।२८॥ स्वमित्रभे किंचित् ॥२।४।२९॥ दुर्गतोऽपरथा ॥२।४।३०॥

दुर्गतो दरिद्रः । शेषं स्पष्टम् ॥

अथान्तर्दशोपदशे अनुष्टुभ्यामाह—

ओजराशावोजपदे कारके क्रम इष्यते ।
युग्मभे व्युत्क्रमो युग्मपदे तु विपरीतता ॥ १४ ॥
अदो मन्देऽपि संचार्यमिति केचित्प्रचक्षते ।
अन्तर्भुक्त्यंशयोरेतद्वेदितव्यं प्रयत्नतः ॥ १५ ॥

ओजराशाविति । अद ओजराशावित्युक्तं कर्म मन्दे वेदितव्यमिति केषांचिन्मतम् ॥ १४–१५ ॥

सवैषम्ये यथास्वं क्रमव्युत्क्रमौ ॥२।४।३१॥ साम्ये विपरीतम् ॥ २।४।३२ ॥ शनौ चेत्येके ॥ २।४।३३॥ अन्तर्भुक्त्यंशायोरेतत् ॥२।४।३४॥

स्वस्यात्मकारकस्य वैषम्ये विषमपदत्वे यथास्वं यथाक्रमम्, क्रमव्युत्क्रमौ विषमपदे विषमराशिश्चेत्क्रमः समराशिश्चेद् व्युत्क्रमः साम्ये युग्मपदत्वे विपरीतं समराशौ क्रमो विषमराशौ व्युत्क्रम इति ॥ यथा कारके विषमसमपदभेदेन क्रमोत्क्रमतद्विपरीतत्वानि तथा शनाविति केचित् । अत्र चकारस्थाने वाकारः सुगमः ॥ अन्तर्भुक्त्यंशौ अन्तर्दशोपदशे तयोरेतत्कर्म ॥

अथ सामान्येन दशाफलमनुष्टुभाह—

शुभा दशा शुभयुते राशावुच्चेऽथवा ग्रहे ।
अन्यथा त्वन्यथा बोध्या दशा जातककोविदैः ॥ १६ ॥

शुभेति ॥ १६ ॥

शुभा दशा शुभयुते धाम्न्युच्चे वा ॥२।४।३५॥ अन्यथाऽन्यथा ॥२।४।३६॥

धाम्नि राशौ शुभयुते सति तद्राशिदशा शुभा स्यात् । उच्चग्रहयुते राशौ तदधिपे वोच्चे तद्राशिदशा शुभा स्यात् ॥ अन्यथा पापनीचादियोगे तद्राशिदशाऽन्यथा स्यात् ॥

Sampath kumar Medavarapu

अथ शास्त्रार्थं समासमनुष्टुभोपसंहरति—

सिद्धमन्यदिति प्राह शास्त्रान्ते भूरिबोधकम्।
सिद्धिर्वृद्धिः समृद्धिश्च जायतां पठतामिदम्॥ १७॥

सिद्धमन्यदिति। इदं जैमिनिपद्यामृतं कर्म। शेषं स्पष्टम्॥ १७॥

सिद्धमन्यत्॥४।४।३७॥

अन्यदनुक्तं सिद्धं शास्त्रान्तरे प्रसिद्धम्।

अथ तत्रभवन्तं सूत्रकारं प्रति शिष्यान्मणिगुणनिकरेणानुकूलयन्नाह—

प्रतिजननियमितदिविचरसहज-
व्यतिकरविनिगमविकसनकृतये।
स्फुटफलमधुररसमशनमनसः
प्रणमत मुनिवरमतिशयमहसम्॥ १८॥

प्रतिजनेति। स्फुटेति तृतीयचरणं सबोधनम्॥ १८॥

अथ श्रीगुरुस्मरणपूर्वकं तस्मै प्रकृतकृतिं समर्पयंस्तस्या अभ्युदयं शार्दूलविक्रीडितेनाह—

ब्रह्मध्यानविचारपूजनकलासाम्राज्यसौभाग्यभाग्
भाति श्रीसरयूप्रसादसुमनाः श्रीकण्ठविद्यागुरुः।
अस्य श्रीचरणारविन्दयुगले भक्त्यार्पितासौ कृति-
श्छात्राणां प्रतिमोदयं विदधती कल्पान्तमुन्मीलतु॥ १९॥

ब्रह्मेति। श्रीकण्ठविद्या प्रत्यभिज्ञादर्शनादिः॥ १९॥

अथाष्टमपादपदार्थानुपसंहरति—

इत्युक्तः खलु नवचन्द्र(१९)संख्यपद्यैः
शास्त्रार्थो मुनिवचनानुरुद्ध एव।
तेनायं प्रशमितसंशयायतारं
छात्राणां मतिमहिमा महत्त्वमेतु॥ २०॥

इति श्रीमदयोध्याप्रान्तवर्तिपण्डितपुरीवास्तव्यद्विवेदोपाख्यपण्डितदुर्गाप्रसादरचिते जैमिनिपद्यामृते प्रकीर्णप्रपञ्चोनामाष्टमः प्रवाहोऽष्टाविंशत्यधिकाष्टादशशततमे शालिवाहनशके जयपुरराजधान्यां परिपूर्तिमापन्नः श्री६ गुरुचरणार्पणमस्तु। आदितः पद्यसंख्या २१३+१९=२३२द्वात्रिंशताधिका द्विशतीति शिवम्॥

इत्युक्त इति॥ २०॥

Sampath kumar Medavarapu

ये सन्ति सुज्ञाः फलितावगाहिनस्तेभ्यो नमोवाकमुदीर्य सादरम् ।
निवेद्यते यन्मयकात्र दुष्कृतं तत्साधुदृष्ट्या सुकृतं विधीयताम् ॥

न यत्र युक्तिर्गणितानुसारिणी न व्याहृतिर्वानुभवैकसाक्षिणी ।
चिरानुभूतिप्रतिभानमन्तरा न तत्र किंचिद्गमकं प्रतीयते ॥

आः कष्टमास्तामिहितेऽपि शासने परम्पराच्छिन्नपदार्थकल्पने ।
मुह्यन्ति विज्ञा अपि दूरदर्शिनः किं मादृशाष्टिप्पणपिष्टपेषिणः ॥

चिराय जीव्यान्मम शिष्यसत्तम, स माधवो माधवपादसेवकः ।
यदाग्रहतो जैमिनिमूलकन्दली समाप्तिमागाज्जयपत्तनान्तरे ॥

जयन्ति ते जातकचन्द्रचन्द्रिका झलञ्झलालालितचित्तवृत्तयः ।
यैर्बोध्यते खेचरचक्रमानुपप्ररूढसम्बन्धविशेषवासना ॥

इति श्रीदुर्गाप्रसादद्विवेदविरचितायां जैमिनिपद्यामृतवृत्तौ मूलकन्दल्यामष्टमः प्रवाहः ।

सन्दर्भः समाप्त इति शिवम् ॥